Bilt

Ballarpur Industries Limited

Manuscript of

ध्रुवाभ्युदयम्

of

H.O.
THAPAR HOUSE
124, JANPATH
NEW DELHI-110001

महामहोपाध्याय शङ्करलाल माहेश्वर

Div/Dept. तथा

Subject वैद्यप्रयोजनम्

of

From ______ **To** ______

ज्योतिर्मित्र आचार्य

File No. ______

The Thapar Group

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वैद्यप्रयोजनम्

वैद्यो ज्योतिर्मित्र आचार्यः एम० ए०, बी० आई० एम० एस०, साहित्याचार्यः, दर्शनाचार्यः,
आयुर्वेदाचार्यः, सहायकानुसंधायकः (रिसर्च असिस्टेण्ट) आयुर्वेद स्वास्थ्यमन्त्रालयः
भारत सरकार नई दिल्ली ।

स्थानम्—कस्यचिद्वैद्यस्य चिकित्सालयः

(ततः प्रविशति कश्चित् करुणाक्रन्दनं कुर्वाणो रोगी दुःखितकायः) ।

रोगी—दुःखितोस्मि दुःखितोस्मि (प्रविश्यातुरालयम्), वैद्यराट् वैद्यराट् । प्राणघातिन्या अस्या वेदनायाः परित्रायस्व माम, अहा . आ . . आ . . प्राणाः निर्गन्तुमिवेहन्ते ।

(वैद्यराजः श्रृण्वन्नपि न श्रृणोति अपितु पुस्तके दत्तावधानः सन् रोगिणमुपेक्षते । पुनः खलु रुग्णः साम्रेडमाक्रोशति) ।

पुनः वैद्यकथनाद् नाडीं दर्शयति, ततो वैद्यो नाडीं स्पृशति—

प्रथमो वैद्यः—(साश्चर्यम्) अहो दारुणोऽयं व्याधिः, चिरात् प्रतिपन्न इति नाडीतः प्रतिभाति मे । अकाले चैव यमद्रंष्ट्या कवलीभविष्यसि त्वम्-इति प्रतीयते मे । कथम् एतावान् विलम्बोऽवलम्बितः ?

रोगी—(स्वं दारुणव्याधिग्रस्तं विज्ञाय) भगवन् (सांजलिपुटम्) यत् किमपि सवृत्त तदपैतु, इदानीन्तन पश्य, रक्ष च माम्, करालशूलेनविद्धमिव शूलेन चोष्यते मे कुक्षिः आ . . आं . . । कर्तरीविदीर्णमिव उपसर्पत्कृमिसहस्रैरधिजग्धमिव मदीयमुदरम् । हा . . हा ? . . आ . . (इतिकृत्वा पुनः उच्चैरतिक्राशति) ।

द्वितीयो बालचिकित्सकवैद्यः (प्रविश्य आतुरालयम्, आसन्द्यां निषण्णं विषण्णं वैद्यमवलोकयन्) अयि महाशय ? व्यपगतप्रज्ञो जातस्त्वं किम्, व्यपगतज्योतिषी किन्ते चक्षुषी ? मुधैव वंचयसि एनम् । विरमतु तावत्, अनुपयुक्तस्तवोपचारः, अपार्था ते गुटिकाक्वाथादियोजना, नायं चैतत्साध्यो व्याधिः, इह तु पंचकर्म एव उपयुक्ते । प्रपंचमयो हि दृश्यते संसारः—

मिथ्यौषधैर्हन्तमृषा कषायैः
असह्यमलेह्यैरयथार्थतैलैः ।
वैद्या इमे वंचितरुग्णवर्गाः,
पिचंडभाण्डं परिपूरयन्ति ॥

कषायैरुपवासैश्च नृणामुल्लाघतांकृताम् ।
निजौषधकृतां वैद्यो निवेद्य हरते धनम् ॥

(यदा तृतीयो वैद्यः प्रविशति तस्मिन्नेव समये रोगी पुनः ससाध्वसं विलपति) ।

रोगी—अरे किमपि विधेहि, क्वाथं पायय, गुटिकां वा दापय, पचकर्माणि वा कारय, यत्किमपि अस्ति तेन मां व्यपगतवेदनं कुरु, क्षिप्रमेव विरुजं भावय । अरे प्राणाः यमसदनातिथ्यं कामयन्ते, युवांच कलहायेथे, अहो महत्कष्टम् । मन्ये तावत् कुण्ठिता युवयोर्बुद्धिः । हे भगवन् करुणावरुणालय? स्वामिन् ? सुरक्ष चैनम् ।

(एतावति कालएव प्रविशति तृतीयो रस-

CC-0. Prof. Satya Vrat Shastri Collection, Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रसवैद्यः—हुं किंकृतम्, मुधैवापजल्पसि, किंकृत्वा निदानं विहितम्, प्रकृतिर्दृष्टा, ? विकृतिर्दृष्टा ? अपिविमृष्टा दोषदूष्यसम्मूर्च्छना, प्रकृतिविकृतिसारासंहतिश्च प्रमाणं, सरुजि नरि परीक्ष्या सात्म्यसत्वे वयश्च ।

अशनजरणशक्तिः सा परिश्रान्तशक्तिर्बलमवगच्छेतास्तैश्चिकित्सासु वैद्यः ।।

अपि च—

अये रोगो हि गूढलिंगोयम्, किन्नावमृष्टमेतत् ।

रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म भिषक् प्राज्ञःज्ञानपूर्वं समाचरेत् ।।

मन्ये तावत् बालचिकित्सकतया धिषणा तावकी शावकसन्निभैव—

पुष्पिताक्षः शलाकीव, कुष्ठीकायचिकित्सकः ।
पृच्छन्ति बालभिषजं, कथन्ते दारकाः मृताः ।।

अपि नाम अवस्थापाकः, निष्ठापाकः, न जाने कः कः पाकः युवाभ्यां पाच्यते, मृषैव द्रविणव्यायाम उद्वेल्यते, यतः "उत्तमो रसवैद्यः स्यात्" यतो न वेत्सि मामकीनं महत्वं, साक्षादहं भरपूरामृतधरः, हेमगर्भपोट्टलीमकरध्वजप्रभृतयः सिद्धौषधयो भूयस्यो वर्तन्ते मदन्तिके । निकषे कष्यमाणेन क्षोदः परिमितत्वेनावलेह्यमाने सर्वशूलोपशमस्त्वरितमेव सम्पत्स्यते । मा भैषीः · · इमौ द्वौ वैद्यमानिनौ मुधैव चिकित्सतुकामौ त्वां—

न धातोर्विज्ञानं, न च परिचयो वैद्यकथने,
न रोगाणान्तत्त्वावगतिरपि नो वस्तुगुणधीः ?
तथाप्येते वैद्याः, इति तरलयन्तो जडजनान्,
अमून् भृत्याः मृत्योरिव वसु हरन्ते गदजुषाम् ।।

रोगी—अरे अपहरध्वं क्षिप्रमेव मम गदम्, युष्माकम् अगदं निर्वीर्यं जातं किम् (पुनः आक्रन्दनं नाटयति) ।

ततः प्रविशति वेगात् सर्वोपकरणसमवेतः भृत्येनानुगम्यमानः कश्चिद् द्राक्तरः (Doctor) डॉ (द्राक्तर) वटरः पाश्चात्यचिकित्सकः—

ओहो किं समाचर्यते युष्माभिः आसन्नमरणोयं रोगी दुर्दान्तासह्यशूलाक्रान्तो दृश्यते, तथापि परस्परंवितण्डावादेन कालम् अतिक्रामथ । कश्चायं दोषः, किन्नाम दूष्यत्वम्, किन्नाम धातुरूपो वराकः, किं जल्पनं पंचभूतत्वे किं विकल्पनम् अस्मिन् प्रगल्पे । इमाः सर्वा विकत्थनाः चतुर्दशशताब्द्याः—आहोस्विद् व्यपगतानेकसहस्रवर्षस्य कृतयुगस्य । अयि वैद्यमहाशया उन्मेष्यन्ताम् स्वानि चक्षूंषि, विंशतितमीयं शताब्दी, विज्ञान-प्रभा-प्रभाविताः सर्वाः प्रकृतयः । अद्यत्वेपि प्रगाढतामसीं निद्रां न जहीथ । मौनम् आकलय्य आलोकयत इमानि-सर्वाणि यन्त्रोपकरणानि झटित्येव निदानं सम्पत्स्यते एभिः, एतदेव नहि अपितु क्ष किरणयन्त्रमपि अस्ति येन शरीरान्तर्गतमपि अंगजातं विलोकयितुं शक्यते अणुवीक्षणयन्त्रेणापि दुर्लक्ष्यमपिवस्तु लक्षगुणात्मकं दृश्यते । किमधिकं माहात्म्यं वर्णयामः ।

सर्वैरेकीभूय द्राक्तरंप्रति समुत्तरद्भिरिदं कथनम्—

प्रथमो वैद्यः—अलमतिप्रलपितेन को नामासि त्वम् अस्मासु चतुर्थः ।

द्वितीयो वैद्यः (बालचिकित्सकः)—ओहो डाक्टरस्त्वम्, कस्माद्द्राक्तारयसि ? रोगाद्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आहोस्वित् संसारात् ? ओ हो त्वम् एजेण्टपदभाग् विदेशीयौषधीनाम् ।

तृतीयो रसवैद्यः—(डाक्तरं प्रति) नेमानि तत्त्वानि ते बुद्धिगम्यानि । दोषदूष्यसम्मूर्च्छनापदं जिह्रेति त्वादृशात् जनात् किं रोगनिदानं विवरीतुमीहसे, न जानासि वैद्यमहत्त्वं—

मस्ते दुस्सहवेदनाकवलिते भग्ने स्वरेन्तर्गते,
तप्तायां ज्वरपावकेन च तनौ तान्ते हृषीकव्रजे ।
दूने बन्धुजने कृतप्रलपने धैर्यं विधातु पुनः
कः शक्तः कलितामयप्रशमनाद्वैद्यात् परो विद्यते ।।

त्रयाणां वैद्यानां कथनानन्तरं पुनः डाक्तरं प्रति वदति—

प्रथमो वैद्यः—उपकरणहीनस्त्वं सर्वथाऽसमर्थः निदानकरणे, यदि कश्चिद् अपहरेद् युष्माकीनं यन्त्रं तर्हि त्वं केवलं साक्षाद् गोमयगणेश इव भास्यसे ।

द्वितीयो बालवैद्यः—त्वं केवलं कार्यं ध्यायसि, न कारणम् । मृत्यूत्तरशवच्छेदे एव तव निदानं संभवति । अवशिष्टं च अशरण्यशरण्ये—"बैक्टीरियालोजी" शास्त्रे उपगच्छति ।

एतावति अन्तरे एव रोगी स्वमस्तके दत्तहस्तः इमम् श्लोकम् पठति—

रोगी—

वैद्य वैद्य नमस्तुभ्यं क्षपिताशेषमानव ।
त्वयि विन्यस्तभारोयं कृतान्तः सुखमेधते ।।

डा (डाक्तरः) क्टरः—(वैद्यान् प्रति कथयन्) मा स्म गमः विकत्थनासरणिम्, ते निदानपद्धतिस्तु अतीवहास्यास्पदम् । न ते शरीरगतांगानां स्थितिज्ञानम्. ब्रूत ब्रूत ? क्व ते हृदयम्—उरसि शिरसि वा ? यकृत्प्लीह् नोः का अवस्थितिः ?, न किमपि प्रत्यक्षज्ञानं ते, केवलं पुस्तकं दृष्ट्वैव उपचरितुं कामयध्वम् । अस्माकं समग्रा पद्धतिः प्रयोगात् निष्पन्ना अस्ति । चेन्नायं व्याधिः औषधसाध्यस्तर्हि तत्र शल्योपचारं विधाय रोगोपशमः क्रियते । अस्ति किमपि एतादृशं भवादृशामन्तिके (रोगी पुनः चीत्कारं विधाय स्वोदरं स्पृशन् नाटयति) ।

ततः प्रविशति कश्चित् जटाजूटी उत्तरीयावृतः सौम्यवदनः प्रबुद्धजनः—

धीमान् जनः—(पाणिभ्यां सान्त्वयन्) शान्तिरवलम्बनीया भवद्भिः, मुधैव कोलाहलः क्रियते, द्रष्टव्यः पुरा रोगी आक्रोशमानः, असह्यवेदनापरीतः, युष्माकं समेषाम् अयमेव धर्मः यत् रुग्णः व्यपगतव्याधिकः स्यात् । भो डाक्टरमहाभागाः—"आतुरस्य रोगप्रशमनम्" इति सिद्धान्तस्तव पद्धत्यामप्यस्ति एषान्त्वस्त्येव । न वैद्यः अभिदूषणीयः न च भवान् अभिदूषणीयः (वैद्यान् प्रति अवलोकयन्)—

प्राबोधि वैद्यकमथापि महामयेषु
प्राप्तेषु यो भिषगिति प्रथितस्तमेव ।
आकारयत्यखिलगर्वविशेषदर्शी
लोकोपि तेन भिषगेव न दूषणीयः ।।

भवद्भिर्न ध्यानं दत्तम् अस्मिन् अमूल्ये श्लोके—

हितहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ।।

भवतां परिधिः अतीव महीयान्, एतत् पुराणम्, एतत्नवीनम् इति भवद्भिर्न विचार-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

णीयम्, कालिदासेनापि प्रोक्तम्—

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम्।
सन्तः समीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥

अपि च—

बुद्धिः पश्यति या भावान्, बहुकारणयोगजान्।
युक्तिस्त्रिकाला सा ज्ञेया त्रिवर्गः साध्यते यया ॥

एवं प्रकारया चरकोक्त्या भवन्तो महीयंताम्। कथं भवत्सु समेषामीदृशी विवादात्मिका प्रवृत्तिः, न शोभते एतादृशं कृत्यं भवादृशेषु चिकित्सापरायण जनेषु। भवताम् ज्ञानपरिणामः परिफलतु राष्ट्रकल्याणाय लोकहिताय च। भवतु नाम क्वाथ-गुटिका-भस्म-रस-प्रपंचः, पंचकर्ममंचायिता उपचारपद्धतिः, प्रमाणपरिपुष्टिपूर्वकं विवेचनीया किल पद्धतिरेषा। विनिगमिततत्वानि उन्मिषन्तु समेषां चक्षूंषि, अयं डाक्टरोपि दक्षः स्वकर्मनैपुण्ये, मन्ये न मूलरोगनाशिनी अस्य पद्धतिस्तथापि अनेनापि विज्ञानविकासनाय सहयोगः सम्पादनीयः इदानीन्तने संक्रमणकाले, किन्तु अयं पाश्चात्यचाकचक्यात् विस्मरति स्वातीतानुभवं विमृशति च केवलं वर्त्तमानमेव "वसुधैव कुटुम्बकम्" इति स्मारं स्मारं भवद्भिर्न हापनीया मानवीयोत्तरदायिता। पारस्परिककलहात् पृथग्भूय परस्परमादानप्रदानाभ्यां शल्यकोविदः कायचिकित्सकश्च सन् यथाशक्ति वर्तस्व, अधिकाधिकसेवाकरणाय स्वकीयायाः मातृभूमेः। लभस्व च परिणाममधुरफलं त्वेकं यथानुरूपम् इत्यनया पद्धत्या भगवान् धन्वन्तरिर्वितरतु करुणामयीं दृष्टिम् प्रसन्नश्च वः शुभं विदध्यात्। एवं चेदमपि भवतु:—

समग्रं विज्ञानं, कलयतु नवीनं परिलसद्,
हिमे मौञ्जेस्थाने, सकलफलदः सोमविटपः।
विनाशोऽमित्राणां प्रखरकिरणैर्वैद्यततिभिः,
समे स्वस्थाः सुस्था विमलसुभगाः कार्यपटवः ॥

[साहित्यायुर्वेददर्शनाचार्येण एम०ए०, बी० आई० एम० एस०, इतिलब्धोपाधिकेनाचार्योपाह्वेन श्री ज्योतिर्मित्रशास्त्रिणाप्रणीतं "वैद्यप्रयोजनम्" नामैकांकिरूपकं समाप्तिमगात्। ओ३म् शान्तिः।]

—o—

सद्वैद्यकामना

न त्वहं कामये राज्यं, न स्वर्गं नापवर्गकम्।
कामये दुःखतप्तानां, प्राणिनामार्तिनाशनम् ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

साधनाया आधारः

मूललेखकः—जगद्विख्यात योगी श्री अरविन्दः
अनु०—कुञ्जविहारी संस्कृतोपाध्यायः श्री अरविन्दाश्रमः पाण्डीचेरी

प्रश्नः—साधनाया आधारोऽधिगतः साधकेनेति कदा वक्तुं प्रभवामः ?

उत्तरम्—यदा स्थिरा शान्तिः समता भक्तिश्च तेनाऽधिगम्यन्ते, यदा चाऽसौ लभतेऽविरतम् आध्यात्मिकाऽनुभवम् ।

प्रश्नः—प्रकृतौ शान्तेः समत्वस्य च स्थापनस्य को नु युक्तः पन्थाः ?

उत्तरम्—ऊर्ध्वस्थिते उभे त्वयि (सततम्) । देहे, मनसि, प्राणेऽवप्याह्वातव्ये एते स्वस्मिन् । यत्किञ्चिदपि च त्वां विक्षोभयति तत् त्वया निरसनीयं, निरसनीयश्च विक्षोभोऽपि ।

प्रश्नः—प्रकृतौ समता प्रतिष्ठितेत्यस्याऽभिज्ञापको यथार्थो व्यपदेशः कः ? किमयम् 'आन्तरो बाह्यो वा विक्षोभः प्रतिक्रिया-यत्नवर्जं समग्र-स्थिरतया सोढव्य इति भवितु नार्हति ?

उत्तरम्—विक्षोभवर्जमस्य साम्मुख्यं, स्थिरतया चाऽस्य वर्जनमेवाऽयं भवति । कश्चिदिमं विधेयोपचारं कर्तुं वर्तते वा न वेत्येतद् भेदाय न कल्पते । प्रतिविधेयश्चेदयं, स्थिरता तत्रावलम्ब्या, माभूत् तत्र क्रोधः, संधुक्षः, शोकश्च, न वाऽन्या काचिदपि विक्षोभिका वृत्तिः ।

प्रश्नः—लब्धा चेत् केनचित् समता, सोऽहंशून्यः संवृत्त इत्यस्माभिः प्रथयितुं प्रभूयते किम् ?

उत्तरम्—अहङ्कारस्य सर्वथाऽभाव एव समतायाः संज्ञा नास्ति । वासनाया आसक्तेश्चाभाव एवाऽस्याः लक्षणम् । अहंबोधः तिरोभवितुमर्हति, स्थातुमप्यर्हति सूक्ष्मतः स्थूलतो वा व्यक्तिसापेक्षमिदं ज्ञेयम् ।

प्रश्नः—अपि नाम शान्तेः, पवित्रतायाः, नीरवतायाश्च अवतरणमेव भागवताऽवरोहणमिति ?

उत्तरम्—इदमंशावतरणं खलु, न तु समग्रावतारः ।

प्रश्नः—सत्तायामवतीर्णा चेत् शान्तिः, उच्चतर-शक्तेः लीलाऽपि तस्यामुल्बणं लक्ष्यते । किमियं शक्तिः शान्तेरितरा ?

उत्तरम्—शान्तेरवस्थायां शक्तेः क्रीडा यथाविधि प्रचलति शक्तिः शान्तिश्च भगवतः द्वौ पृथग्भूतौ गुणौ ।

प्रश्नः—भागवतशक्तेर्धारणक्षमं सामर्थ्यं कथं नु स्वस्मिन् वर्धनीयम् ?

उत्तरम्—मनसोऽचञ्चलताऽऽदावावश्यकी । शेषतस्तु तीव्रेप्साऽभ्यासश्च काम्यौ ।

प्रश्नः—स्थिरस्य मनसः का भाषा ? अपि नामैतन्मनसः समग्रविचाराणां तिरोभावः ?

उत्तरम्—न खलु । विचाराणां सर्वथा तिरोभाव एवैतत् न भवितुमर्हत्यनिवार्यतया । विचाराणाम् अभाव एव शान्तिपदभाक् । तदेव मनः, स्थिरमिति कीर्त्यते यस्मिन्नु विचारा आगमाऽपायिनः, किन्तु स्वयं तत्तिष्ठति अक्षुब्धम् । तदनुभवति—'नेमे मदीया विचारा' इति । कदाचित् तान् निरीक्षतेऽपि, परं जातु केनचिदपि स न क्षुभ्यति ।

प्रश्नः—साधनायां प्रवृत्तेर्निवृत्तेश्च को भूतार्थः ?

उत्तरम्—साधनायां द्वे वृत्ती यथार्थे—तीव्रेप्सा, तपस्या च अज्ञानशक्तेर्वर्जनमित्यादौ प्रवृत्तिरेका; सत्यां गतिं, मातृशक्तेश्च क्रियां प्रति निवृत्तिरित्यन्या ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

'ध्रुवाभ्युदयम्'

श्रीप्रकविशङ्करलालः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

ध्रुवाभ्युदयम् ।

(छायानाटकम्)

परममाहेश्वर भट्टमाहेश्वर तनुजनुषा शीघ्रकविना
शङ्करलालेन रचितम् ।

तच्च
संवत् १९६८ वर्षीयाश्विनशुक्लदशम्यां रवौ

लींबडीपुरे गणेशजी जेठाभाइ शर्मणा
यशवतसिंह स्टीम मुद्रायन्त्रे मुद्रितम् ।

—:o:—

प्रथमावृत्तिः ।

सर्वोऽप्यधिकारः स्वाधीनः स्थापितः कर्त्रा ।

मूल्यं पादोनरूप्यकः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अर्पणपत्रम् ।

दिनदिनप्रौढप्रताप गोब्राह्मणप्रतिपालनपरायणान्तः
करणा महाराजाश्री ७ दौलतसिंहजीमहाराजाः !
श्रीध्रुवाभ्युदयनाटकमिदं
विश्वहितैषिणां जगद्बान्धवानां महाशयशिरोमणीनां
वैद्यराजरत्नानां श्रीमणुभट्टानामाज्ञया मया
प्रणीतमिति नाविदितं श्रीमताम्
किंच

मणुभट्टगुणज्ञानां यूयमग्रेसराः प्रभो ।
मणुभट्टाश्च युष्माकं गुणज्ञानां पुरःसराः ॥
मणुभट्टेषु युष्माकं भक्तिरप्रतिमोत्तमा ।
युष्मासु मणुभट्टानां वात्सल्यं चाप्यकृत्रिमम् ॥
युष्माकं मणुभट्टेषु मानदृष्टिरनुत्तमा ।
युष्मासु मणुभट्टानां मानदृष्टिरनुत्तरा ॥
ततः श्रीमणुभट्टानामाज्ञया निर्मितं मया ।
युष्मभ्यमर्प्यते श्रीमद्ध्रुवाभ्युदयनाटकम् ॥

तथा च

स्मारंस्मारमनन्यतुल्यमखिलं युष्मद्गुणानां गणं
वारंवारमनेकशोऽप्युपकृतीस्तास्ताश्च युष्मत्कृताः ।
युष्मभ्यं तु समर्प्य पुस्तकमिदं भक्तिप्रभावं दधत्
स्वात्मानं कृत्यकृत्यमद्य मनुते शङ्करजनोऽयं सदा ॥
तदङ्गीकृत्य कृत्यज्ञाः कृतकृत्यममुं जनम् ।
करिष्यथ सदा स्वीयं कृपापात्रं कृपार्णवाः ॥

विज्ञप्तिरियं भट्टमाहेश्वरतनुजन्मनः
शङ्करलालस्य ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

श्रीलीम्बडीनरेन्द्रप्रशस्तिः ।

श्रीमन्महेशदययाऽतुलया तथा श्री-
जश्वन्तसिंहनरपालमणेः प्रसादात् ।
श्रीलीम्बडीपुरपतित्वमवाप योऽत्र
श्रीमाञ्जयत्विह स दोलतसिंहभूपः ॥ १ ॥

संप्राप्य राज्यपदमौरसवत् प्रजाः स्वाः
संपाल्य यः प्रणयतो परमादरेण ।
जश्वन्तसिंह इव यो निखिलप्रियोऽस्ति
श्रीमाञ्जयत्विह स दोलतसिंहभूपः ॥ २ ॥

संधार्य राज्यधूरमात्मभुजद्वयाभ्याम्
श्री राजनीतिनिपुणः करुणासुधाब्धिः ।
संरञ्जयत्यखिलपौरनरान् स्वकीर्त्या
श्रीमाञ्जयत्विह स दोलतसिंहभूपः ॥ ३ ॥

संप्राप्य यश्च महिषीं शुभशीलशालाम्
पुत्रांश्च पञ्च सुगुणान् स्वगुणानुरूपान् ।
भूस्वर्गसौख्यमतुलं भजते य ईशः
श्रीमाञ्जयत्विह स दोलतसिंहभूपः ॥ ४ ॥

यस्योत्तमा लसति राज्यसभोत्तमश्री-
सामन्तमन्त्रिमणिभिः कविभिर्बुधैश्च ।
यः शौर्यधैर्यनिलयो गुणवान् गुणज्ञः
श्री माञ्जयत्विह स दोलतसिंहभूपः ॥ ५ ॥

संप्राप्य राज्यपदमल्पतरैर्दिनैर्यः
श्रीलीम्बडीपुरमतीव जरासुजीर्णम् ।
संप्राप्तयौवनधनामिव संस्करोति
श्रीमाञ्जयत्विह स दोलतसिंहभूपः ॥ ६ ॥

जयतु जयतु नित्यं लीम्बडीपूर्महेन्द्रः
स्वयमयमथ सूनो यौवराजः कुमारः
भवतु सुखनिमग्ना भूपतेः पुत्ररत्ना-
वलिरतिरमणीया श्रीमहेशप्रसादात् ॥ ७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

हे श्रीदौलतसिंह भूमिरमण प्राक्पुण्य पूर्णाम्बुधे
पुण्यैर्जीव चिरं सदा जय जय स्वैः पुत्रपौत्रैर्युतः ।
सामन्तैश्च सुमन्त्रिभिश्च सहितः सौख्याब्धिमग्नाशयः
श्रीकृष्णस्य दयादृशा भव सदेत्यभ्यर्थये श्रीपतिम् ॥ ८ ॥

महाराजश्रीरणजित्पाठशालैकशास्त्रिणः ।
इति शङ्करलालस्य प्रार्थना प्रति शङ्करम् ॥ ॥ ९ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रस्तावना ।

यां विनाऽखिलपुमर्थवर्धिनीं
नैकमप्यहमपि चाक्षरं क्षमः ।
मानवो लिखितुमत्र तां मुहु:
श्रीमहेशकरुणामुपास्महे ॥ १ ॥

श्रीमहेश्वरदयादृशा मया
श्रीध्रुवाभ्युदयनामनाटकम् ।
निर्मितं परपवित्रया त्वया
मण्डुमद्भिषजां महात्मनाम् ॥ २ ॥

तं विलोक्य परिपूर्णतां गतं
नाटकं ध्रुवचरित्रचित्रितम् ।
प्राप्नुवन् प्रणयसागराः परा-
नन्दमार्यमणयो दयार्णवाः ॥ ३ ॥

तेन मे सफलतां गतः श्रमः
स्वात्मनश्च कृतकृत्यता मया ।
मानितार्यहृदयानुवर्तनं
श्रेयसामनुपमं हि साधनम् ॥ ४ ॥

यावदद्य दिवसं न मुद्रितम्
मद्वैद्यवरमण्डुवल्लभम् ।
॥ श्रीध्रुवाभ्युदय नाम नाटकम्
हन्त विंशतिसमाः समाययुः ॥ ५ ॥

लिम्बडीपुरपुरन्दरो महौ-
दार्यधैर्यनिलयो दयामयः ।
दादभा इति शुभी गुणप्रियो
मण्डुमद्गुणविदुणाग्रणीः ॥ ६ ॥

भूपतिर्विजयतेऽथ तेन त-
न्नाटकं परमया मुदाङ्कितम् ।
मण्डुमद्मनसोऽतिवल्लभम्
वर्तते तदिति कारणाद्भुतम् ॥ ७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तद्विलोक्य विदुषां महात्मनां
भूसुजांश्च गृहिणां मनस्सु यत् ।
जायते सुखमिहास्य पुण्यभाग्
दादया भवतु लीम्बडीपतिः ॥ ८ ॥

प्रार्थयेऽनुदिनमित्थमादरात्
श्रीमदीश्वरमुमासहायिनम् ।
शङ्करं सकललोकशङ्करं
भक्तवत्सलमिहेन्दुशेखरम् ॥ ९ ॥

औदार्यार्जवधैर्यशौर्यकरुणा सौहार्दमुख्यान् गुणान्
निःसीम्नोऽनुपमान्निरीक्ष्य सहजान् श्रीमन्नृभर्तुः शुभान्
येनैतत्स्मरणाय नाटकमिदं सुप्रापितं प्रेमतः
स श्रीदौलतसिंहभूमिरमणो जीयात्सहस्रं समाः ॥ १० ॥

कर्ता
शङ्करलालः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीराजराजेश्वरो जयति ।

प्रशस्तिश्लोकाः ।

माता यस्य प्रणयवसतिः सूर्यबाख्याऽतिपुण्या
विद्वान् वैद्यप्रवरसुमणिर्यत्पिता विठ्ठलाख्यः ।
चत्वारोऽपि प्रथितयशसो भ्रातरो यस्य वैद्याः
सोऽयं कीर्त्याऽमर इह सदा झण्डुभट्टो महात्मा ॥१॥

पूर्णानन्दाद्यतिगणमणेर्लब्धसन्मन्त्ररत्नो
विद्वद्रत्नादथ निजपितुः प्राप्तसद्वैद्यविद्यः ।
यो योगज्ञोऽपि च निजगुरोः शङ्कराद्यस्वरूपात्
सोऽयं कीर्त्याऽमर इह सदा झण्डुभट्टो महात्मा ॥२॥

पत्नी यस्योत्तमगुणवती श्रीप्रभाकुंवराख्या
भट्टाभिख्योत्तमतमयशः श्रीमयारामपुत्री ।
पुत्रो यस्योत्तमगुणनिधिः शङ्कराख्यः प्रसादः
सोऽयं कीर्त्याऽमर इह सदा झण्डुभट्टो महात्मा ॥३॥

मान्द्यं नीतां मलिनकलिना वैद्यविद्यां सुहृद्यां
पुष्टां कर्तुं वररसयुता स्थापिता येन शाला ।
हृद्यैः सद्यः सुखकरतरैरौषधौघैः प्रपूर्णा
सोऽयं कीर्त्याऽमर इह सदा झण्डुभट्टो महात्मा ॥४॥

प्रेम्णा येनानुजगणमणिः श्रीमणीशङ्कराख्यः
शालाचार्यः कृत इह महासौख्यधाम्भोधरेण ।
अन्ये श्रीमन्नृपतिनिकटे स्थापिता भ्रातरः स्वाः
सोऽयं कीर्त्याऽमर इह सदा झण्डुभट्टो महात्मा ॥५॥

यः श्रीजामपुरीपुरंदरमहावैद्याधिराजोऽभवत्
यः स्वौदार्यमहोदधिः सुकरुणापूर्णान्तरङ्गः सदा ।
यो विश्वैकहितेच्छुरुत्तमगुणालङ्कार आप्ताग्रणीः
सोऽयं कीर्त्याऽमर इह सदा झण्डुभट्टो सदा ॥६॥

येनात्यन्तदयालुनाऽऽमयचयग्रस्ताः प्रणष्टाशया
दीनानाथतरा नरा अपि महामृत्योर्मुखान्मोचिताः
दत्त्वाऽमूल्यरसायनानि च पुनः पुष्ट्या युवानः कृताः ।
सोऽयं सद्यशसाऽजरामर इह श्रीझण्डुभट्टः सदा ॥७॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

येनानेकनृपार्पितातुलमहामानेन निर्मानिना
रङ्का रोगिण आत्मजानुजसमं संवीक्षिताः सादरम् ।
राजानश्च परेश्वरा इव मनोवाक्कर्मभिः सेविताः
सोयं सद्यशसाऽजरामर इह श्रीमण्डुभट्टः सदा ॥ ८ ॥

यस्यौदार्यमनन्यतुल्यमनिशं राजाधिराजस्तुतं
यस्मिन् विश्वहितेच्छुतापि च जगद्बन्धुत्वयुक्ता स्थिरा ।
सौहार्दं च यदीयमुत्तमतमं सारल्यमप्यद्भुतम्
सोयं सद्यशसाऽजरामर इह श्रीमण्डुभट्टः सदा ॥ ९ ॥

यस्यासीमतमा क्षमा सुहृदयाकारा दया निस्तुला
सौभ्रात्रं च यदीयमद्भुततमं चेतो वचोऽगोचरम् ।
कीर्तिर्यस्य च निर्मला विजयतेऽर्वाचीनधन्वन्तरिः
सोयं सद्यशसाऽजरामर इह श्रीमण्डुभट्टः सदा ॥ १० ॥

दुःखी दुःखितदर्शनेन करुणापूर्णाशयो योऽभवत्
यश्चात्यन्तसुखाब्धिमग्नहृदयो दृष्ट्वा सुखस्थान्नरान् ।
यः सर्वत्र च सर्वलोकहितकृद्यः सर्वसाहाय्यकृत्
सोयं सद्यशसाऽजरामर इह श्रीमण्डुभट्टः सदा ॥ ११ ॥

येनाजन्मत आपरेश्वरपदारोहं परेषां परं
श्रेयोऽकारि दयामयाशयतया चेतोवचःकर्मभिः ।
शम्भोर्भक्तिरनुत्तमा निरुपमा भक्तिश्च रामःकृता
सोयं सद्यशसाऽजरामर इह श्रीमण्डुभट्टः सदा ॥ १२ ॥

किमिति विबुधवर्या जल्पनैरत्यनल्पै-
र्नहि नहि नहि सङ्ख्या विद्यते तद्गुणानाम् ।
जयति जयति जीवत्येव मण्डुर्महात्मा
दिशि दिशि दिशि दृश्यो ज्ञानिभिर्ज्ञानदृष्ट्या ॥ १३ ॥

हृदयवचनकार्यैः श्रेय एवाखिलाना-
मरचयदचलात्मा यः स्वयं यावदायुः ।
अजरममरमद्धा कीर्तिकायं दधानो
जयति जयति सोयं मण्डुभट्टो महात्मा ॥ १४ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कैलासवासिमहाराजाश्रीजशवन्तसिंहजीशोकोद्गारपद्यानि ।

वर्षे रामरसांकभू १९६३ परिमिते मासे द्वितीये मधौ
शुक्ले पक्ष उमामहेशशरण: श्री सोमवारे गत:
कैलासं जशवन्तसिंहवसुधाधीशस्तृतीये तिथौ
गोकर्णाख्यमहाबलेश्वरमहाक्षेत्रे महाधीरधी: ॥१॥

भूत्वा विषादविषवृष्टिमयीं प्रवृत्तिं
हा तारयन्त्यखिलनाथरलेखतस्ताम् ।
दु:खोदधौ निरवधौ नहि के निमग्ना:
श्रीलीम्बडीपुरनरेन्द्रगुणानुरक्ता: ॥२॥

लीम्बडीपुरपुरन्दरे गते
श्रीमहेश्वरमुमासहायिनम् ।
सेवितुं शिवगिरिं गताऽधुना
सानु आपि स्थिता गुणज्ञता ॥३॥

जशवन्तनरेश्वरं विना
शिवभक्तप्रवरं गुणाकरम् ।
निखिलापि च लीम्बडीपुरी
परित: शून्यतमा विभाति न: ॥४॥

सितयज्ञविभूतिभूषितं
धृतरुद्राक्षगणातिसुन्दरम् ।
शिवपूजनतत्पराशयं
जशवन्तसिंहमिलाविलासिनम् ॥५॥

क्व पुनर्नयनाङ्गणातिथिं
करवाम प्रजयामृताम्बुधिम् ।
इति तन्मुखदर्शनातुरा:
रुदति रुदन्त्यत्र रुदन्ति नोत्तमा: ॥६॥

सा श्रीशङ्करभक्तिरुत्तमतमा सा वीरता धीरता
सा चात्यन्तगभीरताऽप्युपरता सासुजनताऽस्तं गता ।
स्वेष्टं देवमुमाप्रियं परशिवं साक्षात्समासेवितुं
प्राप्ते श्रीजशवन्तसिंहनृपतौ श्रीमन्महेशाचलम् ॥७॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मग्न: श्रीशिवभक्तिकल्पलतिकाधारोऽद्य कल्पद्रुम:
शुष्क: सौहृदधर्मसिन्धुरखिलानन्दप्रद: साम्प्रतम् ।
भक्त्याराधयितुं महेशमनिशं माहेश्वराग्रेसरे
प्राप्ते श्रीजशवन्तसिंहनृपतौ श्रीमन्महेशाचलम् ॥ ८ ॥

गोविप्रप्रियता स्वधर्मपरता शास्त्रज्ञता शान्तता
सा सा सर्वगुणज्ञता च गुणिता सा सा च सा नम्रता ।
याता हा प्रलयं महेश्वरमुमाकान्तं सदा सेवितुं
देवं श्रीजशवन्तसिंहनृपतौ कैलासशैलं गते ॥ ९ ॥

कृतैस्तैस्तै: पुण्यैरनुपमतमै: शम्भुभजनै:
प्रसादाच्छ्रीगौरीहृदयदयितस्य प्रतिदिनम् ।
गिरौ श्रीकैलासे परमशिवसामीप्यसुखभाङ्
महाराज: श्रीमान् भवतु जशवन्तसिंहनृपति: ॥ १० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रेयांसि श्रीगिरिवरसुताधीश्वरः श्रीश्वरोयम
दद्यादद्याशरणशरणो राजराजेश्वरो नः ।
यस्याश्रान्ता वितरति दयादृष्टिपीयूषवृष्टिः
श्रेयोवल्लीः शिवसुखफलैरानता आनतार्थम ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

पात्राणि

सूत्रधारः	नाटकाचार्यः
नटी	सूत्रधारगृहिणी
राजा	उत्तानपादः
सुनीतिः, सुरुचिः	महिष्यौ
ध्रुवः	सुनीतिसुतः युवराजः
उत्तमः	सुरुचिसुतः
विवेकनिधिः	अमात्यः
सुशीला, सुचरित्रा, अनसूया	सुनीतिसख्यः
द्वारपालः	द्वाररक्षाधिकृतः
अभ्यसूया, कपटकरण्डिका	सुरुचिसख्यौ
पिशुनापीडः, कपटकरण्डः	राज्यकिङ्करौ, अभ्यसूयासहायकरौ
परमहंसः	वेशधारी पिशुनापीडः
ब्रह्मचारी	वेशधारी कपटकरण्डः
पद्मकान्तः, शशिकान्तः	वैतालिकौ
निपुणिका, विचारवती, कपटपेटिका	राजदास्यः
नारदः	भक्तराजः देवमुनिः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कपिञ्जल:	नारदशिष्य:
मायासुनीति:	अभ्यसूयाकल्पिता मायामयी सुनीति:
श्री वासुदेव:	ध्रुवतपसा प्रसन्न: प्रभु: परब्रह्म
कुबेर:	यक्षकिन्नरादिदेवानां राजा
शङ्कुकर्ण:, मणिभद्र:	यक्षौ कुबेरकिङ्करौ
मल्लिका, वासन्ती	अप्सरसौ
मुनि:	मुनिवेशधारी कपटकराल:

अभ्यसूयया मन्त्रोत्पादिता भूतप्रेतपिशाचयक्षिणीडाकिन्यादयश्च

श्री ध्रुवाभ्युदयम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

पात्राणि

सूत्रधारः	नाटकाचार्यः
नटी	सूत्रधारगृहिणी
राजा	उत्तानपादः
सुनीतिः, सुरुचिः	महिष्यौ
ध्रुवः	सुनीतिसुतः युवराजः
उत्तमः	सुरुचिसुतः
विवेकनिधिः	अमात्यः
सुशीला, सुचरित्रा, अनसूया	सुनीतिसख्यः
द्वारपालः	द्वाररक्षाधिकृतः
अभ्यसूया, कपटकरण्डिका	सुरुचिसख्यौ
पिशुनापीडः, कपटकरण्डः	राज्यकिङ्करौ, अभ्यसूयासहायकरौ
परमहंसः	वेशधारी पिशुनापीडः
ब्रह्मचारी	वेशधारी कपटकरण्डः
पद्मकान्तः, शशिकान्तः	वैतालिकौ
निपुणिका, विचारवती, कपटपेटिका	राजदास्यः
नारदः	भक्तराजः देवमुनिः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कपिञ्जलः	नारदशिष्यः
मायासुनीतिः	अभ्यसूयाकल्पिता मायामयी सुनीतिः
श्री वासुदेवः	ध्रुवतपसा प्रसन्नः प्रभुः परब्रह्म
कुबेरः	यक्षकिन्नरादिदेवानां राजा
शङ्कुकर्णः, मणिभद्रः	यक्षौ कुबेरकिङ्करौ
मल्लिका, वासन्ती	अप्सरसौ
मुनिः	मुनिवेशधारी कपटकश्चः

अभ्यसूयया मन्त्रोत्पादिता भूतप्रेतपिशाचयक्षिणीडाकिन्यादयश्च

श्री ध्रुवाभ्युदयम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीगणेशाय नमः ।

श्री राजराजेश्वरो जयति ।

अथ

श्री ध्रुवाभ्युदयम् ।

श्रेयः श्रियै ध्रुवपदप्रद आशुतोषः
श्रीशः प्रणम्रजनतापरिपालकः स्तात् ।
ध्यातोऽपि यच्चरणयुग्मनखावलीचिंता-
रत्नावली दिशति चिन्तितमर्थसार्थम् ॥१॥

वागीश्वरी वसतु हंसवराधिरूढा
देवी दयार्द्रहृदया हृदयालये मे
वाचस्पतीयति जनोऽतिजडोऽपि यस्याः
प्रेमावलोकनसुधालहरीविलीनः ॥२॥

ते श्रीकेशवशास्त्रिणो गुरुवराः कारुण्यपूर्णाशयाः
शैवाग्रण्यतमाश्च तातचरणास्ते श्रीमहेशाह्वयाः ।
सोऽयं नः कुलदैवतं च भगवान् श्रीराजराजेश्वरः
सन्त्वस्मासु दयामृतार्द्रहृदयाः श्रेयस्करा सर्वदा ॥३॥

(नान्द्यन्ते)

सूत्रधारः — अयि प्राणप्रिये ! इतस्तावत् ।

नटी — (प्रविश्य) प्राणनाथ ! एषास्मि । आज्ञापयत्वार्यपुत्रः ।

सूत्रधारः — प्रिये ! अद्य खलु नयविनयविवेकाद्यखिलसद्गुणधाम्नो महाराजश्री-
॥ खाजीराजस्यागण्यपुण्यपूर्णाशयाया महापतिव्रताया दयार्द्रहृदयाया बाईश्री-
मोंचीबासंज्ञायाः सत्पुत्ररत्नेन प्रबलप्रतापेन निजप्रजाभ्युदयाभिवृद्धय एव
प्रतिदिनं प्रबद्धपरिकरेण महाराजश्रीव्याघ्रजिन्महीमहेन्द्रेण स्थापितायां महा-
राजश्रीखाजीराजपाठशालायां अध्यापकेन दिगन्तविश्रान्तसत्कीर्तिकल्पवल्ली-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पल्लवपरंपराणां शास्त्रज्ञतावरवर्णिनीस्वयंवृतपतीनां दैशिकवर्यश्रीकेशवशास्त्रिणां धर्मपुत्रेण महामाहेश्वराणां भट्टमाहेश्वराणां पुत्रेण शङ्करलालेन विश्वहितैषिणां जगद्बान्धवानां महाशयशिरोमणीनां वैद्यवर्य श्रीझण्डुभट्टनामाख्या निर्मितं श्रीध्रुवाभ्युदयं नाम नाटकं अभिनेतव्यं । ततः समयानुकूलसंगीतेन रञ्जय सभ्यजनमनांसि ।

नटी — नाथ ! महती खल्वियं भाग्यसंपत् । तथा हि

सद्वृत्तैकमतेर्ध्रुवस्य चरितं चेतश्चमत्कारकृत्
काव्यं सद्गुरुकेशवार्यकरुणापात्रस्य भव्यं कवेः ।
एतच्छङ्करलालशर्मण इहाराध्यश्च तेनाप्यसौ
सौहार्दामृतसागरो नरवरः श्रीझण्डुभट्टाभिधः ॥ ४ ॥

तदिदं गीयते

मत्तोऽयं मधुपो धुनातु सुरुचिं बालां लतां माधवीं
पूर्णप्रेमभराञ्जहात्यनुदिनं विस्मृत्य पूर्वां प्रियाम् ।
मामित्थं मनसा विचिन्त्य सहसा शुष्का ध्रुवं मालती
हा हा हंत भुवस्तले कुलभुवां सापत्न्यशल्यं महत् ॥ ५ ॥

(नेपथ्ये)

सत्यं सूत्रधारसीमन्तिनि ! सत्यं

हा हा हंत भुवस्तले कुलभुवां सापत्न्यशल्यं महत् ।

सूत्रधारः — (सचमत्कारं) प्रिये ।

करकलितकपोला लोचनाभ्यां स्रवन्तीं
कलिलसलिलधारां धारयन्ती मुखेन
इयमनुपदमुक्तश्वासशुष्काधरोष्ठी
विमुखनिजहृदीशा दृश्यतेऽसौ सुनीतिः ॥ ६ ॥

सापत्न्यदुःखदग्धाशयायास्तस्या एवैषमुक्तिः । तदेहि अनन्तरकरणीयाय सज्जीभवावः । (निष्क्रान्तौ)

(ततः प्रविशति सुशीलया सुचरित्रयाऽनसूयया च सख्योपास्यमाना सुनीतिः)

सुनीतिः — "हा हा हंत भुवस्तले कुलभुवां सापत्न्यशल्यं महत्"
(इति पठित्वा निश्वासं मुञ्चति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुशीला – देवी ! किमेवं धैर्यमुत्सृज्य कातरतरस्वान्ततां स्वीकुरुषे ।
सुनीतिः – हला सुशीले ! बहुकालमवलम्बितं धैर्यमिदानीं न धैर्य-
स्थैर्यमुपैति मानसं मे ।
सुचरित्रा – भर्तृदारिके ! स्नेहसम्भाविताः पशवोऽप्यनुकूलतां भजन्ते । किं
पुनर्मनुष्याः ।
सुनीतिः – हला सुचरित्रे ! कृतपूर्वमेतत्सर्वम् । शृणु –

कति कति न समर्पिता नु तस्यै
प्रियसखि मौक्तिकमालिका अमूल्याः ।
हृदयहरतराणि चाम्बराणि
प्रणयवशात् कतिनाम नार्पितानि ॥७॥

नैतावदेव

माता पिता च मम बंधुजनः समस्त-
स्तामेव तोषयति वस्त्रविभूषणाद्यैः ।
प्रीतिं च ते मदधिकां रचयन्ति तस्यां
हा हा तथापि सुरुचिर्मयि नानुकूला ॥८॥

अपि च

मणिमयमपि कङ्कणद्वयं मे
रुचिरतराणि च रत्नभूषणानि ।
सुरुचिहर्षकराणि हा सुरुच्यै
सविनयमाभरणमर्पितानि तस्यै ॥९॥

अहह न हि तथाप्यहो सुरुच्या
भवति मनागपि मानसं दयार्द्रम् ।
प्रियसखि ! वद किं करोमि धैर्यं
कथमिव धर्तुमहं भवामि शक्ता ॥१०॥

सुशीला – भर्तृदारिके ! वज्रादपि कठोराणि मन्ये मानिनीनां मनांसि । तेन
सुरुचिहृदयसदयतासिद्ध्यै कृतानि साधनानि निष्फलानि जातानि ।
तथापि तानि महाराजस्य हृदयं सदयं करिष्यन्त्येवेति मन्येऽहम् ।
सुनीतिः – हला सुशीले ! सुरुचिमनसैव मनुते सुरुचिदृशैव पश्यति सुरुचि-
श्रवणेनैव च शृणोति महाराज इति नाविदितं ते ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुचरित्रा — देवी ! यद्यपि वक्तुमयुक्तं तथापि न शक्नोमि वाचं नियन्तुमिति वच्मि । सकलसद्गुणभूषणे भूमितलभूषणे महाराजे दूषणमिदम् ।

सुनीतिः — हला सुचरित्रे ! नैतन्महाराजस्य दूषणं किन्तु ममैव दुर्दशायाः । यतः

आसीत्स कोऽपि समयोऽत्र ममापि यस्मिन्
प्राणप्रियैः प्रियतमाम करोन्निजां माम् ।
नैतावदेव सखि ! किन्तु स एव देवः
स्वप्नेऽप्यपश्यदपरां वनितां न क्वचित् ॥११॥

सुचरित्रा सुशीले — भर्तृदारिके ! युक्तमेतत् प्रथममनुतनुजन्मनो महाराजस्य । ततस्ततः ।

सुनीतिः — सख्यौ सांप्रतं तु दशाविपर्यास एव —
यस्य क्षणार्धमपि मद्विरहे तदासीत्
प्रेमामृतार्द्रमनसः सखि ! कल्पकल्पम् ।
मन्मन्दभाग्यवशतोऽद्य स एव देवो
मां न स्मरत्यपि च नैव शृणुते मदीयम् ॥१२॥

ततो ममैव दुर्भाग्यदुर्विलसितमिदं न महाराजस्य किमपि दूषणम् ।

सुशीला — शोभते तादृशी स्वभर्तरि भक्तिः सत्कुलकामिन्यास्ते । ततस्ततः ।

सुनीतिः — प्रतिदिनमनुवेलमादरेण
प्रणयरसैरभिसिंचिताऽपि नैषा ।
भजति सरलतां मितान्तवक्रा
नवलवलीव न चार्द्रतां शिलेव ॥१३॥

सुशीला — मा भजतु सरलतामार्द्रतां वा ततः का ते हानिः ।

सुनीतिः — हला सुशीले ! महती मे हानिः । कथमेवं वदसि ।

सुचरित्रा — महाराजे दृढप्रेम्णि किं तया चिंतया तव ।
महाराजेऽदृढप्रेम्णि किं कुर्यात्सरलाऽपि सा ॥१४॥

सुनीतिः — प्रिय सख्यौ ! महाराजप्रेमैव सांप्रतं सुरुच्याः सरलतां यत्नमार्द्रतां च ।
सारल्यं भजति न सा मयीह नित्यं
तेनैषा परिणतिरागताऽति दुःखा ।
या पत्युर्नयनसुधासमा समासे
सैवाऽहं नयनविषांजनत्वमाप्ता ॥१५॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(इत्युक्त्वा निःश्वस्याश्रूणि मुञ्चति)

सुशीला — देवी! तथापि किमेतया कातरतया। यदि प्रयत्नशतैः स्नेह-संभावितापि सा सारल्यमेव नावलम्बते प्राणप्रियश्च ते तदीयमाया-विवशाशयस्तर्हि का गतिः क उपायोऽन्यो निजप्राणप्रियप्रेमस्थेमसम्पादन-स्य। केवलं धैर्यमालम्ब्य मनसा वचसा कर्मणा च तयोः कल्याणमेवाभिलषित-व्यं, न स्वप्नेऽपि तयोरहितमाचरणीयं, स्थेयं च परमकृपालुपरमेश्वर-परायणान्तःकरणतया ततो दयार्द्रहृदयः स एव देवस्तावपि दयार्द्रहृदयौ कारिष्यतीति मतं मे।

सुनीतिः — हला सुशीले! अधीतपूर्वमवगतपूर्वं चैतत् सर्वं मे। अयमुपनीतानि च तथैव परिपाट्याद्यावधि सर्वाणि वर्षाणि प्राणप्रियविरहविषविषमाणि मया। परमिदानीं न धैर्यं धर्तुमस्मि शक्ता।

सुचरित्रा — किमद्य धैर्यध्वंसकारणमाधिकमुत्पन्नम्।

सुनीतिः — अथ किम्

व्यथयति न तथा मे मानसं मानभङ्गो
न च निजपतिपूजालाभभङ्गप्रसङ्गः।
पतिविरहसमुत्था नापदोऽन्या अनन्ता
वचनमिह यथा तत्कर्णशूलं सुरुच्याः ॥१६॥

सुशीला — प्रियसखि! किमभिहितं सुरुच्या यत्ते कर्णशूलतां प्राप्तम्।

सुनीतिः — (निःश्वस्य) किं तत्स्मरणेन तथापि यद्याग्रहो युवयोस्तर्हि निवेदयामि सा खलु प्रतिजज्ञे

यतते सुनीतिरेषा मारणमोहनवशीकृतीः कर्तुम्।
प्राणप्रिये स्वकीये निष्कपटे श्रीमहाराजे ॥१७॥

इति वदति तच्चकर्णपरम्परया मयेदानीं श्रुतं। तेनाद्य वत्सस्य ध्रुवस्यास्ति वर्षवृद्धिदिनमिति लिखितामप्येनां पत्रिकां न महाराजं प्रति प्रेषयितुमुत्सहे

(इति वदन्ती पत्रिकां सुशीलाहस्ते अर्पयति)

सुशीला — (विलोक्य) प्रियसखि सुचरित्रे! पश्येदं पत्रिकालेखनकौशलं प्रियसख्याः (पत्रिकां श्रावयति)

समुल्लसन्नु सौन्दर्यसुधासागरेभ्यो वपुःप्रभाप्रभावप्रहसित-
रतिवल्लभेभ्यो मे हृदयवल्लभेभ्यः संसारसर्वस्वेभ्यो
जीवितदैवतेभ्यः श्रीमहाराजेभ्यः प्रतिक्षणं प्रार्थितश्रीम-
द्विजयाभ्युदयाया महाराजचरणकमलकिङ्कर्याः सुनीत्याः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रणतिततिपुष्पाञ्जलयो मे। विज्ञप्तिश्चेयं मे दयार्द्रहृदयैः स्वहृदये धार्या। अद्य खलु वत्सस्य ध्रुवस्य वर्षवृद्धिदिनं तद्युष्माकमङ्कलालितं कुमारं ध्रुवमीक्षितुमाकांक्षा मे तन्निजपदपद्मपरिचारिकाया ममोपरि दयां कृत्वा सह प्रियस्वस्रा मे सुरुच्या समागत्य मन्दिरमलंकरिष्यथेत्याशा मे। न चैनामाशां कृपापीयूषराशयो यूयं निष्फलां करिष्यथेत्याशासे किं च

हृदयदयित जीवितेश युष्मच्चरणयुगं परदैवतं मदीयम्।
इह जगति किमस्ति सत्कुलानां पतिपदतः परदैवतं सतीनाम् ॥१८॥

ततो युवयोरागमनमङ्गलेन कुमारस्य ध्रुवस्य मङ्गलपरम्परामवश्यंभाविनीं मन्येऽहं। किं बहुना पल्लवितेन सर्वतःप्रनेभ्यो गुणज्ञमनोज्ञेभ्यो युष्मभ्यमिति विरम्यते प्रणामसहस्रार्पणपूर्वं श्रीमदीयपदपद्मपरिचारिकया मया। इति शिवम् सर्वेषाम् (पत्रिकामुद्रयन्ती)

देवी! किमर्थमियं विनयलेशसुन्दरा पत्रिका श्रीमहाराजसमीपे न प्रेषणीया। परस्परस्नेहसद्भावासहिष्णुर्लोकः कयाचित्कपोलकल्पितमपि ब्रूयात्ततो न तादृशस्य वचने विश्वासो विधेयः।

सुचरित्रा — यथाह सुशीला। भर्तृदारिके! इयमनसूयैवेमां पत्रिकां गृहीत्वा महाराजं प्रति गच्छतु।

सुशीला — आवामपि क्वचिन्निलीय महाराजस्य सुरुचेश्च पत्रिकाऽऽलोकनोत्तरलक्षणवचनानि श्रोष्याव:।

सुनीति: — यथाभिलषितं प्रियसखीभ्यः। किमु देवाह त्विदानीं सुरुचेः कपटघटनाभिः।

सुशीला — ततः साधयाम (इत्युक्त्वा पत्रिकां गृहीत्वा सुचरितानसूयाभ्यां सह निष्क्रान्ता)

सुनीति: — गता प्रियहितैषिण्यो मे प्रियसख्यस्तदहमपि वत्सस्याभ्युदयाय ब्राह्मणानां करोमि पूजनम् (निष्क्रान्ता)

———o———

(ततः प्रविशति निकुञ्जस्थितो महाराजः सुरुचिश्च)

सुरुचि: — प्राणनाथ! चञ्चलं हि पुरुषाणां प्रेयसीषु प्रेमेति लोकोक्तिर्न मृषा।

राजा — प्रिये! मृषारोपः खल्वयं पुरुषेषु। स्थिरतरप्रेमाण एव पुरुषाः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचिः — प्राणनाथ ! यद्येवं तर्हि न कयाचिन्मम मन्दिरं विहाय महाराजेन परस्या मन्दिरं गन्तव्यम् ।

राजा — कदा वा मया परस्या मन्दिरं तवानुमितिमन्तरेण गम्यते । तथापि यदेवं ब्रूषे सोऽयमसूयामहिमा ।

सुरुचिः — नाथ ! तेनानुगृहीतास्मि । साम्प्रतं हृदयभवनं मे संप्लावयत्यनसूया ।

(ततः प्रविशत्यनसूया)

अनसूया — जयतु जयतु महाराजः ।

राजा — स्वागतमनसूये ! किमर्थमागतासि ।

अनसूया — देव ! देव्या सुनीत्या पत्रिकेऽयं प्रेषितास्ति (महाराजहस्ते पत्रिका-मर्पयति)

राजा — (गृहीत्वा) अनसूये ! गच्छ द्राक्षामण्डपच्छायायां क्षणमुपविश तावद्वि-लोक्य पत्रिकां प्रत्युत्तरमेनां करिष्यामि ।

अनसूया — यथाज्ञा देवस्य (निष्क्रान्ता)

(ततः प्रविशतो लतान्तरिते सुशीला सुचरित्रे)

सुशीला — सुचरित्रे ! महाराजो माधवीमण्डपमलङ्कुरुते सहदेव्या सुरुच्या । दत्ता पत्रिकानसूयया महाराजाय । तदावामपि कदलीवने निलीय पत्रिकावलोक-नोत्तरं देवस्य देव्याश्च विश्रम्भालापितानि शृणुवः । (एवं कुरुतः)

राजा — (सादरं पत्रिकां सम्पूर्णां विलोक्य सहर्षाश्रुपातं सुरुचिहस्तेऽर्पयति)

~~सुशीला~~ — सुचरित्रे ! पत्रिकावलोकनोत्तरलक्षणसञ्जाता मुखप्रसन्नतैव राज्ञो हृदय-प्रसन्नतां निवेदयति ।

सुचरित्रा — सुशीले ! सत्यैवोक्तिस्ते तथापि सुप्रसन्नं सदेव राज्ञो हृदयं कलुषीकर्तुं प्रवृद्धपरिकरैवेयं सुरुचिर्महिषीव महिषी ।

सुरुचिः — (पत्रिकामनादरादवलोक्य पुनर्महाराजहस्तेऽर्पयति)

राजा — प्रिये ! सुनीत्याः किमप्यवर्णनीयमेव सारल्यमस्तीति मे मतिः ।

सुरुचिः — कथमिव ?

सुशीला — (स्वगतं) राजन्नेतावदपि जानासि चेत्कृतार्था मे प्रियसखी

राजा — प्रिये ! सा खल्वस्माभिरनादृताऽपि विमानिताऽपि न कयाचित् किमपि परुषं वदति नापि कयाचित् किमपि परुषं लिखति । यदा यदा कदाचित्किमपि लिखति तदा तदा च मृदुलं मधुरं प्रेमपीयूषसान्द्रमल्पा-क्षरमनल्पार्थं च लिखति ।

सुशीला — सुचरित्रे ! श्रुतं राजवचनम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुचरित्रा — श्रुतमेव । इदानीं श्रोतव्यं सुरुच्यावचनम् ।

सुरुचिः — (सवाष्पं) प्राणनाथ ! यद्येवं तर्हि तस्या एव गृहे स्थेयं प्राणनाथेन । किमर्थमसरलायाः परुषभाषिण्याश्च मे गृहे स्थीयते ? (निःश्वासं मुञ्चति)

सुशीला — सुचरित्रे ! पश्य परगुणश्रवणासहिष्णुतां सुरुचेः ।

सुचरित्रा — सोऽयमभ्यसूयासङ्गमहिमा ।

राजा — (समयाशङ्कम्) प्रिये ! किमेवं मुधा खिद्यसे । कदा वा मया देव्या विरुद्धमाचरितं गतं स्थितं हसितं वा यदेवं पत्रिकालेखप्रशंसामात्रेणाप्येवमौदासीन्यमावहसि ।

सुरुचिः — (सहर्षम्) प्राणनाथ ! नितान्तनिर्मलैव प्रायः स्वान्तवृत्तिर्भवति भवादृशां भव्यानां ~~येन~~ तेन स्वसदृशमेव सर्वं विलोक्यते ।

राजा — प्रिये ! स्फुटं कथ्यताम् ।

सुरुचिः — देव ! मृदुलमधुरभाषिण्यो भामिन्योऽतिकठिनस्वान्ताः भवन्तीति नाविदितं देवस्य ।

राजा — भवन्तु नाम ततः किम् ।

सुरुचिः — ततो मृदुलतरमधुरतरभाषिण्यां न महाराजेन विश्वासो विधेयः ।

राजा — प्रिये ! साऽपि त्वमिव पाणिगृहीता किमर्थं तस्यां विश्वासो न विधेयः ।

सुरुचिः — (सरोषमुत्थाय) अलं प्रश्नोत्तरपरम्परया स्वल्पैरेवाक्षरैर्वच्मि ।

सुनीतौ नैव विश्वासस्त्वया कार्यः कदाचन ।
विश्वस्तं त्वां भिद्त्वासु ध्रुवं राज्येऽभिषेक्ष्यति ॥१९॥

ततः परं यादृशी महाराजस्य मनोवृत्तिः ।

(रोषान्निष्क्रान्ता)

सुशीला — (स्वगतम्) धिक् पापे ! निष्पापायां सुनीतायामेवं पापारोपमाचर-
सुचरित्रा — न्त्यास्ते जिह्वाऽपि न विदीर्णा ।

राजा — गता सुरुचिः सुलभरोषा खलु सा आरभन्तराऽपि कुप्यति

अन्यद्वचांसि कथयन्ति हि हा सुरुच्याः
अन्यत्सुनीतिलिखितानि निवेदयन्ति ।
प्रत्येति नैव मम चापि मनस्तु तादृक्
पापत्वभाजनुरपापमतेः सुनीत्याः ॥२०॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुशीला – (स्वगतम्) युक्तैवोक्तिर्महाराजस्य ।

राजा – एहि अनसूये !

अनसूया – (प्रविश्य) देव ! एषाऽस्मि आज्ञापयतु ।

राजा – अनसूये ! वक्तव्या मद्वचसा देवी केनापि कार्यप्रसङ्गेन नाहं शक्ष्यामि देव्यामन्दिरमागन्तुं ततः कुमारो ध्रुव एवात्र सायं समये प्रेषणीयः ।

(इति वदन्निष्क्रान्तो राजा)

अनसूया – यथाज्ञादेवस्य । (निष्क्रान्ता)

सुशीला – सुचरित्रे ! श्रुतं श्रोतव्यं तदेहि प्रियसख्यै सुनीत्यै निवेदयावः ।

(निष्क्रान्ते)

———०———

(ततः प्रविशति सुनीतिः)

सुनीतिः – कृता वत्सस्य ध्रुवस्याभ्युदयाय ब्राह्मणानां पूजा । कथं नाद्याप्यागते सुशीलासुचरित्रे ।

(ततः प्रविशतः सुशीलासुचरित्रे)

सुशीला –
सुचरित्रे – जयतु जयतु देवी (इत्युक्त्वा प्रणमतः)

सुनीतिः – स्वागतं सख्यौ का प्रवृत्तिरुपलब्धा भवतीभ्याम्

सुशीला – देवि ! यद्यपि महाराजस्तु सरलतरस्वान्त एव तथापि सुरुचिकौटल्य-कलाकलापस्तं भ्रमयति ।

सुचरित्रा – धिक्कृतां महाराजस्य भामिनीक्रीडामृगताम् ।

सुनीतिः – दुर्विनीते ! स्तम्भय अतिचञ्चलं ते जिह्वाञ्चलं न मे रोचते महाराजनिन्दानिदानमेकमप्यक्षरम् ।

सुचरित्रा – देवि ! क्षन्तव्यं मे स्त्रीस्वभावलाघवस्खलितमिदम् ।

सुशीला – शोभते एवेदमनसूयाभिभाषमानमनसायास्ते ।

(ततः प्रविशत्यनसूया)

अनसूया – देवी ! देवस्तु केनचित्कार्यप्रसङ्गेन नात्रागन्तुं शक्तः कुमारो ध्रुव एव सायं समये मत्समीपे प्रेषितव्य इत्याज्ञाप्ताऽहं महाराजेन ततः परं देवी प्रमाणम् ।

सुनीतिः – सुशीले ! सुचरित्रे ! पत्रिकावलोकनोत्तरक्षण एव सदयहृदयेन भाव्यं देवेनेति भवत्योरनुमानं निष्फलं जातम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुशीला — देवि ! सत्यमेवावयोरनुमानम्, पत्रिकावलोकनोत्तरक्षण एव महाराजस्य हृदयं सदयं समभवत्, परं क्रूरतरकुटिलतमाशयया सुरुच्या

" सुनीतौ नैव विश्वासस्त्वया कार्यः कथञ्चन ।
विश्वस्तं त्वां निहत्याशु ध्रुवं राज्येऽभिषेक्ष्यति ॥ "

इति रोषात् दुर्वचस्युक्ते किंचित्संदेहदोलालोलाशयो भूत्वाऽनसूयामेव- माज्ञप्तवान् ध्रुवप्रेषणाय ।

सुनीतिः — (साश्रुपातं) सखि सुशीले ! सखि सुचरित्रे ! एतदेव तस्या वचो मे कर्णयोः शूलतामुपगच्छति ।

आरोपैर्विषमतमैरतुष्टचित्ता
तैस्तैः सा मयि निजकल्पितैरनेकैः ।
हा हा मां निजपतिघातपातकस्या
प्यारोपे क्षिपति करोमि किं व यामि ॥२१॥

(मूर्च्छां प्राप्नोति)

अनसूया — सख्यौ ? सुरुचिवचःश्रवणजन्यविषादविषावेशेन मूर्छिता देवी ।

सुशीला — नैतद्वचोऽल्पस्य विषादस्य निदानम् ।

सुचरित्रा — अथ किम् । महान्तमुत्पातमन्तरा न खलु कम्पते वसुधा । देवि समाश्वसिहि । (जलार्द्रया वीजयति)

सुशीला — (चंदनरसेनाभिषिञ्चति)

सुनीतिः — (संज्ञामुपलभ्य) " हा हा मां निजपति ...... इति पुनः पठति "

सुचरित्रा — देवि ! हर्षस्थाने किं खिद्यसे ।

सुनीतिः — कीदृशमिदं हर्षस्थानम् किमर्थं मृषाश्वासनेन मां खेदयसे ।

सुचरित्रा — नैतन्मृषाश्वासनम् । पराकाष्ठेयं दुःखानामतोऽतः परं सुखेनैव भाव्यमिति हर्षस्थानम् ।

सुशीला — देवि ! सुचरितायाः उक्तिरवितथैव मे प्रतिभाति ।

सुनीतिः — कथमिव ।

सुशीला — देवि ! तीव्रातपतापपातमन्तरा सकललोकजीवनस्य जीवनस्य क्व वा केनापि दृष्टिपथमुपनीता वृष्टिः ।

सुनीतिः — मृषारोपपरम्परासमर्पणपरायणान्तःकरणकुच्यां सुरुच्यां क्वैव सुखाशा मे ।

(अश्रूणि मुञ्चति)

सुचरित्रा — देवि ! स्वकीयासीमाप्रतिमतम महाशयतया सोढापरोधिजनापराधपरम्परेऽपि परमेश्वरो न सोढा नूनमिदानीमीदृशं मृषारोपरूपमपराधं तस्याः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुनीतिः — (दीर्घमुष्णं च निःश्वस्य) हा ! ततोऽपि मे का सुखाशा ?

सुचरित्रा — देवि ! ततस्तु

हृदयवाञ्छितैर्निजजीविते —
श्वशुरैते कर्मिबद्धधियः सदा ।
सकललोकसुखप्रद आशु ते
ध्रुव एवाभ्युदयः परिदृश्यते ॥२२॥

सुनीतिः — (ससंभ्रममुत्थाय नेत्रयोरश्रूणि चैलाञ्चलेन प्रमृज्य परितो विलोकयति)

(ततः प्रविशति सवयोभिर्विद्यार्थिभिः सहितो ध्रुवः)

ध्रुवः — मातुर्ध्रुवोऽहमभिवंदे ।

सुनीतिः — वत्स ! दीर्घायुर्भव ।

ध्रुवः — (सुनीत्या रुदिताश्रुतरलोचनमुत्साहविहीनं च मुखमवलोक्य सनिःश्वासम्)

मातर्विज्ञप्तुमिच्छामि किमप्यस्ति चेदाज्ञा ।

सुनीतिः — वत्स ! श्रोतुमुत्कण्ठितमेव मे श्रवणयुगलं त्वद्वचनरचनाम् ।

ध्रुवः — रुरुदिषा वदनाम्बुरुहस्य ते
सति सुते सति मादृश ईदृशी ।
भवति चेदिह तर्हि तु जीवितं
जनुरपीदमहो मम निष्फलम् ॥२३॥

दूरेऽस्तु वा बाल्यादकिञ्चित्करस्य निष्फलजन्मजीवितस्य मे वार्ता । तथापि

उत्तानपाद इह सर्वनरेश्वराणां
चूडामणिर्जयति जीवितवल्लभस्ते ।
यस्या अशेषवसुधावलयाधिनाथः
सा त्वं किमर्थमिह रोदिषि तन्न जाने ॥२४॥

किंच

तेषां कथं कथमिवाभ्युदयो जयो वा
श्रेयश्चयश्च भविता भुवि हन्त येषाम् ।
सन्तापतप्तमनसोऽश्रुकुलाकुलाक्ष्यो
मातर्नु मातर इहानुदिनं रुदन्ति ॥२५॥

तत एव

नयनकमलयुग्मान्निर्गलन्ती त्वदीया —
दविरतमिह धारा बाष्पवारामपारा ।
दलयति हृदयं मे क्षालयत्येव धैर्यं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जयति जयमशेषान् पूर्वपुण्यद्रुमान्मे ॥२६॥

(बाष्पकण्ठतयाधिकं वक्तुमक्षमो मातुश्चरणयोः पतति)

सुनीतिः — (स्वगतम्) न खलु मयेदानीं मदीयोऽयमौदास्यभारो वत्से निक्षेपणीयः क्षीरकण्ठतया चायमक्षमस्तादृशं दुःखभारं वोढुम् ।

सुशीला — सुचरित्रे ! पञ्चवर्षवयस्कस्याप्यस्याश्चर्यकरी मातृभक्तिर्ध्रुवस्य ।

सुनीतिः — (ध्रुवमुत्थाप्य गाढं परिरभ्य च प्रकाशम्) वत्स ! वत्सेन यदुक्तं तदखिलं युक्तमेव यद्यहं विषादाश्रुकुलाकुलाक्षी स्याम् । न पुनः हर्षाश्रुपूरपूर्णनयनायां मयि ।

ध्रुवः — (किञ्चित्समाश्वस्य) मातः किमिवाद्य तादृशं हर्षस्थानं येनेयं हर्षाश्रुवर्षतुलां भजति ते दृष्टिः ।

सुनीतिः — विदितमेव वत्सस्य यदस्त्यद्य ते वर्षवृद्धिदिनमिति ।

ध्रुवः — जानाम्येतत् ततः किम् ।

सुनीतिः — पुत्र ! सत्पुत्रगुणैरेव रत्नप्रसूत्वख्यातिमुपगतानां भवादृशसत्पुत्रप्रसूनां पुत्रजन्मदिनसमानमन्यन्न हर्षस्थानं ततोऽद्य पाठशालातः सुशीलैः सवयोभिः सहविद्याविनोदमग्नतयाऽविदितमार्गश्रममागच्छन्तं वत्सं विलोक्य लोचने मे हर्षाश्रुपूर्णे जाते । ततो न वत्सेन तद्विषयिणी चिन्ता विधेया ।

ध्रुवः — आर्ये सुशीले ! आर्ये सुचरित्रे ! युवयोः प्रियसखीयं मे जननी हर्षाश्रुवर्षिणी शोकाश्रुवर्षिणी वेदानीमित्यवितथं वदतम् ।

सुशीला —
सुचरित्रे — (स्वगतम्) साम्प्रतं सुनीतिसमाश्रितसरण्यनुसरणमेव नौ शरणम् (प्रकाशम्) वत्स ! भवादृशभव्यजनजननीनां हर्षाश्रूण्येव नयनयोः संभवन्ति न शोकाश्रूणीति नाविदितं ते ।

ध्रुवः — मातर्न चेन्नयनयोर्जलमार्तिजन्यं
धन्यं भवन्यमिह मन्य इलातले कम् ।
आज्ञावशंवदममुं जनमस्तशंक-
माज्ञापयास्म्यवहितो भवतीनिदेशे ॥२७॥

सुनीतिः — (साश्चर्यं स्वगतम्) अहो जातः सायंसमयः । तत् कुमारं महाराजसमीपे महाराजाज्ञानुसारेण प्रेषयिष्यामि । (प्रकाशम्) वत्स ! विदितमेवैतत्ते यद् गुरुजनाभिवंदनं हि मनुजानामखिलमङ्गलमङ्गलगणमूलमिति । तत्रापि सत्पुत्राणां पितृचरणास्तु परमं तीर्थं परमं सर्वस्वं परमं दैवतं च । तदद्यवर्षवृद्धिवासरनिमित्तं पितृचरणान् निखिलांश्चान्यान् गुरुजनान् सप्रणयं प्रणम्य पुनरानन्दयिष्यसि त्वद्वदनविलोकनलोलुपे लोचने मे ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ध्रुवः — यथाज्ञा मातृचरणानाम् । तथाविधायाविलम्बेन अम्बायाः पदपद्मयोः षट्पदायमानमात्मानं करिष्यामि । (उत्तिष्ठति)

सुनीतिः — वत्स ! विस्मृतमेकं मया वक्तव्यम् ।

ध्रुवः — अवहितोऽस्मि श्रोत्रयोः पारणां कर्तुं मातुरुपदेशवचनामृतेन ।

सुनीतिः — वत्स ! विदितमेव वत्सस्य यत्पितुः शतगुणा मातेति

ध्रुवः — वेद्म्येवैतत् सद्गुरुप्रसादात् ।

मातर्न तद्विषयिणी क्वपि कापि चिन्ता
कार्या त्वयाऽद्य विनयात्प्रणयाच्च मेऽस्या ।
पूर्वं प्रणम्य जननीं सुरुचिं ततोऽहं
मत्तातपादकमले प्रणतिं करिष्ये ॥२८॥

सुनीतिः — वत्स ! साधयतु भवान् गुरुजनाभिवन्दनाय । अहमपि भवदभ्युदयाभिवृद्धये श्रीमदपर्णाप्राणप्रियपरिचर्यां विधातुं गच्छामि

(सखीभिः सह निष्क्रान्ता)

ध्रुवः — (स्वगतम्) अन्तर्हिता मन्मङ्गलावलोकनलालसा मे माता । सुचरित्रयासुशीलया धृतसाध्वीयेऽपि न मन्मानसं मातृवचने प्रत्येति । मन्ये मातृमानसं मे किमप्यन्यादृशमेवौदास्यदास्यमङ्गीकुरुते । केवलं मा वत्सो मे मदीयदुःखदुःखितो भूयादिति विचार्य हर्षव्याजेन गोपितं निजं दुःखं मात्रा । अहो वात्सल्यप्रसरप्राबल्यं मातुः । चिरं विचार्यमाणे न दुःखनिदानं मातुः किमपि पश्यामि (सुचिरं विमृश्य) आः ज्ञातं । सापत्न्यशल्यमेव मातुर्मे सदयं हृदयमदयं दुनोति । नान्यद्धैर्यस्थैर्यविलासवसतेर्मातुर्मे धैर्यध्वंसकं किमपि पश्यामि (प्रकाशम्) वयस्याः सन्निहितोऽयं सायंसमयस्तन्मातृचरणानां पितृचरणानां च चरणाभिवन्दनं विधाय कृतार्थयाम्यात्मानम् ।

(इत्युक्त्वा सह सवयोभिः कुमारैः निष्क्रान्तः कुमारो ध्रुवः)

॥ इति श्रीमत्केशवकृपाकल्पवल्लरीपल्लवायमाने श्री ध्रुवाभ्युदयनाम्नि नाटके प्रथमोऽङ्कः ॥

श्री विठ्ठलात्मजनुर्बोर्द्विशशांकमौले
र्दासस्य वर्यगुरुकेशवधर्मसूनोः ।
एषा कृतिर्मम तु शंकरबालबन्धो-
र्गौरीगिरीशपदयोः कुसुमाञ्जलिः स्यात् ॥१॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

|| अथ द्वितीयोऽङ्कः ||

(ततः प्रविशति सोद्वेगा सुरुचिः)

सुरुचिः — (दीर्घमुष्णं च निःश्वस्य) हा! प्रयत्नपरंपरया परया समुत्पादिताप्यरुचिः सुनीतिविषया न महाराजहृदये स्थैर्यं भजते। न दर्शनसंबन्धो न स्पर्शसंबन्धो, न सम्भाषणसंबन्धो, न सहभोजनसंबन्धो वा महाराजस्य सह सुनीत्या। तथापि मत्कृततद्विषयाऽरुचिसमुन्मूलनकरं तु सुनीतिलिखितालौकिकलेखलालित्यरसायनमेव। तदतः परं सुनीतिपत्रावलोकनसंबन्धोपि कयापियुक्त्या समूलमुन्मूलनीय एवेति मे प्रतिभाति। तादृशे च महति कार्ये परमं कौशल्यं जागर्ति प्रियसख्या मेऽभ्यसूयायाः।

उन्मूलितानसूयां कदाभ्यसूयां विलोकयिष्यामि।
हृदयादविभिन्नायै कदाच दुःखं निवेदयिष्यामि ॥ (१)

(इत्युक्त्वा परिक्रामति)

(ततः प्रविशति अभ्यसूया)

अभ्यसूया — (स्वगतं) हा दैवयोगाद्विनापि दुःखं दुःखभागिन्यहम्। यतः
सुरुच्याः सहजस्नेहात्सर्वाः सुखमया दिशः।
दृष्ट्वा परेषामुत्कर्षं तथापि दुःखितास्म्यहम् ॥२॥ २

(दूरतो विलोक्य) अहो प्रियसखि मे सुरुचिरत्रैव दृश्यते।
तदेनामुपसर्पामि (अग्रतोगत्वा) जयतु जयतु देवी!
(इत्युक्त्वा प्रणमति)

सुरुचिः — हलाभ्यसूये। केन कारणेन म्लानमिदं ते मुखकमलम्। किं केनापि किञ्चित्तेपहृतं प्रणष्टं स्वयं कस्मैचन दत्वावानुतप्यसे।

अभ्यसूया — देवि! विदितमेव देव्या यत्परोत्कर्षश्रवणाद्दैमान्येव म्लानिमुपनयन्ति मुखकमलं ममेति। शृणु
न दत्तं न प्रणष्टं मे न च केनाप्यपाहृतम्।
किंतु श्रुत्वा परोत्कर्षं म्लानं मुखमिदं मम ॥३॥

सुरुचिः — सख्यभ्यसूये।
परहानौ परानन्दं परदुःखं परोदये।
बिभर्षि त्वमिव त्वं तल्लोकेऽसूयेति गीयसे ॥४॥ ५

अभ्यसूया — देवि! मन्मुखम्लानिनिदानं तु निवेदितं परं त्वन्मुखकमलम्लानिनिदानं श्रोतुमुत्कण्ठते स्वान्तं मे।

सुरुचिः — हलाभ्यसूये! त्वत्प्रियसख्या मम मुखकमलम्लानिमूलं कीमिवान्यच्छ्राविष्यति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अभ्यसूया — देवि ! परोत्कर्षप्रेक्षणमेव तवापि मुखम्लानिमूलं तर्हि कथय कस्योत्कृष्टतां निकृष्टतमां कर्तुमाकाङ्क्षते मनोवृत्तिर्देव्याः ।

सुरुचिः — श्लाघ्यसूये ! सुनीतिविषयाऽरुचिः परया प्रयत्नपरंपरया कृतापि न महाराजहृदये स्थैर्यं बध्नाति । तद्विषयका रुचिसमुन्मूलनकरं तु तल्लेखकौशलरसायनमेव ।

अभ्यसूया — देवि ! मा चिन्तां कुरु । नातःपरं तदीयं लेखं राजा विलोकयिष्यति तादृशं कमपि प्रयत्नं करिष्यामि ।

सुरुचिः — श्लाघ्यसूये ! तल्लेखविलोकनविषयिणी चिन्ता तु दूरापास्ता प्रियसखीवचनेन । परमन्या चिन्ता न मुञ्चति चेतो मे ।

अभ्यसूया — देवि ! जीवन्त्यां मयि किमिव देव्याश्चिन्तामूलम् । तामपि चिन्तां मयि निवेद्य निश्चिन्ता भव ।

सुरुचिः — श्लाघ्यसूये ! शृणु, निवेद्यते । अद्य मया सुनीतिलेखलालित्यावलोकनार्द्रहृदयं सदयं च नृपतिं विलोक्य रोषावेशात्किमप्यनुचितमुक्तम् ।

अभ्यसूया — किं तत् !

सुरुचिः — सुनीतौ नैव विश्वासस्त्वया कार्यः कदाचन ।
विश्वस्तं त्वां निहत्याशु ध्रुवं राज्ये निवेक्ष्यति ॥ ८ ॥
इति ।

अभ्यसूया — सूक्तमेवोक्तं ततः काचिन्ता ।

सुरुचिः — सखि ! मद्वचनश्रवणोत्तरक्षणे च राजा विचारनिमग्न इवाभूत् । तेन शंके सुनीतिर्मां हन्तुमिच्छतीत्यत्र किं प्रमाणमिति मां प्रक्ष्यति चेत्किमुत्तरं मया देयमित्यमेव चिंता ।

अभ्यसूया — इयमेव चिंता परा वा ?

सुरुचिः — नेयं स्वल्पा चिंता ।

अभ्यसूया — देवि ! ईषत्प्रयत्नोन्मूलनीयेयं चिन्ता ।

सुरुचिः — कथमिव ?

अभ्यसूया — गच्छामि तत्संविधानं विधातुम् ।

(निष्क्रान्ता)

सुरुचिः — अहो प्रियसख्या मे कपटघटनायां पटीयसी मतिर्या दुर्घटनामपि घटयितुं प्रभवत्येव । नक्तं दिनं च मदीयं हितमेव समाचरतीति न तदीयानुपकारान् कदापि विस्मरिष्यामि ।

अभ्यसूया — (पुनः प्रविश्य) जयतु जयतु देवी सुरुचिः ।

(प्रणमति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचि: — (साश्चर्यम्) प्रियसख्यभ्यसूये ! त्वरिततरमेव समागतासि। किं मच्चिन्तासमुन्मूलनसाधनं कृतमिति निवेदय।

अभ्यसूया — (सुरुच्या: कर्णे किञ्चिदुक्त्वा प्रकाशम्) एवमेवम् तया मया त्वया ताभ्यां च वक्तव्यम्।

सुरुचि: — यथा त्वं कथयसि तथा प्रोक्तेऽपि किं भविष्यति।

अभ्यसूया — युक्त्याऽनया मया देवि प्रोक्तया हितया तव।
सुनीतिविमुखो राजा त्वत्समीपमुपैष्यति ॥ ६॥

(ततः प्रविशति प्रतिहारिण्योपदिश्यमानमार्गो राजा)

राजा — प्रतिहारिणि ! स्वाधिकारमशून्यं कुरु।

प्रतिहारिणी — यथाज्ञा देवस्य।

(निष्क्रान्ता)

सुरुचि: — (राजानं प्रणम्य) प्राणनाथ ! चिराद्दर्शनदानेनानुगृहीतेयं दासी।

राजा — प्रिये ! कस्मिंश्चिद्विचारे व्यग्रचेतस्तया विलम्बेनाद्यागतोऽहं ते समीपम्।

अभ्यसूया — देव ! भवन्मुखचन्द्रदर्शनं विनापरिमितपरितापपात्रतां प्रयाति देव्या दृष्टिचकोरीति नाविदितं देवस्य।

राजा — विदितपूर्वमेवैतत्तथापि किं करोमि। विचारविवशतया विस्मृतं मया तत्सर्वम्।

सुरुचि: — प्राणनाथ ! कोऽस्ति तादृशो विचारो येन चरणपरिचारिण्यपीयं दूरीकृता देवस्य हृदयात्।

राजा — प्रिये ! त्वया "सुनीतिर्विश्वस्तं त्वां निहनिष्यतीति" त्युक्तम्। तद्विषयविचारणा भ्रमयति मनो मे। तद्ब्रूहि सुनीत्यास्तादृश आशयोऽस्तीत्यत्र किं प्रमाणम् ?

सुरुचि: — (स्वगतम्) हा ! यदशङ्कि तदेवापतितम् (दासीमभिमुखमवलोक्य) का समायाति ?

(ततः दासी प्रविशति)

दासी — जयतु जयतु महाराजः।

राजा — (दासीम्) अपरिचितपूर्वा कासि त्वम् ? कस्या असि दासी ? किमर्थं चात्रागतासि ?

दासी — देव ! देव्याः सुरुच्याः (इत्यर्धमुक्त्वा) सुनीत्याः पितृगृहादिदानीमेवागताहं। दासी च तस्या एवास्मि। प्रेषिता चाहं तयैवेमां पत्रिकां दातुम्।

राजा — (करं प्रसारयति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचिः — दासि! मद्धस्ते स्वार्प्यताम् ।

(इत्युक्त्वा करं प्रसारयति)

अभ्यसूया — (उत्थाय) दासि ! देहि मह्यमेवैमां पत्रिकाम् (इत्युक्त्वा करं प्रसारयति)

दासी — देवस्य देव्याः सुरुच्या वा हस्त एवेयं पत्रिकार्पणीयेति देव्याः सुनीत्या आज्ञा । ततो न तुभ्यमर्पयिष्यामि ।

अभ्यसूया — न देवो नापि देवी कस्यापि तस्याः स्पर्शं कारयिष्यति । अहमेव तां गृहीत्वा विलोकयिष्यामि । पश्चाद्देवी देवौ विलोकयिष्यतः ।

दासी — नाहं तुभ्यं मद्भर्तृदारिकाया आज्ञामुल्लंघ्य पत्रिकां दास्यामि ।

अभ्यसूया — जानामि भवत्या भर्तृदारिकायाः सर्वं कपटम् । तत एवैनां ग्रहीतुं ममाग्रहः ।

राजा — अभ्यसूये! किमर्थमेवं विवादं कुरुषे । समर्पयतु सा मम हस्ते देव्या हस्ते वा पत्रिकाम् ।

अभ्यसूया — देव ! नहि नह्येवं भविष्यति । प्रायोऽनभिज्ञं देवस्य चित्तं स्त्रीचारित्राणाम् ।

क्वचिदपि नहि कस्यापि विलोक्यं
दलमिह देवि नृदेव हे युवाभ्यां ।
सपदि परिहरन्ति जीवितं य —
द्विषरसमिश्रमसीरसाक्षराणि ॥७॥

(इत्युक्त्वा बलाद्दासीहस्तादाच्छिद्य पत्रिकां स्वयं समुद्घाट्य श्रावयति)

शृणोतु देवी देवश्च

"राजन् त्वयानसूयाद्वारायन्यह्यमुपदिष्टम् ।"

राजा — (स्वगतम्) नायं लेखः सुनीतेः ।

अभ्यसूया — देवि ! अंधीभवति चक्षुर्मे तथापि यथाकथंचिच्छेषं श्रावयिष्यामि ।

सुरुचिः — अपगम्यते शेषम् । परित्यज्यतां पत्रिका ।

अभ्यसूया — (नेत्रपीडामभिनयन्ती शेषं श्रावयति)

"न तेनापितुष्टचित्ता स्वदिष्टदृष्टिर्हि तिष्ठामि" ॥ ८॥

(एतावदुक्त्वा देवि चरमोयंप्रणाम इतिवदन्ती मूर्छयापतति)

राजा — (साश्चर्यम्) देवि ! किमेतत् ?

सुरुचिः — (सोत्प्रासम्) देव! प्रत्यक्षमेतत्प्रमाणं येयंदशा वशकाया अभ्यसूयाया जाता सैव दशा मम देवस्य चाभविष्यत् यदि समवालोकयिष्यावहि पत्रिकाम् (इति वदन्ती जलेनाभ्यसूयामभिषिञ्चति)

राजा — देवि । दम्भ एवायमभ्यसूयायाः । लेखोऽपि नायं सुनीतेरिति तदीया वाक्यनिष्ठुरतैव निवेदयति । तथापि यदि देव्या विश्चयः स्याद्धि पत्रिका—

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्राव्य इमेवावलोक्य निश्चयं कुर्याम् ।

(इत्युक्त्वा पत्रिकां हस्ते गृह्णाति)

सुरुचि: — (शीघ्रं समुत्थाय) नाथ! नाथ! किमेतत् । किं केनापि कदाचिदपि विषपरीक्षणं क्रियते ? (इत्युक्त्वा हस्तात्पत्रिकामाच्छिद्य तिलशो विदारयति)

अभ्यसूया — (क्षणात् प्राप्तसंज्ञेवोत्थाय) देव! किमयं सर्वोऽपि दम्भ एव ?

राजा — मास्तु दम्भः । परं मूर्छितया त्वया कथं मदुक्तं सर्वं श्रुतमिति मे सन्देहः ।

अभ्यसूया — देव । मूर्छागमसमयसमकालमेवोक्तं श्रूयत एव मूर्छितैरपि न परं वक्तुं शक्यते । तदिदानीं शान्तमूर्छा निवेदयामि सर्वम् ।

सुरुचि: — (सरोषम्) किमेतस्य निर्दयस्याग्रे निवेदनेन । निर्दम्भा विश्वासपात्रं प्रीतिपात्रं चाद्य सुनीतिरेव तस्य न वयम् । तदिदम् विशेषजल्पकल्पनात: ।

राजा — प्रिये! किमेतादृश आरोपोऽपि विना प्रमाणमङ्गीकर्तव्य: ?

सुरुचि: — प्रत्यक्षे प्रमाणे का प्रमाणान्तरापेक्षा ?

अभ्यसूया — देवि ! धीरा भव, धीरा भव, हृदयदयितस्याग्रे न सरोषया भाव्यम् ।

सुरुचि: — सर्वमेतद्युक्तं दयितायाः नादयितायाः ।

अभ्यसूया — समाश्वसिहि । समाश्वसिहि । निष्पापान्तःकरणो हि देवः । किंच श्रुतं देव्या शतशो नीतिशास्त्रे

प्रियं वा यदि वा द्वेष्यं शुभं वा यदि वाशुभम् ।
अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवम् ॥ ६॥

सुरुचि: — सति श्रोतरि वक्तव्यम् । कः शृणोति ते वाक्यम् ?

अभ्यसूया — मा शृणोतु तथापि मद्धर्मानुसारेण निवेदयिष्यामि ।

राजा — अभ्यसूये ! निवेदय निवेदनीयम् । श्रोतुमवहितोऽस्मि ।

अभ्यसूया — देव! न देवस्योक्तौ मे विषादः । दैवस्य चित्तं मां वध्यवर्ती मृषासूर्बापतितां च मन्यते चेन्मन्यताम् । परं महाकालिमन्दिरे स्थितं ब्रह्मचारिणं महाकालेश्वरालये स्थितं परमहंसं चाहूय तद्वृत्तं प्रष्टव्यं । ततः कुत्र दम्भोऽस्ति कुत्र न दम्भोऽस्ति का ते प्रियमिच्छति का चाप्रियमिच्छति का विश्वासार्हा का चाविश्वासार्हेति सर्वं स्फुटं भविष्यति ।

राजा — द्वारपाल !

द्वारपाल: — (प्रविश्य) आज्ञापयतु देवः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा — गच्छ । महाकालिमन्दिराद् ब्रह्मचारिणम् महाकालेश्वरमन्दिरात् परमहंसं समाहूय शीघ्रमागच्छ ।

द्वारपालः — यथाज्ञा देवस्य ।

(निष्क्रामति)

(ततः प्रविशतो द्वारपालेनानुगम्यमानौ परमहंसब्रह्मचारिणौ)

उभौ — जयतु जयतु महाराजः ।

राजा — (साञ्जलिबन्धम्) महाशयौ ! पीठद्वयमिदमलङ्क्रियतां महाशयाभ्याम् ।

उभौ — (स्वासने समुपविशतः)

सुरुचिः — साम्प्रतं युवाभ्यां किं विधीयते ?

उभौ — परमेश्वरीपरमेश्वरयोः पूजनं विधाय सर्वश्रेयस्कर महामन्त्रजपेन कालः क्षयं नीयते ।

अभ्यसूया — महाशयौ ! राज्ञामग्रे न कदाचिदप्यसत्यं वक्तव्यम् ।

उभौ — सत्यमेवोच्यते नासत्यम् ।

सुरुचिः — ब्रह्मचारिन् ! कुतस्त्वमागतः कदा चागतः ?

ब्रह्मचारी — देवि ! मासषट्कात् पूर्वं दक्षिणापथादागतोऽहम् ।

सुरुचिः — परमहंस ! भगवता कस्माद्देशादागतं कदा चागतम् ?

परमहंस — देवि ! मासचतुष्टयात्पूर्वमुत्तरापथादागतोऽहम् ।

अभ्यसूया — महात्मानौ ! सत्यं ब्रूतम् । केनोद्देशेन कस्याज्ञया च महाकाली महाकालेश्वरयोर्मन्दिरेऽनुष्ठानं विधीयते भवद्भ्याम् ?

उभौ — देव्याः सुरुच्या (इत्यर्धोक्ते) देव्याः सुनीत्या आज्ञया देवस्य देव्याः सुरुच्याश्च मारणाय मारणप्रयोगानुष्ठानविधानाय मन्दिरद्वये वृतौ स्वः ।

राजा — यदि मासषट्कान्मासचतुष्टयाच्चास्य मारणप्रयोगानुष्ठानं विधीयते तत् कथमद्यापि स प्रयोगो न फलितः ?

उभौ — कृते तादृशानुष्ठाने फलं भवेत् । यद्यपि सुनीत्या युवयोर्मारणायाज्ञप्तौ स्व आवां तथाप्यावाभ्यां तु युवयोः श्रेयस्कर एव मन्त्रजपः क्रियते ततः कथं विरुद्धं फलं स्यात् ?

सुरुचिः — प्राणनाथ ! परिज्ञात इदानीं सुनीतेराशयः ? वर्तते वा प्रमाणान्तरापेक्षा ? विचार्यतामभ्यसूया सदम्भा निर्दम्भा वा किं चावयोः सा हितैषिण्यहितैषिणी वेति ।

राजा — देवि ! दृश्यते श्रूयते च सर्वं तथापि चञ्चलं मे चेतः सन्देहदोलातो न मुञ्चति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचिः — (सरोषम्) यद्यद्यपि सन्देहदोलालोलं देवस्य चेतस्तर्हि सुखं सुनीतिसन्निधिरेवसेवनीयः । हन्ताहं निष्कपटा भवतः कपटप्रपञ्चेन । (इति वदन्ती नेत्राभ्यामश्रूणि मुञ्चति)

अभ्यसूया — भगवन्तौ ब्रह्मचारिपरमहंसौ गम्यताम् यथेष्टम् । देवस्य देव्याश्चास्या यथा श्रेय एव स्यात् तथा विधेयम् युवाभ्याम् ।

उभौ — अभ्यसूये ! देवस्य देव्याश्च कः स्वप्नेऽप्यश्रेयश्चिन्तयेत् ?

(निष्क्रान्तौ)

राजा — (सन्देहदोलारूढस्वान्तः क्षणं मौनमालम्ब्य तिष्ठति)

अभ्यसूया — देवि सुरुचे ! नाद्यापि देवस्य स्वान्तमस्मासु विश्वासं कुरुते तद्विषयान्तर एव प्रवेश इदानीमुचितः । सत्याग्रहो हि मिथोऽर्थं मूलतामुपयाति ।

सुरुचिः — सखि ! तथैव विधेयम् ।

राजा — (पुनश्चाह)

अधमाधमसङ्गेन परितापवतां सताम् ।
न विनोत्तमसंसर्गामृतं शान्तिर्भवेत् क्वचित् ॥१०॥

अभ्यसूया — देवि ! कुमारमुत्तमं द्रष्टुमुत्कण्ठते स्वान्तं देवस्य । तदेनमानयामि ।

(निष्क्रान्ता)

राजा — (स्वगतं) उत्तमजनसङ्गविषयमपि मद्वाक्यमभ्यसूयाया मनस्युत्तमकुमाररूपेण प्रतिफलितम् । भवतु तदपि प्रियं मे । यदाभ्यां सन्देहसमुद्रे निःक्षिप्तं स्वान्तं मे निर्दोषस्य तस्य वचनामृतैः क्षणमाश्वासयिष्यामि ।

(ततः प्रविशत्युत्तमः)

उत्तमः — (प्रविश्य) तात ! प्रणमाम्यहमुत्तमः ।

राजा — वत्स ! दीर्घायुर्भव । ब्रूहि वत्स ! पाठशालातः समागत्य वासरशेषं क्वातिवाहितम् ।

उत्तमः — अयि पितृचरणाः ! मम मातुः श्रीसुनीत्याः समीप एव दिनशेषमतिवाहितम् ।

राजा — वत्स ! किं त्वयि पूर्ववन्निर्विशेषं स्निह्यति माता ते सुनीतिः ।

उत्तमः — अथ किम् । पूर्वादभ्यधिकं मयि स्निह्यति सा । किं बहुना ?

यादृक् प्रेम न पश्यामि मम मातुर्मयि क्वचित् ।
यादृक् सुनीतिमातुर्मे मयि पश्याम्यनुक्षणम् ॥११॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचिः — हा धिक् ! पुत्रोऽपि मे मद्विरुद्धं वदति ।

राजा — वत्स ! ध्रुवादभ्यधिकं स्निह्यति त्वयि सुनीतिरित्येतद्विषये न प्रत्येति स्वान्तं मे ।

सुरुचिः — नाथ ! एषैव बालबुद्धिता बालस्यास्य । यस्याः कपटप्रेमप्रपञ्चपयोनिधौ भवादृशा अपि परिभ्रमन्ति का वार्ता तर्हि बालस्य ?

राजा — (निरुत्तरं तिष्ठति)

उत्तमः — (साञ्जलिबन्धमुत्थाय)

नहि नहि नहि मातर्वाच्यमेवं कथंचित् ।
त्वयि विलसति मातुः प्रेमबन्धः सुनीत्याः ।
य इह तमहमद्याशक्त एवास्मि वक्तुम्
मनसि कपटलेशोऽप्यस्ति नैवाम्ब तस्याः ॥१२॥

अपि च

मनसा वचसा कर्मभि-
र्ध्रुवयोः सा शुभमेव वाञ्छति
निजपुत्र इवानुवासरं
मयि च स्निह्यति सा शुभाशया ॥ १३॥

किं बहुना ?

अहं ध्रुवो ध्रुवश्चाहं भेद एवावयोर्न हि ।
ततः स्निह्यति सा नित्यं मयि ध्रुव एव ध्रुवम् ॥१४॥

सुरुचिः — अलमलमेतावता वाक्प्रपञ्चेन । वाचाट ! तूष्णीं तिष्ठ ।

राजा — वत्स उत्तम !

वचनरचनयानया त्वया तु
प्रकटितमुत्तममुत्तमत्वमद्य ।
मनसि वचसि कर्मणि स्वकीये
भुवि विरला हि भवादृशाः कुमाराः ॥१५॥

सुरुचिः — देव ! गम्यतां सुनीत्या एव मन्दिरम् । न मे त्वया तव पुत्रेण चामुना प्रयोजनम् । देवस्य तु स्वकीयहृदयपर्यापितावर्जनपराणि बालस्यास्य वचनानि कर्णयोरमृतायन्ते । अहो तस्याः कपटपाटवं वशीकरणशक्तिश्चाद्भुतैव । यथा पश्यन्नप्यन्ध इव शृण्वन्नपि बधिर इव संजायते जन्तुः । यथा खलु पापाशयया प्रतितीर्थं प्रतिक्षेत्रं प्रतिपर्वतं पुष्करं ब्राह्मणान् ब्रह्मचारिणः परमहंसानवधूतांश्च संप्रेक्ष्य संप्रेक्ष्य तद्द्वारा मारणमोहनवशीकरणोच्चाटनस्तम्भनादीनि नैकानि कार्मणानि प्रतिवा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मतिप्रयत्नपरंपरया विधीयन्ते । तस्यामपि सुनीत्यां देवस्य नाऽपि लेशोऽप्युत्पद्यते । निर्व्यलीकभक्तिभरनम्रायामपि मयि तु मन्दभाग्यादनुक्षणमधिकत्वयते ।

(विलपन्ती रोदिति)

राजा — किमेवमकारणं क्लेशाश्लेषं कुरुषे ? कदा वा मया त्वयि स्वच्छेऽप्यरुचिः कृता ? प्रतिदिनं प्रतियामं प्रतिघटिकं प्रतिक्षणं च त्वन्मनोऽनुकूलमेवाखिलमाचरत्यपि मय्येवं मृषारोषमारोपयन्ती पापादपि न बिभेषि ?

उत्तमः — मातर्मया तु यथानुभूतमखिलमुक्तम् । तथापि तद्धवणेन रोषश्चेदेष तिष्ठामि तूष्णीम् ।

सुरुचिः — उत्तम! देवस्तु यथानिजेच्छं कर्तुं प्रभुरेव । परं त्वया तु मदाज्ञया-तःपरं ध्रुवेण सुनीत्या वा सह संभाषणमपि न कार्यम् ।

उत्तमः — मातर्नैव कदाचिद्भविष्यति । शृणु

क्षीरे क्षिप्नोति यत्नेन मत्स्यो जीवेज्जलं विना ।
यथा तथात्र जीवेयमहं मातर्विमा ध्रुवम् ॥ १६॥

यदि तादृशीमपि दशां मे द्रष्टुमाकाङ्क्षा मातुस्तर्हि त्वदाज्ञापरतंत्र एवायं जनः (इत्युक्त्वा तूष्णीं तिष्ठति)

सुरुचिः — (सरोषावेशम्) धिग् रे यथाजात ! यथाजातत्वमेवात्मनः प्रकाशितं त्वयामुना वचनेन । यदि तादृश्येव ते ध्रुवे दृढा प्रीतिस्तर्हि न मे त्वया प्रयोजनम् । मुखमपि न मह्यं त्वया दर्शनीयम् । गच्छ गच्छ शीघ्रमनस्रमनुपसर सेवकवद् ध्रुवमेव सेवस्व ।

(इति वदन्ती नयनोरश्रूणि मुञ्चति रोषाक्रान्ता)

राजा — वत्स ! रोषावेशभङ्गिता ते माता । तदेहि वयमपि सायं संध्यामुपासितुं भवनोपवनवीथिकां गच्छामः ।

(उत्तिष्ठति)

उत्तमः — यथेच्छा तातचरणानाम् । इत इतस्तातचरणाः ।

(निष्क्रान्त उत्तमेन सह राजा)

—— : ० : ——

(ततः प्रविशति रोषावेशविवशा सुरुचिर्ध्रुवश्च)

ध्रुवः — (स्वगतम्) इदं तावन्मातुःश्रीसुरुचेर्भवनम् । एषा मे माता सुरुचिः केनापि कोपितेव लक्ष्यते । येन न मां निकटस्थमपि पश्यति । भवतु क्रमेण ज्ञास्यामि (प्रकाशम्) आर्ये दयामयाशये मातः! प्रणमत्ययं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चरणपरिचारकपरमाणुर्ध्रुवः ।

(इत्युक्त्वा प्रणमति)

सुरुचिः – (अनाकर्णितकेन) गच्छ, सेवकवद्ध्रुवमेव सेवस्व (इति वदति)

ध्रुवः – (साश्चर्यं स्वगतम्) कोऽयमपूर्वः कोऽपि मातुः संभ्रमः (प्रकाशम् चरणौ मातुर्गृहीत्वा) मातः प्रणमामि ध्रुवोऽहम् ।

सुरुचिः – (ससंभ्रमं ध्रुवं विलोक्य क्षणं लज्जयाधोमुखी स्थित्वा) वत्स ! वर्धि[?] ते स्वस्थतामनुभावयतु ।

ध्रुवः – ~~परम~~ (साञ्जलिबन्धम्) परमोऽयमनुग्रहः । मातः किमपि प्रष्टुमिच्छा मातुरस्ति चेदाज्ञा ।

सुरुचिः – पृच्छ । किमस्ति प्रष्टव्यम् ?

ध्रुवः – सेवकवद्ध्रुवमेव सेवस्वेति कः परिजन आज्ञप्तो मात्रा ?

सुरुचिः – तव मातैवायमुत्तमः ।

ध्रुवः – (कर्णौ पिधाय) हा किमिदमुक्तं मात्रा ?

मातर्बहिश्चराः प्राणा हृदयं वा ममोत्तमः ।
आवयोरेकरूपत्वात्सैव्यसेवकता कुतः ॥ १७ ॥

सुरुचिः – सर्वमेतदस्त्येव यावन्महीमण्डलमनुशास्ति महीमण्डलाखण्डलोयं ते । परं त्वयि तु नरेश्वरपदमधिगते तव सेव्यता मुत्तमेनेत्तमस्य च सेवक तावश्यं भाविन्येव ।

ध्रुवः – (पुनः कर्णौ पिधाय) हा ! हा । मातः किमिदममङ्गलमुच्यते । सहस्रं समनुशास्तु महीमण्डलमिदं तातचरण एव । न मे स्वप्नेऽपि नरेश्व पदस्पृहा भवति । दूरेऽस्तु वा नरेश्वरपदारोहणवार्ता –

परमेश्वरपदं चापि न त्वया नोत्तमेन च ।
न तातेन न मन्मात्रा विनारोढुं मम स्पृहा ॥ १८ ॥

सुरुचिः – (स्वगतम्) वशीकरणमंत्राक्षराणीवास्य वचनाक्षराणि कं कं न स्वव कुर्युः (प्रकाशम्) वत्स ! बालबुद्धिरेव ते । त्वन्मातैवैतद्विषये प्रस्त यतस्तस्याः कोऽप्यन्यादृश एव विचारः ।

ध्रुवः – मातर्मद्विचारविपरीतो विचारो न मन्मातुः स्वप्नेऽपि संभवेत् । कथञ्चिद् चेदुच्यताम् ।

सुरुचिः – कियदेव मयैतद्वक्तव्यम् ? वेत्ति सर्वं महाराजः । स एव सर्वं तुभ्यं कथयिष्यति ।

ध्रुवः – (प्रणम्य) मातः प्रसङ्गान्तरमेतत् । आज्ञापयतु माता तातचरणाभिवन्द गन्तुम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचिः – सुखं गम्यताम् ।

(निष्क्रान्तौ)

—:o:—

(ततः प्रविशति मार्गे गच्छन्ध्रुवः)

ध्रुवः – (स्वगतम्)

हा किं किमुक्तमधुनाश्रवणैकशूलम्
मात्रा मम प्रणयहीनमहो सुरुच्या ।
मन्ये न सा सुरुचिरस्त्यथवा तयोक्त-
मन्यन्मया श्रुतमिहान्यदिवाद्यमोहात् ॥१८॥

अथवा किं तया चिन्तया ? तातचरणेभ्यः सर्वं ज्ञास्यामि ।

(अग्रतो गत्वावलोक्य)

अहो अत्रैवास्थानमण्डपे भद्रासनमलङ्कुर्वन्त्युत्तमेन सह तातचरणाः ।
तत्समीपमुपसर्पामि ।

(समीपं गत्वा) तातचरणा ध्रुवोऽहमभिवन्दे ।

(प्रणमति)

राजा – वत्स ! दीर्घायुष्मान् भव ।

उत्तमः – (पितुरङ्कादुत्थाय भद्रासनादवतीर्य ध्रुवं प्रेम्णालिङ्ग्य करेण करं गृहीत्वा च पितुः समीपमुपनयति)

राजा – (ध्रुवं दक्षिणाङ्के वामाङ्के चोत्तमं निवेशयति । पुत्रद्वयालिङ्गनसुख-माभिनीय)

पुत्रौ ! विषादविषदग्धानां महाव्याधिवशात्मनाम् ।
अप्यमन्दानन्दकं स्यात्सत्पुत्रालिङ्गनं नृणाम् ॥२०॥

ध्रुवः – सोऽयं स्वभावसिद्धस्य वात्सल्यस्यैव प्रभावः ।

राजा – वत्स ! सुखाद्व्यतीतं वर्षपूर्तिदिनं ते ?

ध्रुवः – श्रीमतां कृपया सुखमयमेव व्यतीतम् । परमिदानीम् परम कृपा प्रपाया मन्मातुः श्रीसुरुच्याः किमपि दुःखदं वचः श्रुत्वा खिद्यते मे चेतः ।

(ततः प्रविशति सरोषा सुरुचिः)

सुरुचिः – (स्वगतम्) हा मूढया मया किमेतत्कृतं यद्ध्रुवो महाराजसमीपं प्रेषितः । स तु निसर्गमधुरैर्मृदुलैश्च वचोभिर्महाराजस्य मनः स्ववशं करोत्याति । (अग्रतो गत्वावलोक्य च) हा धिक् ! धिक् ! ध्रुवस्तूत्तम इव महाराज-स्याङ्कमाक्रम्य तिष्ठति । तत्रापि ध्रुवं दक्षिणाङ्के वामाङ्के चोत्तमं निवेशयता महाराजेनापि ध्रुवे ध्रुवा प्रीतिः प्रकाशिता । हा दहति मे हृदयं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दृष्टिश्च। हा कथं शक्नुयामीदृशमसमञ्जसं द्रष्टुम्। हा अभ्यसूये। हतासि।
निष्फलाश्च ते सर्वा अपि युक्तयः। भवत्विदानीं परम एवोपाय आश्रयणीयः।
(इति विचार्य समीपमुपेत्य)

धिग् रे ध्रुव! धिक् ते बुद्धिं यदेवमनारोहणीयमपि पदमारुह्य न लज्जसे।

ध्रुवः — (साञ्जलिबन्धम्) दयामयाश्चर्ये मातः! कथमिव वात्सल्यविवशाश्र-यानां पितृचरणानामङ्कः पुत्राणामनारोहणीयः?

सुरुचिः — रे दुष्ट, मयापि सह प्रश्नोत्तरपरम्परां कर्तुं धृष्टतामुरीकुरुषे?
(इत्युक्त्वा करेण गृहीत्वा ध्रुवमङ्कादधः पातयति)

ध्रुवः — (साञ्जलिबन्धम्) दयामयाश्चर्ये मातः! कथमिव वात्सल्यविवशाश्र-यानां पितृचरणानामङ्कः पुत्राणामनारोहणीय

ध्रुवः — (प्रबद्धाञ्जलिः प्रणम्य) मातः क्षन्तव्योऽयमविवेकजन्योऽपराधो मे।

उत्तमः — (सत्वरं स्वयमङ्कादवतीर्य) मातर्मातः किमेवं निरपराधस्यापि ध्रुवे रोषं कुरुषे? यथा मम तथैवास्यापि तातचरणाङ्काधिरोहणाधिकारोऽस्ति ततः किं तेनापराद्धम्?

सुरुचिः — मूढ! बाल्यान्न किञ्चिज्जानासि। सुरुचिपुत्रस्यैवैतत्पदारोहणाधिकारो नापरस्य।

ध्रुवः — मातस्तर्हि ममाप्यधिकारस्तुल्य एव। यत उत्तमस्येव ममापि त्वं माता। अहमपि तवैव पुत्रः।

सुरुचिः — (किञ्चिद्विहस्य) मूढ! सैवेयं ते बालबुद्धिः। न खलु त्वं ममोदरात्पुत्र इवोत्पन्नोऽसि। तत एव न तवैतत्पदारोहणार्हता। यदि त्वमप्युत्तम इवैतत्पदमारोढुमाकाङ्क्षसे तर्हि तपोभिः परमेश्वरमाराध्य तत्प्रसादान्मदुदराज्जन्म गृहीतव्यम् त्वया।

उत्तमः — मातः किमेवमुच्छृङ्खलमुक्त्वा दयार्द्रहृदयाया मातुः सुनीत्या अपि मेऽपमानमर्पयसि?

सुरुचिः — तस्याः कृत्यान्येव तस्या अपमानं कुर्वन्ति नाहम्।

उत्तमः — कानि तस्यास्तादृशानि कृत्यानि?

सुरुचिः — सा खल्वनेकव्रतयतिततिद्वारा स्वपतिं मारणमोहनवशीकरणादीनि कार्मणानि क्रूराशया कारयति।

ध्रुवोत्तमौ — (कर्णौ पिधाय सचकितम्) हा किमिदमादिमनुवंशवधूवदनानर्हं प्रलपति माता नौ।

सुरुचिः — तत एवातिदुर्भगापास्तस्या अयं पुत्रो ध्रुवो न नृपालसिंहासनारोहणार्हः।

ध्रुवः — (सास्रं साञ्जलिबन्धम्)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मातर्मतिर्विरम विरमातःपरं न क्षमा मे
प्राणाः श्रोतुं वचनरचनामीदृशीं तावकीनां।
तस्मै बद्धाञ्जलिरयमलं रुष्यसेऽहासनाय
स्वस्ति स्तात्ते भवतु कुशलं राजकीयच्छलेभ्यः ॥२१॥

मातेयं मे सुरुचिः क्रूराशयं मन्दभाग्यं च मां शतवारं शपतु। न तेन मे कश्चित्सन्तापः। परं तु तदुक्तं मन्मातृनिन्दानिधानमेकमप्यक्षरं श्रोतुं नाहं शक्नोमि। अयि कृपामृतप्रपायमानमानसा स्तात चरणाश्चरमो- ऽयं मन्दभाग्यस्य ध्रुवस्य प्रणामः।

(इत्युक्त्वा निष्क्रान्तुमिच्छति)

उत्तमः — (सास्रं) आर्य! आर्य! किमिदमारब्धम्? किं परिजनपराङ्मु- खोऽयं जनः परित्यज्यते?

वने वा राजभवने त्वयैव सह मे स्थितिः।
मातृनिन्दाश्रवणजं दुःखं तु तुल्यमावयोः ॥२२॥

(इत्युक्त्वा ध्रुवमालिङ्गति)

ध्रुवः — वत्स! वत्स! मुञ्चताम्। त्वमपि मातुः सुरुच्याः कोपपात्रं मा भूयाः।

यदि सुरुचिविभिन्ना क्वापि दैवाद्विदूयात्
प्रणयमयसुनीतिं दुर्भगां मातरं मे
तिलश इह तु तस्या हा रसज्ञां विधातुं
स्वयमहमभिलषे किं सुरुच्यां करोमि ॥२३॥

तत्त्वमपि यथा मातेयं नौ सुरुचिः परितुष्येत्तथा वर्तस्व। तेनैव मे परितोषो न सहगमनेन।

उत्तमः — (सास्रं) न मोक्ष्यामि। सहैव त्वया समागमिष्यामि।

(इति वदन् मुञ्चति)

ध्रुवः — वत्स!

मुञ्च मुञ्च मनस्तापं त्वमिव त्वं प्रियोऽसि मे।
मूर्तं वा हृदयं त्वं मे प्राणा वा मे बहिश्चराः ॥२४॥

सुरुचिः — (उत्तमं करेण करे गृहीत्वा कर्षन्ती) रे मूढ! किममुं कल्पवृक्षमिव विश्रब्धमाश्रितोऽसि? मुञ्चामुं दुर्विनीतं। यो मामपि कण्टकेनेव (?) मायया.. । (इति वदन्ती ध्रुवादुत्तमं विश्लिष्टं करोति)

ध्रुवः — (बद्धाञ्जलिः) मातर्! यादृशस्तादृशो दयनीय एवायं जनः।

(इति निष्क्रान्तः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचिः – देव ! दृष्टं षड्वर्षवयस्कस्याप्यस्य रोषावेशविलसितम् ?
रोषावेशविवशोऽयम् -

मां च त्वां चोत्तमं चापि कथमाधिन्मातुरीर्ष्यया ।
हनिष्यत्येव तद्धीप्यं विदेशं प्रेष्यतामयम् ॥ २५ ॥

राजा – प्रिये ! प्रातर्मन्त्रिभिः सह विचार्य यथा त्वदिच्छं करिष्यामि । प्रयातसार्द्धयामा यामिनी तच्छयनगृहमेव गन्तुमिच्छामि ।
(उत्तिष्ठति)

प्रतिहारी – इत इतो देवी देवो कुमारश्चागच्छन्तु ।
(इति वदन्ती शयनगृहं नयति)
(निष्क्रान्ताः सर्वे)

इति श्रीमत्सद्गुरुकेशवकृपाकल्पवल्लरीपल्लवायमाने श्रीध्रुवाभ्युदयनाम्नि नाटके द्वितीयोऽङ्कः ॥

यस्य प्रेमकुमारिका सुजननी श्रीमोंघिबाम्याभिधा ।
श्रीमाहेश्वरभट्ट उत्तमभट्टमहाश्वेराग्र्यः पिता ॥
श्रीमत्केशवशास्त्रिणश्च गुरवो मित्रं जटाशङ्कर-
स्तस्येयं कृतिरास्तु तुष्टये तया श्रीमान्सदा शङ्करः ॥ १ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ अथ तृतीयोऽङ्कः ॥

(ततः प्रविशति सुशीलासुचरित्राभ्यां सखीभ्यामुपास्यमाना सुनीतिः)

सुनीतिः — सख्यौ ! चिरान्महाराजदर्शनार्थं गतोऽपि वत्सो मे ध्रुवो नाद्यापि प्रतिनिवृत्त इति वेपते मे हृदयम् ।

सुशीला — भर्तृदारिके ! किमलीकशङ्काकरणे कारणम् ?

सुनीतिः — दक्षिणाक्षिस्फुरणमेव ।

सुचरित्रा — देवि ! समाश्वसिहि । कथमेवमप्यधीरधीः संवृत्तासीदानीम् ।

सुनीतिः — सख्यौ !

अनिमित्तमनोऽतितापतो
हृदयस्याप्यनिमित्तकम्पतः ।
विपदं कलयाम्यदूरतो
विषमां कामपि मामुपस्थिताम् ॥१॥

उभे — (सहासम्) उत्तानपादो राजर्षिर्यस्यास्ते जीवितेश्वरः ।
ध्रुवश्च तनयस्तस्याः कुतः स्वप्नेऽपि ते विपत् ॥२॥

ततो मा मृषाशङ्कातङ्काकुलं स्वान्तं कुरु ।

सुनीतिः — सख्यौ ! किं करोमि ?

क्षणमात्रवियोगोऽपि वत्सस्यात्र ध्रुवस्य मे ।
अनेकाकुशलाशङ्काकुलतां कुरुते मयि ॥३॥

(ततः प्रविशति ध्रुवः)

ध्रुवः — मातर्ध्रुवस्यायं प्रणामः ।

सुनीतिः — वत्स ! प्राप्ताभिलाषो भूयाः ।

ध्रुवः — मातस्त्वत्समर्पिताशिषां सफलीकरणं त्वदायत्तम् ।

सुनीतिः — वत्स ! अतीवगम्भीरार्थं वचस्ते तत्स्फुटं कथय ।

ध्रुवः — यथाज्ञा मातुः । स्फुटं विज्ञापयामि । ममाभिलाषप्राप्तिर्भगवत्प्रसादमन्तरा दुर्लभा । भगवत्प्रसादश्च तपश्चरणमन्तरा दुर्लभः । ततस्तपश्चरणं कर्तुं मात्राज्ञप्तमात्मानमिच्छामि ।

सुनीतिः — वत्स ! तत्खलु वत्सेनान्त्ये वयसे कर्तव्यम् नेदानीम् ।

विद्या अधीत्य सकलाः सकलास्त्वदीयाः
पूर्वे वयस्यथ कुलीनवधूसहायाः ।
ते पूर्वजा गृहसुखान्युपभुज्य चान्ते
सर्वं विहाय तपसे प्रययुर्वनान्तम् ॥४॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

त्वयापि तथैव कार्यम् ।

ध्रुवः — मातर्न तेषां सुनीतिर्जननी । सुनीतिपुत्रस्तु बाल्य एव तपसे प्रबद्धपरिकरः ।

सुनीतिः — वत्स ! काऽहं वराकी, गङ्गायमुनासरस्वतीसदृशीभ्यो जननीभ्यो लब्धजन्मानोऽपि चरमे वयस्येव तपः कर्तुं प्रवृत्ताः ।

ध्रुवः — मातः सन्तु नाम तेषां त्वत्तोऽपि सहस्रगुणाधिकगुणा जनन्यः । परं ममेव तेषां सुरुचिसदृश्युपमातासीत्किम् ? नासीदेवेति निर्विवादम् ।

सुनीतिः — वत्स ! किम् मां वृथा सन्तापयसि ? यद्वक्तव्यं तत्स्फुटमेव वद ।

ध्रुवः — यद्येवमास्तां तर्हि श्रूयताम् ।

यदि राज्यपदे वाञ्छा तर्हि तप्त्वा तपोऽद्भुतम् ।
सुनीतिजां तनूं त्यक्त्वा सुरुच्यास्तनयो भव ॥५॥

इत्युक्तं मात्रा सुरुच्या । तत एव तपसे तपोवनं गन्तव्यम् मे ।

सुनीतिः — हा हतास्मि ।

(इति वदन्ती मूर्च्छया पतति)

सुशीला, सुचरित्रे — देवि ! समाश्वसिहि समाश्वसिहि ।

(इति वदन्त्यौ व्यजनाभ्यां वीजयतः)

ध्रुवः — मातः किमेवं कातरतरतां बिभर्षि ?

सुनीतिः — (संज्ञामुपलभ्य) वत्स ! कथं न कातरतरतां बिभर्मि ? किमिव धैर्यधारणे कारणं पश्यसि वत्सः ।

ध्रुवः — अयमेव त्वाङ्घ्रिपद्मयुग्म-
भ्रमरः किं ध्रुवमत्र न ध्रुवस्ते ।
धृतिधारणकारणं विमर्श
धृतिमुन्मुच्य मुधैव्यपहो विषादम् ॥६॥

सुनीतिः — वत्स ! त्वं खलु बालः करुणापात्रं च मे । न मे धैर्यधारणकारणम् ।

ध्रुवः — मातः पश्याम्येव परमपि धैर्यधारणे कारणम् । स्वस्तु शृणु

सोऽयं देवो हृदयदयितः श्रीसुधासिन्धुजाया
दीनानाथप्रणतजनतावत्सलो विश्वभर्ता ।
येनानेके तरुणकरुणालोकनैः रङ्करङ्का
अप्युव्यास्ते जलधिपरिखोर्वीमहिता एकनाथाः ॥७॥

अशरणशरणं तं विहाय किं वान्यद्धैर्यधारणे कारणमन्वेषणीयम् ?

सुनीतिः — (स्वगतम्) हा ! वात्सल्यविवशयाऽहं किमेतत्करोमि येन मत्कर्तव्ये वत्सेन विप्रीयते (प्रकाशम्) वत्स ! एवमेवैतत् ।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जागर्त्येव जगत्यनन्यशरणान् दीनान् विहीनान् गुणै-
र्लीनांश्चापि विपद्विषोदधितले सर्वान् स्वकीयान् जनान् ।
उद्धर्तुं करुणामृतार्द्रहृदयो देवोऽत्र येन भ्रमाद्
ग्राहार्तः परिमोचितो गजपतिः श्रुत्वैव दीनां गिरम् ॥ ८॥

अपि च

न पश्याम्यन्यं श्रीहृदयदयितादीश्वरसुहृदो
दयाब्धेर्दीनार्तप्रणतजनवात्सल्यविवशात् ।
महाविष्णोरस्मिन् जगति भवतो दुःखदलनं
ततस्तं त्वं वत्स श्रय भयमपास्य प्रयततः ॥ ९॥

इति मतं मे तथापि तवः ध्रुव च तावकं वपुः
कमलाद्व्यधिकं सुकोमलम् ।
गृह एव ततोऽत्र सेव्यताम्
प्रणतार्तप्रणयी प्रियः प्रियः ॥ १०॥

ध्रुवः — मातर्भगवदाराधनमध्यनसमर्जनसाधनं तु तपोवनं न भवनम् । तत्तपोवन-
मेव गन्तुमिच्छामि ।

सुनीतिः — तुष्यत्यमलया भक्त्या भगवान् भक्तवत्सलः ।
वने वा भवने वापि तस्मात्रैव तं प्रसुम ॥ ११॥
उत्तमस्तूत्तमं शल्यं प्रशास्तु शरदां शतम् ।
त्वन्मुखालोकनसुखं साम्राज्याधिकं मम ॥ १२॥

किं च

विना त्वया मरिष्यामि शफरीव विनाम्बुना ।
मा याहि, वत्स ! मा याहि मा याहि तपोवनम् ॥ १३॥
(इति वदन्ती पुनरुद्दिशति)

सुचरिता — समाश्वसिहि, देवि ! समाश्वसिहि

सुनीतिः — (संज्ञामुपलभ्य) वत्स ! भवदभ्युदयाय भक्तजनवत्सलं भगवंतमहमेव
तपोवनमुपेत्याराधयिष्यामि । त्वं पुनः प्रणतजनपरिजातं तातं परिचरन्
स्वल्पैरेवाहोभिः पूर्णमनोरथो भविष्यसि ।

ध्रुवः — मातर्नैतच्छक्यं शक्यं पराधीनतया मात्रा ।

सुनीतिः — (सास्रम्) वत्स ! सहैव तर्हि तपोवनं मामुपनय । नात्र त्वया विना
स्थातुं शक्ष्यामि । भूयः
नास्त्येव मय्यवनिपालकृपावलोको
नास्त्येव [illegible]

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वीक्ष्यैव वत्स भवतो मुखचन्द्रबिम्बं
सन्तापमेनमखिलं खलु विस्मरामि ॥१४॥

ध्रुव: – (स्वगतम्) अहो निःसीमता मातृवात्सल्यस्य। (प्रकाशम्) मातर्नैतदपि कर्तुं शक्यं मया बालत्वात्।

सुनीति: – यद्येवं तर्हि न त्वया गन्तव्यं न मयापि गन्तव्यम्। अत्रैवावां परमकृपा-पीयूषपारावारं परमेश्वरं परिचरिष्याव:।

मैवास्तु मय्यवनिपालकृपावलोको
मैवास्तु राजविभवोऽपि च मा च सम्पत्।
वत्स! त्वया सह तु रुद्धदशाऽप्यसौ मे
राज्याधिका सह ततोऽत्र हरिं भजाव: ॥१५॥

ध्रुव: – मातर्यथा मद्वियोगस्त्वदीयं हृदयं पीडयति तथैव त्वच्चरणपरिचर्यावियोगो मदीयं हृदयं पीडयति। तथापि न प्रकाशयितुं शक्यं दु:खं यदहं तपोवनं गन्तुमिच्छामि न तद्राज्यलोभात् विभवलोभात् संपल्लोभाद्वेत्यवगन्तव्यम्। अयमपि भगवती-जठरजातजन्मा जन: साम्राज्यं स्वाराज्यं चापि तृणाय मन्यते। परमस्त्येवं महत्कारणं येनावश्यं तपोवनमुपेत्य तपो विधेयमित्यास्ति मे महानाग्रह:।

सुनीति: – वत्स! किमस्ति तत्कारणमिति श्रोतुमिच्छामि।

ध्रुव: – यद्यपि न शक्नोम्येतद्वक्तुं तथापि मातृणामाग्रहाद् ब्रवीमि। श्रूयताम् –

असद्भाग्यायास्त्वं यदसि हि सुनीतेस्तनुजनु-
र्न तत्स्यातुं योग्यो नृपतिपद इत्याह सुरुचि:।
यतस्तन्मत्पूर्वैरनधिगतपूर्वं पदमहं
समारुह्य ख्यातिं जननि तव कर्तास्मि जगति ॥१६॥

अपि च

मयि सति तव पुत्रे भाग्यहीनां जनस्त्वां
जननि वद वदेच्चेज्जीवितेनापि किं मे।
तदखिलभुवनेशं तोषयित्वा करिष्ये
त्रिभुवनविदितां सद्भाग्यवत्तां त्वदीयाम् ॥१७॥

तदयं मे प्रयत्नप्रक्रम:। पुन: परमकृपालो: परमेश्वरस्य प्रसादाद्भगवत्या आशिषा च स्वल्पैरेवाहोभिर्मातुश्चरणकमले शैलम्बतामुपनेष्याम्यात्मानम्।

(इति वदन् मातु: पादयो: पतति)

सुनीति: – (नेत्रयोरश्रूणि संस्तभ्य स्वगतम्)
अतिभूमिं गतो वत्सस्योत्साह:। न तत् प्रतिकूलं वक्तुमुचितं मे।
(प्रकाशम्)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(ध्रुवमुत्थाप्य) वत्स ! यद्येवमाग्रहस्ते तर्हि नोत्साहं ते रोद्धुमिच्छामि ।

पान्तु त्वां प्रणतप्रियः स गिरिजाक्रोडेश्वरः श्रीश्वरौ
देवः श्रीकमलापतिः स च चिरं श्रीमान् विरञ्चिश्च सः
देव्यस्ताश्च सदा तदालयगताः सर्वे दिशां पालकाः
सूर्याचन्द्रमसौ च वत्स करुणापीयूषपूर्णाशयाः ॥१८॥

पुनः परमेश्वरप्रसादात्त्वयः संप्राप्तसर्वाभिलाषं द्रक्ष्यामि । शिवाः सन्तु ते पन्थानः । शिवाः सन्तु ते वायवः । शिवानि सन्तु ते जलानि । शिवानि चिन्तयन्तु ते सर्वा वनदेवताः । पुण्यान्यरण्यानि च पूर्वजानां ते सदा शिवं करिष्यन्त्येव तत् साधयतु भवान् स्वाभीष्टसिद्धये ।

ध्रुवः — अद्य सिद्धैव ममाभीष्टसिद्धिर्मातुराशीषा । आर्ये सुशीले सुचरित्रे
(इत्यर्द्धमुक्त्वा वाक्स्तम्भं नाटयति)

सुशीला सुचरित्रे } कुमार मातापितृपदपद्मपरिचर्यापरायणानां करुणानां भवादृशां सर्वत्र हस्तगतैव सिद्धिः । न कुमारेण मातृविषयिणी काऽपि चिन्ता चित्ते विधेया । नेमे दास्यौ मातुः स्वान्तपरितोषाय प्राणानप्यर्पयितुं विमुखे भविष्यत इत्यवगन्तव्यम् ।

ध्रुवः — (सपरितोषम्) आर्ये सुशीले ! आर्ये सुचरित्रे ! भवत्योरनेन वचनेन निश्चिन्ततरं मे चेतः संवृत्तम् । नैनमुपकारमयं जनः कदापि विस्मरिष्यति युवयोः ।

सुशीला सुचरित्रे } — नायमुपकारो विधीयते । किंतु स्वधर्म एव परिपाल्यते ।

ध्रुवः — (मातरं प्रदक्षिणीकृत्य साष्टाङ्गपातं प्रणम्य च)

मातर्मातरि मे भक्तिर्गौरीपितरि चेश्वरे ।
अस्ति चेदचला तर्हि तूर्णं पूर्णमनोरथम् ॥१९॥
प्रसन्नपरमेशानपरमानुग्रहेक्षणैः ।
मां द्रक्ष्यसि न तच्चिन्ताक्लेशलेशोऽपि चेतसा ॥२०॥
कार्यो धार्यश्च हृदये प्रेम्णा श्रीहृदयेश्वरः ।
प्रणामपूर्वा चरमा परमाभ्यर्थनेति मे ॥२१॥

(निष्क्रान्तः)

सुनीतिः — हला सुशीले ! गच्छेदानीं शुभानि निमित्तानि विलोक्य तपोवनप्रयाणप्रणयी भविष्यति वत्सो मे ।

सुशीला — यथाज्ञा देव्याः । (निष्क्रान्ता)

सुनीतिः — सुचरित्रे ! वत्सस्य निर्विघ्नतासिद्धये श्रीसदाशिवसेवनमेव कर्तुमीहे । तत्सेवामन्दिरमार्गं दर्शय ।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

48.

सूचरित्रा- इत इतो देवि ।

(निष्क्रान्ते उभे)

———— :o: ————

(ततः प्रविशति पुष्पावचयं नाटयन्ती सूचरित्रा)

सूचरित्रा - निद्रामपास्य सहसा धृतसुप्रबोधो
रे जीव जीव परिचिन्तय चिन्तनीयम् ।
श्रीचन्द्रमौलिमधुना गिरिजासहायं
चिन्तामणिं स्वजनचिन्तितपुरस्पूर्तौ ॥२२॥
रे रे प्रबुद्ध इह पश्य जगन्नवीनं
श्रीभास्करस्य किरणैस्तरुभिर्विभाति ।
श्रीशं नवाङ्कुरवराङ्गुलिभिर्लवल्यः
प्रेम्णार्चयन्त्य इव कुङ्कुमसंयुताभिः ॥२३॥
पुष्पैर्दलैश्च सुफलैः प्रणताग्रशाखाः
श्रीशं नमन्त इव भान्ति च शाखिनोऽमी ।
निद्रामपास्य कृतचारुतरोच्चशब्दाः
श्रीशं स्तुवन्त इव भान्ति च पक्षिणोऽमी ॥२४॥
अस्तं तमो विमलमाविरभूच्च तेजो
हर्षप्रकर्षमुपयाति जगत्समस्तम् ।
रे रे तथापि च कथं परिमुह्यसि त्वां
निद्राङ्गनेव बहुमोहकरी न मन्दम् ॥२५॥
एनां विहाय परिचिन्तय चित्त चिन्ता-
रत्नं शिवं प्रणतपालमुमासहायम् ।
पतिं व्याधियाऽप्यमोहेऽमत्र परत्र च स्यात्
तच्चिन्तनस्य समयस्त्वयमेव मुख्यः ॥२६॥

श्री परमेश्वरपूजागृहोपविष्टया देव्या प्रेषितास्मि श्रीपरमेश्वरपूजोपयोगीनि पुष्पाणि बिल्वीदलानि तुलसीदलानि चानेतुं परमहं त्वत्र प्रातःसमयसमुन्मिलितेन परितः प्रसृतेन प्रमदवनसौन्दर्येण हृतचित्ता मन्य इहैव निवसामि । नमः सर्वथा सर्वोपकारायैवेदृशीरयनलम्या मनोनयनप्रिया अप्रतिमाः सृष्टिसौन्दर्यरचना रचयितुं चतुरतरसङ्कल्पाङ्कुशाय परमकृपालवे श्रीपरमेश्वराय (इति विचारयन्ती परिक्रामति)

(ततः प्रविशति रिक्तकलशहस्ता कर्पूरमञ्जिका)

कर्पूरमञ्जिका - (स्वगतम्) प्रमदवनमेतत्सुनीतेः । गतेऽह्नि सायंसमये महाराजसमीपे महादेव्याः सूनुर्वै कुमारेण पुत्रेण सह चतुर्दश प्रारब्धं विहृत्य तत्र दुःसहैर्वचनबाणैः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कुमारोऽतीव खिन्नचित्तोऽश्रुनेत्रः प्रणम्य महाराजं सभामध्यान्निष्क्रान्तः। ततः परं किंवृत्तमिति-वृत्तं देव्याः सुनीतेर्मन्दिर इति ज्ञातुमागतास्मि सकलकपटकलाकुशलया ऽनयसूयया। तदतः स्थानातिक्रमपि लप्स्ये (निपुणं निरूप्य) जलाशयसमीपे काचिद्दृश्यते (अग्रतोगत्वा) अहो! देव्याः सुनीतेः प्रीतिपात्रं सुचरित्रैवेयम्। भवतु, इयं स्वभावसरलाशया तदस्याः सकाशात्सर्वमपि ज्ञास्यामि (समीपमुपेत्य) अहो सुचरित्रे! देव्याः सुनीतेरायुष्मत्सम-नूनरत्नस्य ते कुतः प्रातःसमय एव प्रमदवनप्रवेशावकाशः?

सुचरित्रा — (साश्चर्यम्) अहो किं कपटकरण्डिका? स्वागतं ते। अहं तु देव्या आज्ञया पुष्पाणि नेतुमागतास्मि। त्वं पुनः कुतोऽत्रागतासि?

कपटकरण्डिका — देव्याः सुरुचेः प्रमदवनान्तर्वर्तिनो ऽस्य कूपस्योदकमेवानुकूलमिति वैद्येनाद्य प्रोक्तमिति तदुद्धर्तुमागतास्मि (कूपजलेन कलशद्वयं पूरयन्ती) सुचरित्रे! श्रुतं मया गतेऽह्नि सायंसमये कुमारः श्रीध्रुवो देव्याः सुरुचे-र्वचनैरुद्विग्न इति।

सुचरित्रा — अथ किं अतीवोद्विग्नः।

कपटकरण्डिका — बालबुद्धिः खलु स कुमारस्य यथा मातुःश्री सुरुचेर्वचनैरपि कुपित इति।

सुचरित्रा — (सरोषम्) ततोऽप्यधिका बालबुद्धिर्देव्याः सुरुचेर्या पञ्चषवर्षमात्रवयस्केऽपि कुमारे तादृशान् दुःसहान् वाक्यबाणान् मोक्तुं प्रवृत्ता।

कपटकरण्डिका — (स्वगतम्) देवीमपि तिरस्कारवचनैर्योजयतीयम्। परं न रोषो विधेयो विशेषवृत्तान्तज्ञानाय (प्रकाशम्) सत्यं सुचरित्रे सत्यं न खलु देव्या तद्युक्तं कृतम्। ततस्ततः?

सुचरित्रा — ततो दुःसहतरदेवीवचनशरैर्भिन्नधैर्यः प्रणम्य मातरं देव्याः सुरुच्या उक्त्यनुसारेण तपश्चरणाय तपोवनं प्रस्थितः कुमारः।

कपटकरण्डिका — किं किं कुमारस्तपोवनं प्रस्थितः! कदा कदा?

सुचरित्रा — अरे! अद्यापूर्वैव सुशीला प्रयाणसमयशुभनिमित्तानि विलोकयितुमासीमान्तं कुमारमनुगता। अहं चात्र कुसुमान्याचिनोतुं समागता।

कपटकरण्डिका — अहो! अति दुष्करमेतत्कृतं कुमारेण। देव्या सुनीत्यापि तपोवनप्रयाण-साहसान्न निवारितः कुमारः?

सुचरित्रा — राजकुमारः स खलु मानधनोऽवमानलेशमप्यसहमानोऽचलनिश्चयश्च केन निवारयितुं शक्यते? मातुरपि वचनामृतलहर्यः सुरुचिवचोवज्रविभिन्ने न कुमारहृदये क्षण-मात्रमपि स्थितिं भेजुः।

कपटकरण्डिका — (स्वगतम्) देव्याः सुरुचेर्भाग्यभास्वराभ्युदय इदानीं निर्विघ्नप्रसार एव सर्वतः प्रसरिष्यति। (प्रकाशम्) सुचरित्रे! एकाकिनोऽसहायस्य कुमारस्य तपोवने किं भविष्यतीति वेपते मे हृदयम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुचरित्रा – भक्तवत्सलः श्रीभगवान् स्वभक्तजनरक्षार्थमहर्निशं जागर्त्येव तस्येच्छानुरूपं सर्वं भविष्यति। भगवत इच्छा केन ज्ञातुं शक्यते ? तदलमस्मत्कृतया चिन्तया। परं गजानां पङ्कमग्नानां गजा एव धुरन्धरा इत्युक्त्यनुसारेण राजकुमारं स्वनिश्चयाच्चालयितुं महाराजः प्रभवेदेव यदीच्छेत्।

कर्परकरण्डिका – (स्वगतम्) मूढेयं स्वप्नमोदकैस्तृप्तिमिच्छति। (प्रकाशम्) सुचरित्रे! श्रुतं मया, एष तपोवनप्रयाणप्रणाम इत्युक्त्वा सभामण्डपान्निष्क्रान्ते कुमारे परमं पश्चात्तापमनुभवन्ती सरलाशया क्षणशेषा चास्माकं देवी सुरुचिरेव मयोद्वेजितः कुमारस्तपोवनं गमिष्यतीति वेपते मे चेतस्ततस्तं पुनराहूय समाश्वासयतु महाराज इति प्रार्थितवती।

सुचरित्रा – सम्यगेतत्कृतं देव्या। ततस्ततः ?

कर्परकरण्डिका – ततो महाराजेनोक्तं प्रातः समाहूय समाश्वासयिष्यामि। मा चिन्तां कुरु।

सुचरित्रा – तर्हि मन्ये महाराजः कुमारमाश्वासयिष्यतीति।

कर्परकरण्डिका – (स्वगतम्) मूढे ममापि वचने ते श्रद्धा ? (प्रकाशम्) अत्र कः सन्देहः परं दैवयोगात् महाराज एवात्र नास्तीति चिन्तं भावितव्यतया।

सुचरित्रा – महाराजः क्व गतः ?

कर्परकरण्डिका – जानासि खलु नगर्या बहिरस्ति महाकालीमन्दिरमिति।

सुचरित्रा – जानामि। ततस्ततः ?

कर्परकरण्डिका – तत्र च वसति परमपवित्रचरित्रो ब्रह्मचारी।

सुचरित्रा – तदपि जानामि। ततस्ततः ?

कर्परकरण्डिका – तस्य च गोधनं चौरैरपहृतमिति श्रुत्वा महाराजो मध्यरात्र एव चौरान् मारयितुं प्रस्थितो नाद्यापि प्रतिनिवृत्तश्चेति देवी सुरुचिरपि चिन्तासन्तापसंतप्ता वर्तते।

सुचरित्रा – परमेश्वरो महाराजस्यैव विजयं करिष्यति, न तत्र चिन्तावकाशः।

कर्परकरण्डिका – (स्वगतम्) कृतं कर्तव्यं मया। ध्रुवस्य तपोवनप्रयाणप्रियाभिवेदनेन देवीं सुरुचिं सन्तोषयन्ती पारितोषिकं लप्स्ये (प्रकाशम्) सुचरित्रे! वार्ताप्रसङ्गेन बहुलः समयो व्यतीतस्तद्गम्यते।

(इत्युक्त्वा जलपूर्णं कलशद्वयं मस्तके निधाय निष्क्रान्ता)

सुचरि – गता कर्परकरण्डिका। विचित्ररूपाः खलु चित्तवृत्तय इति लोकोक्तिर्न मृषा। क्व देव्याः सुनीतेर्वृत्तिः क्व च देव्याः सुरुचेर्वृत्तिः। सुनीतिर्महाराजं परमं दैवतं संसारसर्वस्वं स्वजीवनसर्वस्वं च मन्यते। मनसा वचसा कर्मभिश्च महाराजमनःप्रसन्नतामेव काङ्क्षते। सुरुचिस्तु मुहुर्मुहुर्महाराजमनोमृगं स्वप्रपञ्चजाले निक्षिप्य आत्मानं कृतकृत्यं मन्यते। कुमारस्य ध्रुवस्य

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तपोवनप्रयाणावसरे महाराजो भविष्यति राजधान्यां चेत्कयाचिन्नैसर्गिकेन पुत्रवात्सल्येन निवारयिष्यति चेत्क्षणात्तः सर्वं मनोरथस्य पल्वानं इति मनसि विचिन्त्य ब्रह्मचारिणेऽनया पदरणरूपमभिनवं नाट्यमभिनीतं सुकन्येति मन्येऽहम्। तत्र सहायकारिण्यश्च कपटकराष्टिकाद्या: कुटिला दास्य:। विशेषेणाभ्यसूया सङ्गतिरेव सुरुचिचित्तवृत्ते: परिवर्तनकारणम्। उक्तो—

न तातं नैवाम्बां गणयति न वा सद्गुरुवचन
सदास्नेहाधीनानपि च सुहृद: पीडयति या।
परोत्कर्षं दृष्ट्वा वहति परमोदास्यमधमा
ऽभ्यसूयाधीनाधी: किमधमतमं नैव कुरुते ॥२७॥
सतां निन्दां कृत्वा परमपरितोषं भजति या
परेषां पीडायै प्रतिलवनिमेषं च यतते।
न निद्रां सौख्यं वा क्वचिदपि च हा हन्त लभते
ऽभ्यसूयाधीनाधी: किमधमतमं नैव कुरुते ॥२८॥
सदा दोषान् द्रष्टुं परनरगतान् नित्यनिपुणा
परं त्वाजन्मान्धा निजमवगुणं द्रष्टुमतुलम्।
मुखे मिष्टां वाणीं वहति हृदि हालाहलधरा
ऽभ्यसूयाधीनाधी: किमधमतमं नैव कुरुते ॥२९॥

(नेपथ्ये)

अरे सुचरित्रे! केषु मनस्तरङ्गेषु तरसि? श्रीमहेशपूजार्थानि पुष्पाणि फलानि दलानि चादाय त्वरया गच्छेति देव्या: सुनीतेराज्ञा। तत्त्वरिततरमागच्छ।

सुचरित्रा — (स्वगतम्) अहो मया विचारवीचिचयसंचरच्चित्तया बहु विलम्बितम्। परमिदानीमवलम्बितं देव्या: सेवायां सन्निहिता भविष्यामि (प्रकाशम्) शीघ्रमागच्छामि।

(निष्क्रान्ता)

———:o:———

(तत: प्रविशति सुशीलानुगतो ध्रुव:)

सुशीला — कुमार! निमित्तानि तु शुभशंसीनि बहूनि भवन्ति। पश्य —

(अङ्गुल्या दर्शयन्ती)

अयमुपसरति प्रमोदपूर्ण:, करधृतपुस्तक एष सत्तमो द्विजन्मा।
इयमपि च परेव कामधेनु:, शिशुवलाभ्युपयाति काऽपि धेनु: ॥३०॥
इयमपि पतिपुत्रवत्यनिन्द्या, जलकलशद्वयमुज्ज्वलं वहन्ती।
शिरसि शशिमुखी शिशुं च,कक्ष्या,–मित उपयाति हि काऽपि विप्रपत्नी
॥३१॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इयमिव च परा विरिञ्चिकन्या, श्रुतिसुखगानपरेति विप्रकन्या ।
सविनयमथ तं च ताश्च नत्वा; भिलषितसिद्धय आशु साधयत्वम् ॥३२॥

ध्रुवः — (तथा कृत्वा कतिचित्पदानि गत्वा च) सुशीले ! निवर्तस्वास्मात् क्षीरहृदजलाशयाविलसितात्प्रदेशात् । न दूरमागन्तव्यम् ।

सुशीला — वत्स ! तथा करिष्यामि । शिवाः सन्तु ते पन्थानः । शिवं करोतु ते लोकशिवङ्करः श्रीशङ्करः । परितः परिरक्षतु त्वां स्वपक्षरक्षणदीक्षितः श्रीपक्षीन्द्रकेतुः ।
(इत्याशिष उच्चारयन्ती घनच्छायं वटविटपिनमाश्रित्य तिष्ठति)

ध्रुवः — सुशीले ! मद्वचसा वन्दनीया दयार्द्रहृदया मे माता । न च सा यथा मद्विरहविह्वलतामुपगच्छेत्तथा प्रयतितव्यं भवतीभ्याम् । इमेऽलङ्कारा इमानि वस्त्राणि च न तपोवनविकासानुकूलानि तद्विद्यार्थिभ्यो ब्राह्मणेभ्योऽर्पणीयानि । अद्यावधि मातुः श्रीसुनीत्याः स्वान्तसन्तोषायैव मयैतानि धृतानि । अतः परं त्विमानि वल्कलान्येव मे दुकूलानि, अमी रुद्राक्षा अलङ्कारा एव भोगिभूषालङ्कारा इदं भस्मोद्धूलनमेव चोत्तमोत्तमोऽङ्गरागः ।
(इत्युक्त्वा उत्तार्य दिव्याम्बरालङ्कारान् सुशीलाहस्ते समर्प्य स्वयं वल्कलाक्षवलयभस्मोद्धूलनानि धारयामास)

सुशीला — (सास्रं सगद्गदकण्ठम्)
त्यक्त्वा दिव्यतराम्बराणि भवता त्वक्कारवीयं धृता
रुद्राक्षाभरणानि वत्स ! विधृतान्युन्मुच्य रत्नावलीः ।
त्यक्त्वा चोत्तममङ्गरागमधुना भस्माङ्गरागो धृत-
स्तद्वीक्ष्यापि ममास्फुटत्तु हृदयं मन्येऽस्ति वज्रोपमम् ॥३३॥
(इत्युक्त्वाश्रूणि मुञ्चति)

ध्रुवः — सुशीले ! हर्षस्थाने न विषादविषावेशविवशया भाव्यम् भवत्या ।
प्रसन्ने श्रीजगन्नाथे नाथनाथे दयार्णवे ।
ततोऽप्यधिकभूत्यानि धर्तास्मि भूषणान्यहम् ॥३४॥

* सुशीला — वत्स ! परमकृपालुः परमेश्वरः करोतु त्वयि त्वरिततरं कृपादृष्टिवृष्टीः ।
साधयतु वत्सः स्वाभीष्टसिद्धये ।

ध्रुवः — यथाज्ञा मातुः प्रियसख्याः ।

(निष्क्रान्तः)

सुशीला — (स्वगतम्) मनुकुलकुमारस्य कोऽप्यन्यादृश एव विवेकातिरेकः । येन स स्वमातृदास्यामपि मयि न विवेकविहीनं वचनं कदाचिदवादीत् (उद्ग्रीवमवलोक्य) कुमारस्तु समतिक्रान्तो दृष्टिमार्गम् । तद्गत्वा मातुः समीपे निवेदयामि ध्रुवस्य प्रयाणम् ।

* सुशीला - वत्स सत्यानि सन्तु ते वचनानि त्वरितम् (निष्क्रान्ता)
ध्रुवः - सुशीले, स्वस्ति [illegible] पितृभ्यस्तुभ्य सुचारिण्यै चरमप्रयाणप्रणामः इत्यु

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ इति श्रीमत्केशवकृपावल्लरीपल्लवायमाने श्री ध्रुवाभ्युदयनाम्नि-
नाटके तृतीयोऽङ्कः ॥

श्रीमत्सूर्यकुमारिका सुजननी श्रीविठ्ठलेशः पिता
यस्य भ्रातर उत्तमोत्तमगुणाः श्रीमण्डुभट्टादयः ।
श्रीमत्केशवशास्त्रिणश्च गुरवो मित्रं कविः शङ्करः
एतस्येयं कृतिरस्तु तुष्यतु मया श्रीमान्सया शङ्करः ॥

॥ अथ चतुर्थोऽङ्कः ॥

(ततः प्रविशतः पृथक्पृथक्शय्यासुप्तौ सुरुची राजा च)

राजा — (साश्चर्यमुत्थायाग्रतो गत्वा च स्वगतम्) अहो । किमेतत् ? यद्भूतमद्यावधि मम विस्मृतमभवत्तदिदानीं सर्वस्मिञ्जगति शान्तिसुखमनुभवति कथमकस्मात्समुच्छ्वलितम् ? ब्रह्मचारिणो गोधनकृतत्राणार्थं गोधनहरणं चोराणि-गृहादागतस्य मे शरीरश्रमो मनःश्रमश्चातीव जातः तथापि कथं नायाति नेत्रयोर्निद्रा कथं च नापयाति हृदयात्सन्तापः कथं च सन्देहदोलालोलतां न मुञ्चति मनो मे ? सुरुच्याभिहितान्यभ्यसूयोक्तानि परमहंसब्रह्मचारिनिवेदितानि च वचनानि स्मारं स्मारं भ्रमति मानसं मे । न खलु सुनीतिरीदृक्क्रूराशया मे प्रतिभाति । कथं च सुरुचिरप्यसत्यमीदृशं मदग्रे ब्रूयात् । यदि कदाचित्सापत्न्यजन्यद्वेषविशेषात् सुरुच्याः सुरुचिमत्या चाभ्यसूयाया अपि वचसि वैतथ्याविर्भावः संभवेत् । परं परमहंसब्रह्मचारिणोर्वचनात्कथमेवं तथाविधा वितथा वाणी विनिःसरेत् ? तद्-तेनैव विचारेण दिङ्मूढ इवास्मि संवृत्तः । मत्समक्षमेवं सुरुच्यावधीरितोऽप्यतिधीरो वत्सो ध्रुवो न मया दिङ्मूढतया समाश्वासितः । न च निवारितैवमनर्गलं जल्पन्ती सुरुचिः । न च सुनीत्यै किमपि समाश्वासनवचनं सन्देशितम् । हा । किं करोमि ? किं सत्यं किमसत्यमिति निर्णेतुं न शक्नोति मनीषा मे (पुनर्निःश्वस्य) किं सन्देहेन ? परमहंसब्रह्मचारिणोर्वचनैस्तु पापाशयैव खलु सुनीतिरिति निश्चीयते

सुरुचिः — (स्वप्नप्रलापमभिनीय) न न अहमहम्

(इत्यर्धोक्ते)

राजा — (साश्चर्यमुत्थाय) किमुच्यते देव्या (निपुणं निर्वर्ण्य) सुरुच्याः स्वप्नप्रलाप इव । भवतु, शृणोमि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचिः — (पुनरपि) न न अहमहं कदाचिदभ्यसूयाया उपकारं विस्मरिष्यामि । यया निजबुद्धि-बलवैभवेन सुनीतिलिखितपत्रविलोकनेऽपि विमुखः कृतो महाराजः । परमहंसब्रह्म-चारिभ्यामपि कृतं कुलीनाऽद्भुतकृत्यम् । नैतयोरप्युपकारं विस्मरिष्यामि । गच्छ अवकरणिके गच्छ गत्वैतत्कनककङ्कणयुगं ब्रह्मचारिणे हारमेनं चाभ्यसूयायै समर्प्य पुनरपीदृशकपटप्रबन्धरचनापाटवपरिपाटीपरायणैः सति समये भवितव्यं भवद्भिरिति वक्तव्यम् ।

राजा — (सविस्मयाशङ्कम्) हा ! किमिदमहं शृणोमि ? मदीय मनोविकल्पवल्लरीवृन्दवर्द्धिनीयं शब्दधारा सुरुचेर्वदन्त्याः सुरुचेरेव मुखान्निःसरति कुतश्चिदन्यस्मादेव स्थलान्निःसरति वा परमहंसब्रह्मचारिणोरपि कनकसमर्पणम् ? कीदृशावेतौ परमहंसब्रह्मचारिणौ ? अस्ति कश्चित् कपटप्रपञ्चः । भवत्विदानीमेव ज्ञास्यामि (इत्युक्त्वा शनैः शयनमन्दिराद् बहिरागत्य) द्वारपाल ! (इत्युक्ते प्रविशति द्वारपालः)

द्वारपालः — (प्रविश्य) अवहितोऽस्मि । देव ! आज्ञापयतु ।

राजा — द्वारपाल ! मद्वचसा वक्तव्यो विवेकमित्रः यन्महाकालेश्वरमन्दिरे निवसति यः परमहंसो महाकालीमन्दिरे च निवसति यो ब्रह्मचारि तौ उभौ गृहीत्वा संताड्य संताड्य निश्चीयतां कौ तावुभाविति ।

द्वारपालः — यथाज्ञा देवस्य । (निष्क्रान्तः)

राजा — कोऽस्ति भोः !

(प्रविश्य द्वारपालः)

द्वारपालः — एषोऽस्मि । आज्ञापयतु देवः ।

राजा — द्वारपाल ! गच्छ वत्सं ध्रुवं त्वरितमत्रानय ।

द्वारपालः — यथाज्ञा देवस्य । (गच्छन् स्वगतम्) श्रुतं मया कुमारः श्रीध्रुवस्तु तपोवनं प्रस्थित इति । तथापि कथं महाराजः कुमारमाह्वयेत्याज्ञापयति ? किमीदृश्यपि किंवदन्ती महाराजश्रवणे नाद्यापि पतिता ? नैवं सम्भवति । अथवा कपटैकपटुतर-नरपतिरचितकपटनाटकक्रीडायां किमिवासम्भावनार्हम् ? अथवा नैषा कल्पना मया कर्त्तव्या । किंतु यथा महाराजानुज्ञं विधाय निवेदनीयम् ।

(निष्क्रान्तः)

राजा — (स्वगतम्) अहमपि तावत्स्नात्वा परमेश्वरपरिचर्यां विधाय समायान्तं वत्सं ध्रुवं द्रक्ष्यामि ।

(इत्युक्त्वा अन्तर्गृहे प्रविष्टः)

—:0:—

(ततः प्रविशतो वैतालिकौ पञ्चकान्तशशिकान्तौ)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पद्मकान्तः – (प्रविश्य) सखे शशिकान्त ! ब्रह्मचारिबोधनाथ द्वारिणश्चो शान्तिगृहस्य निशीथानन्तरं समागतः श्रीमहाराजः कथमद्य ब्राह्ममुहूर्तेपि पूर्वमेव प्रबुद्धः ? कथं च मुखमुद्रापि महाराजस्य म्लानेव दृश्यते ?

शशिकान्तः – प्रिय पद्मकान्त ! देव्याः सुरुचेर्निष्कारणेन कोपेन, तयाकृतेन चाकारणेन कुमारस्य ध्रुवस्य तिरस्कारेण, ब्रह्मचारिणश्चाकस्माद्बोधनापहारेण, अन्यैश्च तादृशैः कैश्चित्प्रसङ्गैः साम्प्रतं महाराजस्य मनोवृत्तिर्व्यग्रैव वर्तत इति नाविदितं ते।

पद्मकान्तः – सत्यं भ्रातः सत्यम्। विस्मृतमेतन्मया। हा ! असारोऽयं संसारसागरो दुस्तर एव। राजानो निरन्तरं निस्तुलानि सुखान्येवोपभोक्तुं विधिना सृष्टा इति मन्यमाना वराका एषां राजादीनामपि प्रतिप्रसङ्गमनिवार्यो दुःखपरंपरापरामवो भवतीति कथमिव जानीयुः ? परंत्वाराजरङ्कं सुखदुःख-विभागः सम एव विनिर्मितः समदृष्टिशिरोमणिना परमेश्वरेण। भवतु वयं तु यथावसरं संगीतं गायामः

(गायतः)

संसारसागर इहातिदुरन्तपारे
श्रीशम्भो प्रणतपाल निमज्जतो नः।
त्वं कर्णधार इह देहि करावलम्बं
तीरं नयाशु नितरां शरणागतानाम् ॥१॥

श्री कृष्णचन्द्र करुणाकर दीनबन्धो
व्याधीन् विनाशय विनाशय नः कृताधीन्।
शम्भो सुखामृतमहोदधि-मान्निताना
त्वां नः कथं कथमहो भवितार्तिनाशः ॥२॥

अधमाः शतशः भवसागरेऽत्यधमोद्धारक हे समुद्धृताः।
भवता भवतापहारिणोद्धरणीयोऽत्यधमोऽप्ययं निजः॥३॥

अयि दीनदयालुतां निजाम्, अवलोकयेश दयामयात्मना।
दयनीय इह त्वदाश्रयी, मनुजोऽयं तनुजोऽपमस्त्वया ॥४॥

(नेपथ्ये)

जयतु जयतु महाराजः।

शशिकान्तः – (साश्चर्यम्) पद्मकान्त ! महाराजस्तु विवेकनिधिना सह किमपि मन्त्रय-न्निहैवागच्छति। तदेहि गच्छावः।

पद्मकान्तः – सखे ! एवमेतत्। (निष्क्रान्तौ)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(ततः प्रविशति विवेकनिधिना सह किमपि मन्त्रयन् राजा)

राजा - किं च तौ परमहंसब्रह्मचारिणौ क्व वर्तेते एतद्विषये कोऽपि निश्चयः कृतः किम् ?
(सिंहासनमधिरोहति)

विवेकनिधिः —(स्वासनमुपविशन्) अथ किं, महाराज ! देव्याः सुरुच्याः पितृगृहादागताभ्यां कपटकरभोजपुशुनाबीडसंज्ञाभ्यां किङ्कराभ्यां ब्रह्मचारिपरमहंसवेशं गृहीत्वा सकलमेतत्कापटनाटकं प्रणीतम् । तौ च तौ देव्याः सुरुच्याः प्रियसख्या अभ्यसूयाया आज्ञया सकलामिमां कापट्यरचनां कृतवन्ताविति संताड्य संताड्य परिपृष्टाभ्यां ताभ्यामेव सर्वं रहस्यं प्रकाशितम् । तन्मन्ये देव्यां सुनीत्यां प्रेमाविमुखं महाराजं विधातुमेव देव्याः सुरुच्याः सर्वोऽयमायास इति ।

राजा — (सखेदम्) विवेकनिधे ! मन्मनोऽप्येतदेव निश्चयं कुरुते । अहो ! कीदृशमिदं कापट्यमिदम् ? कीदृशोऽयं विश्वासघातोऽयम् ? हा ! यामेवाहं निरन्तरं मदीयाम् प्रियहितकारामजानामि तैरैव मेऽत्यन्तमप्रियमहितं च विहितम् । हा ! दुष्टयोस्तयोर्वचनकावेण विश्वस्तेन मया वत्से ध्रुवेऽप्यनादरः कृतः । वत्स ध्रुव ! ध्रुव ! एह्येहि परिष्वजस्व माम् । निष्कारणं तिरस्कृतोऽसि निष्ठुरतराशयया ते मातृसपत्न्याऽतिदुःसहवाक्सूच्या सुरुच्या ।

विवेकनिधिः — देव देव नात्रोऽस्ति कुमारो ध्रुवः ।

राजा — विवेकनिधे ! त्वरितं ध्रुवानयनाय प्रेषितोऽपि द्वारपालो हा ! कथं नाद्याप्यागतो वत्सो ध्रुवः ।

द्वारपालः — (प्रविश्य) देव ! देवस्याज्ञया कुमारानयनाय गतोऽहमासम् । परं कुमारो ध्रुवस्तु तपसे वने प्रस्थितोऽस्ति ।

राजा — (साश्चर्यम्) किं किं कुमारस्तपोवनं प्रस्थितः ? कदा कदा केन कथितम् ?

द्वारपालः - मातुः श्रीसुरुचेर्दुःसहवचनशरपीडितः कुमारो गतेऽह्नि प्रातःकाल एव तपसे तपोवनं प्रस्थित इति सुशीलया मह्यं कथितम् । ततः परं देवाः प्रमाणम् ।

राजा — (सखेदम्) हा ! किं वत्सो ध्रुवस्तपसे प्रस्थितः ?

धिग्राज्यलोभमविवेकविनष्टशौर्यं
रूपैकलोभविवशां सुरुचिं च तां धिक् ।
व्यर्थं पराहितपरां च धिगभ्यसूयां
माञ्चापि धिक् सुरुचिवाक्यवशं विमूढम् ॥ ५ ॥

(इति वदन् मूर्छया पतति)

विवेकनिधिः — देव ! समाश्वसिहि समाश्वसिहि ।

(इति वदन् पटान्तेन वीजयति)

राजा — (क्षणात्संज्ञामुपलभ्य) हा ! वत्स ध्रुव ! राजपुत्रस्यापि ते तपोवनप्रवेशः ! हा ! क्व ते

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कमलकोमलं मुखमवलोकयिष्यामि ? क्व ते कोमला गिरः श्रोष्यामि ? क्व मे का च ते मृदु-
मृदून्यङ्गकान्यालिङ्गयिष्यामि ।

(पुनः मूर्च्छया पतति)

विवेकनिधिः — (पुनः शीतोपचारैरुपचरति)

राजा — (संज्ञामुपलभ्य) विवेकनिधे ! त्वरितं सुनीतिमेव विलोकयितुमिच्छामि । तत् प्रेष्यतां
द्वारपालस्तदाह्वानाय ।

विवेकनिधिः — यथाज्ञा देवस्य (इति वदन् द्वारपालं प्रति) द्वारपाल ! गच्छ, देवीं सुनीतिं
समाह्वय ।

द्वारपालः — यथाज्ञा मन्त्रिवर्यस्य ।

(निष्क्रान्तः)

राजा — विवेकनिधे ! नगरान्निष्क्राम्येतां रासभारोहणेन पापौ कपटकरण्डपिशुनापीडौ । ययोः
कपटव्यापारेण वञ्चितोऽहमिमां दशामनुभवामि ।

विवेकनिधिः — देव ! नगरान्निष्क्रान्तौ यावज्जीवमपुनःप्रवेशप्रतिज्ञया शपथबद्धौ तौ । नातः
परमेतद्विषये चिन्ता विधेया देवेन ।

राजा — अहो ! ममैवाविचारकत्ता मामिदानीमनुतापयति ।

नित्यं विवेकविरहो विततान्यसूया । प्रागल्भ्यमध्रुवरतिः क्षतिरार्यतायाः
अज्ञातृता निजहिताहितयोश्च हा हा
हानिः सुनीतिविरहात्कियती न का मे ॥ ६ ॥

विवेकनिधिः — यथाह देवः । सुनीतिविरहः सर्वेषां तादृशहानिप्रदोऽस्तीति सर्वैः सर्वदा सुनीतिरेव
वन्द्यते न कुनीतिः ।

(ततः प्रविशति सुनीतिः)

सुनीतिः — (प्रविश्य) प्राणनाथ ! एषा ते पदपद्मदासी सुनीतिः प्रणमति ।

राजा — (अनाकर्णितकेन) विवेकनिधे ! त्वया तु सुनीतिकुनीतिविषये प्रोच्यते । मया तु
मम प्राणप्रियायाः सुनीत्या विरहजन्यहानिविषये प्रोच्यते ।

विवेकनिधिः — देव ! यदि देव स्वमेव हृदि जानाति तर्हि हृदयास्थितैव ते सुनीतिरिति
मन्तव्यम् ।

राजा — (स्वगतम्) हृदयमुपलब्धा वयं विवेकनिधिना (प्रकाशम्) विवेकनिधे ! सत्पुत्रवि-
रहप्रदाननिदानतया महापराधिने मह्यं किं दर्शनं दास्यति सुनीतिः ?

सुनीतिः — (पादयोर्निपत्य) प्राणनाथ ! प्राणनाथ ! एषाऽहं ते दासी प्रणमामि ।

(प्रणमति)

राजा — (साश्रुपातम्) प्रिये प्रिये ! सुनीते ! वञ्चितः खल्वहं पापाभ्यां कपटकरण्ड-
पिशुनापीडाभ्यां पिशाचाभ्यां तन्न मुखमपि दर्शयितुं शक्नोमि ।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुनीतिः — नाथ! नाथ! नैतत् किमपि चित्ते चिन्तनीयम्। न मन्मनः स्वप्नेऽप्येतद्विषये प्राणनाथस्य दोषं शङ्कते।

राजा — प्रिये! न त्वं स्वप्नेऽपि मदीयं दोषं शङ्कसे परं मदीयोऽन्तरात्मैव मां दोषवन्तं महापराधवन्तं च निश्चित्य मुहुर्मुहुर्धिक् करोति।

विवेकनिधिः — देव! देव्या सुनीत्या निर्दोषे निरपराधे च त्वयि निर्धारिते न ते शोकावेशलेशस्यापि कारणं पश्यामि।

राजा — विवेकनिधे! देवी सुनीतिर्मां निर्दोषं निरपराधं च जानाति तेनैव मे शोकावेशः प्रभवति। यत्सुरुच्याः कपटप्रपञ्चपाटवान्धपटपिहितलोचनो नैतादृशगुणरत्नराजिविराजितामपि सुनीतिमपश्यम् किमतः परं खेदास्पदम् किमतः परं व्रीडाक्रीडास्थलं च? यदि कदाचित्सुनीत्याः सहजसौजन्यजन्यां परगुणैकग्रहणाग्रहग्रहग्रस्ततां परापराधपरंपराप्रेक्षणव्यपराङ्मुखतां चालोक्य शोकः स्तोकतां नेतुं शक्यते। तथापि सत्पुत्ररत्नस्य वत्सस्य ध्रुवस्य परित्यागः पुनः पातयति मामपारे परितापपारावारे। किं करोमि? न किंचिदवलम्बनं मे।

विवेकनिधिः — देव! देव! धैर्यस्थैर्यमेवावलम्बनम्।

सुनीतिः — प्राणनाथ! न वत्सस्य ध्रुवस्यापि काचिच्चिन्ता चित्ते मच्चित्तेश्वरेण विधेया। सोऽपि देवस्यागण्यपुण्यप्रभावेण स्वल्पेनैवानेहसा श्रीमतां चरणकमलयुगले मरालतामुपगन्तैव।

राजा (स्मृतिमभिनीय) हा! कथमिव धैर्यं धारयेयम्?

वत्सस्य तस्य विनयेन समारुरुक्षो-
रङ्कं मदीयमतिहर्षविशान्तवाणीम्।
या दुःसहैः सुरुचिवाक्यशरैर्दशाम्यद्
नाद्यापि सा मम दृशोरपयाति दूरम् ॥७॥

(इति वदन्मूर्छां मुञ्चति)

सुनीतिः — (सास्रम्) प्राणनाथ! प्राणनाथ! समाश्वसिहि समाश्वसिहि। प्राणनाथस्येयं दशापि मे क्षते क्षारयते। तदिदानीं नैतत्किमपि चिन्तनीयम्।

विवेकनिधिः — देव! देव्याः सुनीत्या युक्ततरैवेयमुक्तिः।

राजा — (क्षणं विचार्य) विवेकनिधे! साम्प्रतं सूयां सुरुचिं सत्वरमिहाह्वय।

विवेकनिधिः — यथाज्ञा देवस्य

(इत्युक्त्वा द्वारपालं प्रेषयति)

राजा — विवेकनिधे! दुःसङ्गतिः कां कां निर्विवेकतां न दधाति? सत्कुलसम्भवाया अपि सुरुच्या अभ्यसूयासङ्गतिमेव दुस्तरतराविवेकसागरनिमज्जनान्निदानं मन्यैऽहम्।

विवेकनिधिः — देव! स्वमेतत्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुनीतिः — नाथ! त्वदेकशरणायाः सुरुचेरपि क्षन्तव्यमेव स्खलितं दैवेन।

(ततः प्रविशति अभ्यसूययानुगम्यमाना सुरुचिः)

सुरुचिः — अभ्यसूये! सुनीत्या इव वचांसि श्रूयन्ते तदत्रैव स्थित्वा शृणुवस्तावत् किं सा वदतीति।

अभ्यसूया — यथेच्छा देव्याः।

राजा — प्रिये! त्वं खल्वदोषदृष्टिः सदोषेष्वपि न दोषदृष्टिं कुरुषे। न परं मया तथा कर्तुं शक्यम्।

विवेकनिधिः — देव! निसर्गत एव परदूषणान्वेषणविमुखा देवीति ज्ञातं देवस्य।

सुरुचिः — हा सुनीत्यामपि प्रिये इति संबोधनम्। हा! हतास्मि। किमेतच्छृणोमि।

(अश्रूणि मुञ्चति)

अभ्यसूया — देवि! समाश्वसिहि समाश्वसिहि।

सुरुचिः — दुष्टो विवेकनिधिरपि तामेव वर्णयितुं प्रवृत्तोऽस्ति।

अभ्यसूया — देव्या एवायं दोषो यत्स्ववशंवदेऽपि महाराजे न तादृशाः समुत्सारिताः। न च कपटकरण्डादयस्तत्समीपे स्थापिताः। इदानीं स्वप्रमादस्य स्वेनैव फलं भोक्तव्यम्।

सुरुचिः — सखि! नेदानीं क्षते क्षारक्षेपणं कुरु। नातः परं तादृशं प्रमादं करिष्यामि। महाराजसमीपमुपेत्य प्रथमं विवेकनिधिमेव नगरान्निर्वासयितुं प्रयतिष्ये।

राजा — विवेकनिधे! पापयाभ्यसूयया सह सुरुचिर्निर्वास्यतां नगरात्।

सुरुचिः — अभ्यसूये! मयि त्वयि चातीव कुपितो महाराजः। मन्ये मन्त्रभेदो जातः। अतः किं विधेयम्?

अभ्यसूया — शेषमपि श्रोतव्यम्। पश्चाद्विचारयिष्यावः।

सुनीतिः — नाथ! नाथ! नैतदुचितमादिमनुवंशसंभवानां श्रीमतां निरपराधलवाया धर्मपत्न्याः परित्यागकरणम्।

राजा — कथं निरपराधा सुरुचिः?

सुनीतिः — नाथ! ध्रुवेऽपि नाहं किमपि सुरुच्याः श्रीमत्स्वपराधं पश्यामि।

राजा — "आत्मा वै पुत्र" इति न्यायेन वत्से ध्रुवे कृतोऽपराधो मय्येव तया कृत इति मन्येऽहम्।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुनीतिः - नाथ ! ध्रुवेऽपि न किमपि सुरुच्याऽपराद्धमभ्यसूयया वाऽपराद्धं पश्यामि ।

विवेकनिधि: - (स्वगतम्) सौजन्यस्य सीमा खलु सुनीतिः ।

सुरुचिः - अभ्यसूये । सुनीत्या इदं वचनं मे विस्मयं कुरुते ।

अभ्यसूया - नात्र किमपि विस्मयनिदानम् ।

सुरुचिः - कथमिव ।

अभ्यसूया - जानात्येव सुनीतिर्मनसि 'न महाराजोऽयं क्षणमपि सुरुचिप्रेमविमुखः स्थास्यति, सुरुचिदर्शनोत्तरं सुरुचिवशं-वदतामेव भजिष्यतीति' तत एव न किमपि त्वद्विरुद्धं वदति।

सुरुचिः - यथाह प्रियसखी मे सूक्ष्मदर्शिनी ।

राजा - प्रिये ! सुरुच्याऽभ्यसूयया वा न किमपि ध्रुवेऽपराद्धमिति वदन्ती त्वमपि मां विषादविषोदधौ निमज्जयसि । अभ्यसूयैव सर्वापदां मूलम् । अभ्यसूयैव सर्वानर्थानां निदानम् । अभ्यसूयैव सर्वकलुषानामुत्पत्तिक्षेत्रम् । सुरुच्याप्यभ्यसूयोपदिष्टमेव मार्गमनु-सरन्त्या स्वत्नेऽप्यकृत्येषु कृत्येषु कृत्यत्वबुद्धिर्निबद्धा । अन्यथा सत्कुलसंभवायाः सुरुच्याः कथमिव वत्से ध्रुवे द्वेषावेशाविर्भावः संभवेत् ? न केवलं सुरुचिस्तया पापया मूढतां नीता, किं त्वहमपि कपटपाटवेन दिङ्मूढतां नीतः । येनाहमुत्सङ्गमारोढुमुत्सु-कमपि वत्सं ध्रुवं नाभ्यनन्दम् । ततस्तस्यास्तु पापायाः प्राणान्त एव दण्ड उचितः । तथापि स्त्रीहत्याभीरुता निवारयति मां तत्कर्तुम् । तत्तस्याः सुरुच्याश्च परित्यागमेव कर्तुमीहे । अयि नितरामनु-पकारकरेष्वप्युपकारकरणव्यसनविवशे सुनीते चिरं चित्ते विचारय विचारय । निर्दोषलेशमपि वत्सं ध्रुवं "दौर्भाग्येय ! न त्वं राजसिंहासनमधिरोढुमर्हसि' इत्याद्युक्त्वा किमल्पमपराद्धं ध्रुवे सुरुच्या ? नैतावतापि निसर्गमधुरो ध्रुवः क्रुद्धः किन्तु 'त्वन्माता यतिव्रतिततिद्वारा प्रतिदिनं महाराजे मारणमोहन-वशीकरणादिक्रियाः कारयति' इति तस्याश्चरमवचनमेव वज्रोप-मम भवद्ध्रुवस्य । येन स मह्यं प्रयाणप्रणामान् विधाय सरोषं निःसृतः । अहमपि दुष्टयाभ्यसूययोपदिष्टयोः परानिष्टरचना-प्रतिष्ठानिष्ठयोर्ब्रह्मचारिपरमहंसवेशयोः कर्मचण्डालयोः कपटकरण्ड-पिशुनापीठयोर्वचनरचनावञ्चितचित्तो न किञ्चिदवदम् । षष्ठवर्ष-देशीयोऽपि वत्सो ध्रुवो यस्या निष्ठुरतरवचःशरप्रहारपर्यायित-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स्तपोवनमेव प्रस्थितः । किमयमल्पोऽपराधः सुरुच्याः ?

सुरुचिः – अभ्यसूये । जातो मन्त्रभेदः । ज्ञातोऽखिलोऽपि प्रपञ्चो नो महाराजेन । किमतः कर्तव्यम् ?

अभ्यसूया – देवि ! त्वया तु 'नाथ ! नाहमपि तद्विषयेऽभिज्ञा वञ्चिताहमस्यभ्यसूयाया वचनेन' इति वक्तव्यम् ।

विवेकनिधिः – (स्वगतम्) न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीति लोकोक्तिर्न मृषा । चिरेणापि महाराजेन सुनीत्याः सद्गुणा अनुभूतास्तेन मोदते मे मानसम् ।

सुनीतिः – प्राणनाथ ! विज्ञापयामि यदि न कुप्यसि ।

राजा – निःशङ्कं विज्ञाप्यताम् ।

सुनीतिः – सूक्ष्मया दृशा विलोक्यमाने न मे प्रियस्वसा सुरुचिरपराधवती नाप्यभ्यसूयाऽपराधवती प्रतिभात्ये तद्विषये ।

राजा – कस्तर्हि तद्विषयेऽपराधवान् प्रतिभाति ते तन्निवेदय । तमेव प्राणान्तदण्डपात्रं करिष्यामि ।

सुनीतिः – नाथ ! ममैवाल्पतपस्कताऽल्पपुण्यवत्ताऽल्पभाग्यवत्ता चापराधपरम्परावत्त्यः प्रतिभान्ति । ता बिना प्राणनाथस्य पाणिगृहीतीं मां को नाम मनसाप्यपकर्तुं शक्नुयादिति विदितमेव देवस्य ।

प्राणप्रियप्रियतमाखिलसौख्यपात्रं
सौभाग्यभाजनमनन्यसमानसंपत् ।
सद्वंशजापि युवतिर्न भवत्यगण्यैः
पुण्यैस्तपोभिरपि वापि विना सुभाग्यैः ॥ 8 ॥

किं च

सिंहासनं मणिमयं शशिमण्डलाभं
छत्रं च चामरयुगं नरपाललभ्यम् ।
राजाधिराजतनुजोऽपि भजत्यगण्यैः
पुण्यैस्तपोभिरपि वा न विना सुभाग्यैः ॥ 9 ॥

एवं मयि ध्रुवे चाल्पपुण्यवत्तामल्पतपस्कतामल्पभाग्यवत्तां चावलोक्य दयया वत्साय ध्रुवाय तपश्चरणरूपं परमोपदेशमुपदिशन्त्या सुरुच्या महानुपकारो मयि ध्रुवे च विरचितः । यदि तमेवोपकारमहमपकारपक्षे क्षिपेयं तर्हि मदन्या का कृतघ्ना स्यात् ? एतद्देवेनैव चिन्त्यम् । किं चाभ्यसूयासहितया तया ये ये मय्यारोपा आरोपितास्तत्रापि न ते दोषवत्त्यो । मदीयं प्रारब्धमेवोपालम्भ-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

- पात्रमिति मन्येहम् ।

राजा – प्रिये सुनीते ! त्वदीयसौजन्यजन्यमनन्यसामान्यमिदं महाशयत्व-मवलोक्य परमपरितोषपोषणमुपैति मानसं मे । तद्ब्रूहि किं ते प्रियं करवाणीति ।

विवेकनिधिः – (स्वगतम्) ध्रुवं ध्रुवं इदानीं राजसिंहासनाभिषेकः । फलितमिदानीं देव्याः सुनीत्याः पुण्यपारिजातेन ।

सुरुच्य-भ्यसूये – (स्वगतम्) हा हते स्वः । इदानीमावयोर्नगरान्निर्वासनं यावज्जीवं काराभवननिवासं वा याचिष्यत एषा । हा ! किं कर्तव्यम् क्व गन्तव्यं वा !

सुनीतिः – प्राणनाथ ! यद्यसंशयं दातुमिच्छा चेद्याचे ।

राजा – भीरु ! मद्वचनेपि संशयः संभवेत् कदाचित् ! निःसंशयं याच्यताम् प्राप्तमेव चावेहि वाञ्छितं ते ।

सुरुचिः – हलाभ्यसूये ! धिक् चञ्चलातोऽपि चञ्चलतरं प्रेम पार्थिवानाम् । राजा मित्रं केन दृष्टं श्रुतं वा इति लोकोक्तिर्न मृषा । यामचतुष्टयात्पूर्वं यो मयि निष्प्रतिमप्रेमपरतन्त्र-तामवहत् स एवेदानीमन्यादृश एव दृश्यते देवः । दुर्दशैवेदा-नीमावयोः (इति वदन्ती भयात्कम्पते)

अभ्यसूया – देवि ! यद्भावि तद्भविष्यति । धैर्यमालम्ब्य श्रोतव्यं किं सा याचते इति ।

सुनीतिः – (प्रबद्धाञ्जलिरुत्थाय)

यदि देयो वरो, देव ! वरार्हा यदि ते मता ।
सुरुचिश्चाभ्यसूयापि ....

(इत्युक्त्वा शङ्कया मौनमालम्बते)

सुरुचिः – हा ! यदशङ्कि तदापतितम् (इति वदन्त्यश्रूणि मुञ्चति)

अभ्यसूया – देवि ! समाश्वसिहि समाश्वसिहि, अस्ति शेषं किमपि श्रोतव्यम् ।

राजा – प्रिये ! शेषमपि निःशङ्कातङ्कमुच्यताम् ।

सुनीतिः – न त्याज्येति ममार्थना ॥१०॥

(इति वदन्ती सास्रं महाराजस्य पादयोः पतति)

राजा – (साश्चर्यानन्दम्) अयि प्राणप्रिये ! अलौकिकं खल्विदं ते महापकारपरेष्वपि परेषु महोपकारकरणपरायणान्तःकरण-त्वम् । यद्येवमेवाग्रहस्ते तर्हि परतन्त्रः खल्वहं वरप्रदानेन ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तन्महादण्डपात्रीभूताया अपि तस्या न त्यागं करिष्यामि ।

सुनीतिः – (साञ्जलिबन्धम्) नाथ ! परममनुगृहीतास्मि ।

विवेकनिधिः – देव ! अलौकिकं लोकोत्तरं च सकलसद्गुण-
-वसतीनां महासतीनां चरितमिति लोकोक्तिर्युक्तैव ।

राजा – अथ किम् । दृश्यते तत्सर्वं सुनीत्याम् । एवं महोप-
-कारभारकारिणीमप्येनां सुरुचिरभ्यसूया च जानीते किम् ?
जानीयाच्चेत् किं कदाचिदप्येतस्यै द्रुह्येत् ?

अभ्यसूया – इदानीमवसरो गन्तुं राजसमीपं ते ।
(कर्णे एवं एवम्)

सुरुचिः – तर्हि गच्छावः (इत्युक्त्वा प्रविश्य) प्राणनाथ ! प्रणमाम्यहं सुरुचिः ।

अभ्यसूया – देव ! देवस्य पादपद्मपरिचारिकाभ्यसूया वन्देऽहम् ।

राजा – (निश्वस्य) सुरुचे ! यदर्थमाहूतासि तत्तु विघ्नितं सुनीत्या । परं वत्सं ध्रुवं तपोवनं प्रेषयन्त्या त्वया कृतं निष्फलं जन्म जीवितं च मे । नैतावदेव दुष्कीर्तिश्च कल्पस्थायिनी कल्पिता मे । सर्वस्याप्यस्यानर्थस्य मूलमेवा पापाशयाऽभ्यसूयैवेति – निःशङ्कं जानामि । किं करोमि सुनीत्या वाक्यबन्धेन बद्धोऽस्मि ।

सुरुचिः – प्राणनाथ ! अथित यदुच्यते प्राणनाथेन तत्सर्वं मयैव पापया निर्मितम् । परं किं करोम्यहमप्यभ्यसूयाया वचनैरेव वञ्चितास्मि । सुधामयीमपीमां प्रियस्वसारं मे सुनीतिं विषवल्लरीमेवापश्यम् । सन्तापयतीदानीं मे प्रमादः प्राणनाथमिव मामपि । परं व्यतीते किं कर्तव्यम् ?

अभ्यसूया – देव ! परमापराधवत्यहं न किञ्चिद्वक्तुं शक्नोमि ।
(इति वदन्त्यश्रूणि मुञ्चति)

सुनीतिः – प्राणनाथ ! प्रार्थितपूर्वमेव मया मदीयाल्पभाग्यवत्तां विना न कश्चिदस्त्यपराधी जन इति । ततो न कस्याप्येतद्वि-
-षये दुःखं विधेयम् ।

राजा – देवि ! प्रार्थितपूर्वमवैतत्तथापि वत्सस्य ध्रुवस्य वियोग-
दुःखं स्वनिमित्तभूतानि भूतानि न विस्मारयति ।

कमलामलकोमलाननो
नहि यावद्ध्रुव उत्तमोत्तमः ।
मम लोचनगोचरो भवेद्
CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वद तावत्कुत एव मे सुखम् ॥ ११ ॥

सुरुचिः – यथाह देवः ।

अभ्यसूया – यथाह महाराजः ।

विवेकनिधिः – एवमेवात्र कः सन्देहः ।

राजा – प्रिये ! वत्सस्य ध्रुवस्य वियोगदुःखं मम हृदये किं किं करोतीति न वक्तुं शक्ता जिह्वा मे ।

(अश्रूणि मुञ्चति)

सुनीतिः – नाथ ! जानामि तत्सर्वम् । तथापि व्यतीतचिन्ता निष्फलेति मत्वा तां त्यक्तुं प्रार्थये ।

राजा – (नेत्रे निमील्य अनाकर्ण्य)

वत्स हे ध्रुव सितस्मितोज्ज्वलं
लोललोचनयुगं तवाननम् ।
सौम्य सौम्यमिह हा ! क्व वा पुन-
र्लोचने मम विलोकयिष्यतः ॥ १२ ॥

(मूर्च्छया पतति)

सुनीतिः – (स्वगतम्) हा ! अतिभूमिं गतोऽयं सन्तापो महाराजस्य । (प्रकाशम्) नाथ ! समाश्वसिहि समाश्वसिहि ।

(शीतोपचारान् कुरुते)

विवेकनिधिः – (कदलीदलेन वीजयति)

सुरुचिः – (पादसंवाहनं कुरुते)

अभ्यसूया – (सुरुचिसमीपमुपेत्य कर्णे) भर्तृदारिके ! इदानीं महाराजस्य ध्रुववियोगोऽतीव दुःखदः । ततो ध्रुवानयनायाहमभ्यसूयां प्रेषया-मीत्युक्त्वा महाराजस्य मनःप्रीतिं सम्पादय । महाराजेन त्वया चाज्ञप्ताहं ध्रुवमवश्यमानेष्यामि । तदपि तस्य तपोभङ्गात्त्वदीयं हितमेव ।

सुरुचिः – एवं करिष्यामि ।

राजा – (संज्ञामुपलभ्य) वत्स ध्रुव ! विना त्वया शून्यमिदं जगन्मे । किं च

नैका घटी न च लवो निमिषोपि नैक-
स्तादृक् प्रयाति मम पुत्र न यत्र यत्र ।
ते ते गुणास्तव गुणार्णव शीलसिन्धो,
मामश्रुपूर्णनयनं रचयन्त्यनेके ॥ १३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुनीतिः - प्राणनाथ ! प्राणनाथ ।
विरम विरम नैतच्छ्रोतुमेवास्ति शक्ता
चरणकमलदासी तावकी नातिदीना ।
धृतिरपि धृतिहीना मामकीना विलीना
क्वचिदहह विमूढश्चायमप्यन्तरात्मा ॥ १५॥
वत्स ध्रुव ! क्व वा कदा वा तव मुखदर्शनसुखमनुभविष्यामि ।

सुरुचिः - प्रिय स्वसः सुनीते सुनीते समाश्वसिहि समाश्वसिहि, पराञ्चलेन वीजयन्ति । (मूर्च्छया पतति)

सुरुचिः - (क्षणेन संज्ञामुपलभ्य स्वगतम्) हा ! महान् प्रमादो मे । धैर्यमुन्मुच्य महाराजस्य मनसि महादुःखवृद्धिर्निर्मिता मया । (प्रकाशम्) प्राणनाथ ! साम्प्रतं धैर्यस्थैर्यमन्तरा नास्त्यन्य आश्रयः ।

राजा - प्रिये ! जानाम्येवैतत्सर्वम् । तथापि न धैर्यं धारयति बुद्धिः । किं करोमि ?

सुरुचिः - प्राणनाथ ! अस्त्येक उपाय एतद्दुःखोपशान्तेः ।

राजा - क इव ?

सुरुचिः - अभ्यसूयैव ध्रुवमत्रानयेदिति ।

राजा - प्रवृत्तिमन्तरा कुत्र गन्तव्यमभ्यसूययेति न वक्तुं शक्नोमि ।

सुरुचिः - नाथ ! श्रुतमितः प्रस्थितस्य वत्सस्य ध्रुवस्य मार्गे कश्चिन्मुनिवरो मिलितः ।

राजा - ततस्ततः ।

सुरुचिः - ततस्तेन मुनिना बहु बहु नगरागमनाय बोधितोऽपि ध्रुवो न प्रतिनिवृत्तः ।

सुनीतिः - (स्वगतम्) दृढाग्रहः खलु वत्सः । न कथंचन केनापि प्रतिनिवर्तयितुं शक्यः ।

राजा - कुतस्तादृशं मे भाग्यं स्याद्येन वत्सो मे प्रतिनिवर्तेत । ततस्ततः ?

सुरुचिः - ततस्तेन कृपालुना मुनिवरेण वत्सस्य कर्णे किमपि उपदिष्टमुक्तं च- वत्स ! श्रीयमुनायास्तीरे विलसति विविधविहंगराजिविराजितं मधुवनं नाम तपोवनं तत्र गत्वा तपस्त्वया रचनीयमिति । (तपनीयमिति- शुद्ध)

राजा - तेन हि मधुवनं प्रति प्रस्थितो ध्रुव इति प्रतिभाति ।

सुरुचिः - अथ किम् ! तत एव तत्र गत्वाऽभ्यसूया ध्रुवमानेष्यति ध्रुवम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

"राजा – यद्येवं स्यात्तर्हि तु सैवाभ्यसूया मे प्रेमास्पदं स्यात् ।
अभ्यसूया – देव । देवाज्ञोत्तरक्षण एव तत्र गन्तुमुत्कण्ठितास्मि ।
सुरुचिः – प्राणनाथ । यावद् ध्रुवागमनं नाहमभ्यसूयाया मुखमप्य-
-वलोकयिष्यामि ।
अभ्यसूया – महाराज ! आज्ञाप्यतामियं दासी । येन कुमारमत्रानीय मल्ललाटलग्नं कलङ्कमहं क्षालयामि ।
राजा – प्रिये सुनीते ! एतद्विषये त्वन्मनः किं मनुते ?
सुनीतिः – प्राणनाथ! दृढनिश्चयो वत्सो ध्रुवो न केनापि निवार-
यितुं शक्यः । तद्व्यर्थ एव अभ्यसूयायाः प्रयास इति मे प्रतिभाति। तथापि यथा कथंचिद् ध्रुवः प्रतिनिवर्तेत चेत्प्रियात्प्रियतमं मे ।
राजा – प्रिये! 'यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः' इत्याप्तो-
-पदेशानुसारेण प्रयतितव्यं खलु वत्सस्य तपोवनात् प्रतिनिवृत्तये । तदभ्यसूये ! गन्तव्यं त्वया श्वः प्रातः समये मधुवनम् । दास्यामि तुभ्यं ससारथिकं रथं द्वौ किङ्करौ च सह गन्तुम् ।
अभ्यसूया – महान् प्रसादः ।

(प्रणमति)

सुरुचिः – प्राणनाथ ! मदीयः सारथिर्मदीयौ किङ्करौ मदीयो रथश्चाभ्यसूयया सह गमिष्यन्ति । न प्राणनाथेन तद्विषये चिन्ता विधेया।
राजा – भवतु ! अपरस्वबुद्धयः खलु वयं भवत्या विभवेषु । परमविलम्बेन प्रेषणीया ध्रुवानयनायाभ्यसूया ।
सुरुचिः – कथमिव विलम्बं करिष्यामि । कुमारस्य मुखदर्शनमुख-
मन्तरा वासरोऽपि वत्सरायते मे ।
राजा – एवमेव मयाऽप्यनुभूयते सर्वम् ।
सुनीतिः – प्रियस्वसः सुरुचे ! युक्तैव भवत्या उक्तिः ।
अभ्यसूया – (स्वगतम्) पुनः प्रेमजाले बलान्निक्षिप्तो महाराज-
मनोमृगो देव्या सुरुच्या (प्रकाशम्) महाराज ! युष्मदीयदुःख-
दर्शनाक्षमं मनो मे त्वरयतितरां मां मधुवनं गन्तुम् ।
विवेकनिधिः – (स्वगतम्) निष्पापहृदयः खलु महाराजो देवी सुनीतिश्च। वत्सस्य ध्रुवस्य तपोविघ्नायैवायं सर्वः प्रपञ्चः सुरुच्यभ्यसूययोर्जा-
गर्ति । अस्तु, समये सर्वं विज्ञापयिष्यामि ।

(इति वदन्, तूष्णीं तिष्ठति)

राजा – (मन्त्रिमुखमवलोक्य) सखे विवेकनिधे ! ध्रुवानयनाय

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मधुवनं प्रतिगन्तव्यमभ्यसूययैतद्विषये किं मन्यते भवदीयोऽन्तरात्मा ? 67

विवेकनिधिः – देव देव्यौ च ! यद्यप्युत्तममतमोऽयं विचारो विहितः सर्वैरपि श्रीमद्भिर्ममाप्यनुमततमः प्रियतमश्चायं विचारस्तथापि किञ्चिदस्ति विज्ञाप्यम् ।

राजा – कामं विज्ञाप्यताम् ।

विवेकनिधिः – महाराज! कुमारोऽपि महाराजकुलसंभवः सदाग्रहग्रस्तश्च । नैवं त्वरिततरं निश्चयाच्चालयितुं केनापि शक्यः । ततः सकलोऽपि निष्फल एवेदानीं त्वरया रचितोऽभ्यसूयायाः प्रयास इति मे प्रतिभाति ।

राजा – तर्हि कतममार्ग आश्रयणीय इति भवतैव वक्तव्यम् ।

विवेकनिधिः – व्यतीतेषु कतिपयेषु वासरेषु तपोवननिवासदुःखानुभवखिन्नस्य तपश्चरणपरिश्रान्तस्वान्तस्य च कुमारस्य हृदयेऽभ्यसूयाभ्यर्थनावचनानि यथाकथंचित्स्थितिं कर्तुं शक्ष्यन्तीति मे प्रतिभाति । तेन मासादनन्तरं मासद्वयादनन्तरं वा गन्तव्यं मधुवनमभ्यसूयया ।

राजा – एवमेव । अभ्यसूये । नाधुना त्वया गन्तव्यम् । सति समये तत्र गमनायाहं त्वामाज्ञापयिष्यामि ।

सुरुचिः – (स्वगतम्) कृतो विघ्नः पापेन विवेकनिधिना (प्रकाशम्) प्राणनाथ ! दीर्घदर्शी खलु मन्त्रिवर्यः । ततस्तन्मतानुसारेणाहमपि कतिपयेभ्यो वासरेभ्योऽनन्तरं प्रेषयिष्याम्यभ्यसूयाम् । अस्ति चेदाज्ञा तर्हि गच्छामि ।

राजा – यथासुखं गम्यताम् ।

(सुरुचिः प्रणम्य सहाभ्यसूयया निष्क्रान्ता)

विवेकनिधिः – देव ! युवयोर्निष्कपटमतिकोमलं च मनः सर्वान् निर्मलमनसः कोमलमनसश्च पश्यति । परमभ्यसूया तु कुमारस्य तपःसिद्धावपि साभ्यसूयेति मन्तव्यम् । सुरुचिश्चाभ्यसूयावशंवदेति नाविदितं देवस्य । ततो न ध्रुवानयनायाभ्यसूया प्रेषणीयेति मतं मे ।

राजा – विवेकनिधे ! युक्तमुक्तं भवता । ममापि मनस्तथैवाङ्गीकुरुते ततस्तथैव करिष्यामः ।

विवेकनिधिः – महाराज ! यदि कदाचित्कपटकरण्डपिशुनापीडया: सहायकरा नरा नगरे निवसेयुश्चेत्तानपि सर्वान्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कारागारावासान् कर्तुमातप्तमात्मानमिच्छामि । येन न पुनस्तादृशं प्रपञ्चं कर्तुं कोऽपि शक्नुयुः ।

राजा – अथ किं सम्यक् स्मारितम् । एतदविलम्बेनैव कर्तव्यम् - तत्साधयतु भवांस्तत्करणाय ।

विवेकनिधिः – यथाज्ञा देवस्य !

(निष्क्रान्तः)

राजा – प्रिय सुनीते ! न ध्रुवविषयिणी चिन्ता क्षणमपि मुञ्चति चित्तं मे ।

भवनं क्व महामणिप्रभा -
विजितस्वर्भवनं त्विदं प्रिये !
क्व घनं विजनं वनं च हा !
वद तस्मिन् स कथं निवत्स्यति ॥ ५ ॥

तिमिरं गृहकोणगं च य -
स्त्ववलोक्याप्यभजद्भियं मुहुः ।
स कथं नु भयं भयङ्करे
न वने यास्यति हिंस्रसङ्कुले ॥ ६ ॥

(सनिःश्वासं विचारमग्नो भवति)

सुनीतिः – हा महाराजस्य मनः पुनरपि कुमारविषयकविचारपारावारे मग्नं दृश्यते । (प्रकाशम्) प्राणनाथ ! औदास्यदास्यपद-प्राप्तया निष्कान्तिलेशलास्यमास्यकमलमिदं ते दीर्घ-दीर्घनिःश्वासपरंपरानुमेयमन्तःसमुच्छलदभङ्गुतरं दुःखसागरं च ते द्रष्टुं न मे दृष्टिरियं शक्तिवती । ततः सर्वान् विचारान् विसर्ज्य प्रमदवनमेतत्कमलकोमलया पदपङ्क्त्यालं-करोतु प्राणनाथो मे । तत्रत्यां च परमेश्वरशक्त्या विकासितां कोमलतां निर्मलतां चावलोकयतस्ते देवस्य मनः कामपि प्राप्स्यति । शान्ति लभस्व च देव मनसि ममापि मनः शान्ति शान्तिं सुखमास्यतीति प्रार्थना मे ।

राजा – (स्वगतम्) अहो ! सुनीतेर्मयि निष्प्रतिमं प्रेमगौरवम् । मदीयं दुःखं दृष्ट्वा महाराजोऽप्यधिकं दुःखितो भविष्यतीति मनसि विचार्यापारमपि स्वकीयहृदयगतं दुःखपारावारं न मनागपि दर्शयति । नैतावदेव मामपि विषयान्तरे नियोज्य दुःखविस्मरणाय स्वयं प्रयत्नपरम्परां रचयति । पतिव्रतानां तु काप्यलौकिकी मनोवाक्कायप्रवृत्तिः । ता हि

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स्वकीयेनाप्रतिमेन पातिव्रत्येनैव विजयवत्यो भवन्ति । (उत्थाय प्रकाशम्)
देवि ! यथा तेऽभिरुचितं तथा कर्तुमवहितोऽस्मि । तथापि कुमारचिन्ता न क्षणमपि मे चित्तं मुञ्चति तेन नानानेकविचारवारिधिवीचिनिमग्नं मां न राज्यसुखान्यप्यानन्दयन्ति । हा ! कपटिनः कपटकरण्डस्य पापिनः पिशुनापीडस्य च वाक्यजालान्धपटपिहितदृष्टितया नाहं किमपि द्रष्टुं शक्तोऽभवम् । परं त्वया कुमारं तपोवनगमनमाज्ञापयन्त्या दुष्करतरमेवाचरितम् ।

सुनीति - प्राणनाथ ! बहुधा निवारितोऽपि वत्सो ध्रुवः स्वनिश्चयान्न चलितः । किं करोमि ? ये ये विचाराः प्राणनाथस्य चेतसि स्फुरन्ति ते ते विचाराः सर्वेऽपि ममापि मनसि प्रतिक्षणं स्फुरन्त्येव । परं किं कर्तव्यम् ? का गतिरन्या प्रणतजनवत्सलाद्भगवतः श्रीक्षीरनिधिनन्दिनीहृदयदैवतादखिलदैवतदैवताच्छ्रीनारायणात् ततस्तमेव शरणं यावः । स एव सर्वं श्रेयः करिष्यतीति न देवेन चिन्ता विधेया ।

(निष्क्रान्तौ)

———— ० ————

॥ इति श्रीमत्सद्गुरुकेशवकृपाकल्पवल्लरीपल्लवायमाने
श्री ध्रुवाभ्युदयनाम्नि नाटके चतुर्थोऽङ्कः ॥

माहेश्वरात्मजनुषोर्द्धशशाङ्कमौले -
र्दासस्य वर्यगुरुकेशवधर्मसूनोः ।
एषा कृतिर्मम जटाशिवमित्रमौले-
र्गौरीगिरीशपदयोः कुसुमाञ्जलिः स्यात् ॥ १ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ अथ पञ्चमोऽङ्कः ॥

(ततः प्रविशति सुरुचिरभ्यसूया च)

अभ्यसूया – देवि ! स्वहिताहितज्ञानविमुखैव मतिस्त्वेति मतिर्मे ।

सुरुचिः – अभ्यसूये ! कथमेवं मन्यसे ?

अभ्यसूया – ध्रुवस्य तपोवनं गतस्यायं पञ्चमो मासः प्रयाति । स खलु मधुवनं गत्वा भगवन्तमर्चयंस्तपश्चाचरन् त्रिरात्रान्ते त्रिरात्रान्ते कपित्थबदराशनः प्रथमं मासं निन्ये ।

सुरुचिः – ततस्ततः ?

अभ्यसूया – स्वयं शीर्णैस्तृणपर्णादिभिर्विहिताशनक्रियो द्वितीयं मासं निन्ये ।

सुरुचिः – (स्वगतम्) इयं शीताम्बुना पापोपशान्तिः ततस्ततः ?

अभ्यसूया – नवमे नवमेऽहनि सलिलमात्रप्राशनस्तृतीयं मासं निन्ये ।

सुरुचिः – (स्वगतम्) नात्र हानिर्मे (प्रकाशम्) ततस्ततः ?

अभ्यसूया – द्वादशे द्वादशेऽहनि वायुभक्षश्चतुर्थं मासं निन्ये इति श्रुतं मया तत्र प्रेषितेभ्योऽस्मदीयेभ्यश्चारेभ्यः । ईदृशेन तपसा चावश्यं परमेश्वरप्रसादपात्रं भवितैव ध्रुवः । सति च तस्मिन् परमेश्वरप्रसादपात्रे हता त्वं सपुत्राऽहं च । सकामा च सा सुनीतिः । नैतावदेव, अन्याप्यनेकानर्थपरंपरा भवित्रीति मनसि किमपि न विचारयसि । न प्रेषयसि च माम्, मधुवनं तत एव स्वहिताहितज्ञानानभिज्ञा भवतीति मतं मे ।

सुरुचिः – अयि मदीयहितैषिण्यभ्यसूये ! द्वित्रिवारं प्रार्थितोऽपि महाराजो नाधुना प्रेषणीयेति वदति । पापो विवेकनिधिश्च महाराजवचनमनुमोदते । किमत्र मया करणीयम् ?

अभ्यसूया – भर्तृदारिके ! अनाज्ञप्ताप्यहं महाराजेन मधुवनं गच्छामि । तत्र गत्वा च ध्रुवस्य सर्वप्रकारैस्तपोभङ्गं करिष्यामि । त्वया पुनरेवं कर्तव्यम् । (कर्णे किञ्चिद्वदति)

सुरुचिः – यथोक्तं प्रियसख्या सर्वं तथैव करिष्यामि ।

अभ्यसूया – अवेहि मां तर्हि मधुवनं गन्तुमद्यैव प्रस्थिताम् ।

सुरुचिः – हला अभ्यसूये ! कार्यसिद्धिं विधाय त्वरया त्वयाऽऽगन्तव्यम् । बिना त्वया क्षणमपि न किमपि रोचिष्यते ।

अभ्यसूया – देवि ! दासीजनेऽस्मिन् देव्या ईदृशी ममतास्तीति परमोपकारं मन्येऽहम् । (इत्युक्त्वा निष्क्रान्ता)

सुरुचिः – गता हितैषिणी मेऽभ्यसूया तदहमपि रहसि गत्वा तदुक्तं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सर्वं सम्पादयामि । रहःस्थितिर्हि सर्वेषां विचाराणां परमपोषणकरीति केषामविदितम् ।

(निष्क्रान्ता)

(ततः प्रविशति सचिन्तो राजा)

राजा — व्याघ्रवानरवराहगजर्क्षैः
सङ्कुलेऽत्र विजने विपिने सः ।
क्षुत्तृषाकुलमना वनवाते -
राकुलः कथमवाप्स्यति धैर्यम् ॥ १ ॥
यः शिरीषकुसुमाधिकमुच्चै -
र्मार्दवं वपुषि चारु बिभर्ति ।
हा कथं स शयनं बत कर्ता
दुःसहेषु विरसेषु कुशेषु ॥ २ ॥

(निःश्वस्य) हा ! न कापि वत्सस्य ध्रुवस्य प्रवृत्तिरुपलब्धाऽद्यापि ।

(ततः प्रविशति सुरुचिः)

सुरुचिः — प्राणनाथ । दिष्ट्या वर्धसे वत्सस्य ध्रुवस्य कुशलप्रवृत्त्या ।

राजा — (सहर्षम्) एहि एहि प्रिये सुरुचे ! कीदृशी वत्सस्य ध्रुवस्य प्रवृत्तिः कुतो वा त्वयोपलब्धेति ज्ञातुमिच्छामि । तद्विस्तरेणाभिधेहि ।

सुरुचिः — (सर्वतोऽवलोक्य स्वगतम्) अस्तीदानीं समयः । (प्रकाशम्) वत्सो ध्रुवस्तु स्वमातुलगृहे कुशलमनुभवति ।

राजा — असम्भवितमेतत् । यः पितृराज्यं परित्यज्य मातुरपि वचनान्यनादृत्य तपोवनं गतः स कथं मातुलगृहे निवासं कुर्यात् ?

सुरुचिः — यत्तपोवनमुपेत्य साध्यं तदेव मातुलगृहनिवासेन साध्यं चेत्किमर्थम् मातुलगृहे निवासं न कुर्यात् ?

राजा — स्फुटं कथय । भवत्या वचोऽभिप्रायो नावगम्यते ।

सुरुचिः — प्राणनाथ ! विदितमेव देवस्य राज्यसिंहासनार्हतां सम्पादनायैव तपः कर्तुं मधुवनं प्रति तस्य प्रयाणमभवत् । सा च मातुलगृहनिवासेनैव सेत्स्यतीति तपःक्लेशं किमर्थं कुर्यात् ?

राजा — कथमिव ?

सुरुचिः — मातुलसेनासाहाय्यं गृहीत्वा युद्धेन युष्मान् पराभूय राज्यासनमारोक्ष्यति ।

राजा — (सहासम्) सुरुचे ! पुनरप्यभ्यसूययाऽन्येन वा केनाप्यसहिष्णुना भ्रान्तिदेव्या बलितामपनीतासि । मातृभक्तपितृभक्तशिरोमणि -

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वत्सो ध्रुवः स्वप्नेऽप्येतन्न चिन्तयेत् ।

सुरुचिः — नाथ ! नैतन्मया रोषान्मत्सरेण वोच्यते । किंत्वेतद्विषये - तु मे परमः परितोषो येन सुरुचिवाक्शरप्रहारव्यथितो वत्सो ध्रुवस्तपोवनं गत इति आकल्पस्थायी क्षालितो कलङ्कः कपालात् ।

राजा — (स्वगतम्) सुरुच्या पुनरपि भ्रान्तं मनः । (प्रकाशम्) प्रिये ! क्वास्ति साम्प्रतमभ्यसूया ।

सुरुचिः — सा तु मया मधुवनं प्रेषिता । प्रयातेष्वपि पञ्चसु मासेषु विवेकनिधिसंमत्या न महाराजेनाज्ञा कृता तथापि निष्क- -पटमनस्कायाः मम तु मनः शङ्काशतसमाकुलमभवत्, तेन वत्सस्य ध्रुवस्य समीपं सा प्रेषिता । अनन्तरं च वत्सो ध्रुवो मातुलगृहे वसतीत्यद्यैव मया ज्ञातम् । ज्ञात्वा चानन्दसुधाब्धौ निमग्ना महाराजायानन्दवृत्तमेतन्निवेदयितुमा- - गतास्मि ।

राजा — प्रथमं त्वमेव कथितवत्यसि यद् ध्रुवस्तु केनचिन्मुनिना बहु बहु गृहागमनोपदिष्टोऽप्यनादृत्य तद्वचांसि तस्मादेव मुनेर्गृहीतमन्त्रो मधुवनं प्रति प्रस्थित इति । इदानीं पुनर्ध्रुवो मातुलगृहे वसतीति कथयसि । कतमदेतयो- र्मध्ये सत्यं मन्तव्यम् ?

सुरुचिः — प्राणनाथ ! पूर्वं यन्मयोक्तं तत्तथैवाभवत् । परं युष्माकं परमहितैषिणो मन्त्रिवर्यस्य विवेकनिधेरस्त्येत- द्विषये महानविस्मार्य उपकारभारः ।

राजा — कथमिव ?

सुरुचिः — सहजस्नेहसान्द्रस्वान्तेन तेन मध्यमार्गं गत्वा कुमार ! कातरतरनरशरणमेषा सरणी यत्तपसाभ्यर्थितार्थसंपादनम् । ततस्तां विहाय मातुलगृहं गत्वा तदीयसाहाय्यं संपाद्य सद्यः संपादितराज्यसिंहासनारोहणेन भाव्यं भव्येन भवता । अहमपि मनोवाक्कर्मभिर्गुप्ततरं भवत्साहाय्यं करिष्याम्येव इति सशपथशतमुपदिष्टम् वत्साय ध्रुवाय ।

राजा — (स्वगतम्) केनापि कपटपटुना वञ्चितेयम् (प्रकाशम्) ततस्ततः ?

सुरुचिः — ततस्तदीयात्यंताग्रहग्रहगृहीतहृदयो वत्सो मधुवनपथान्निवृत्य मातुलगृहान् गत इति श्रुतं मयाऽऽप्ततमानां वचनैः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा – सुरुचे ! विवेकनिधावपि स्वामिद्रोहारोपं ब्रुवेपि पितृद्वेषारोपं चारोपयद्भिर्वचनैरेव लक्ष्यते तवामाप्ततमता ।

सुरुचिः – नाथ ! नास्ति मे कश्चिदाग्रहः परं स्वपरतानानभिज्ञतेयं भवदीया भवदीयमन्तःकरणमनुतापयिष्यति ।

राजा – (स्वगतम्) यद्येवमहं स्वपरतानानभिज्ञस्तर्हि स्वपरतानाभिज्ञया त्वया के स्वे के च परे इति दर्शनीयाः ।

सुरुचिः – परमस्मद्वचसि कस्यास्ति प्रत्ययः ?

राजा – (स्वगतम्) ज्ञातव्य इदानीं तस्या आशयः (प्रकाशम्) प्रिये ! अस्ति मे त्वद्वचसि प्रत्ययः । निर्विशङ्कमुच्यतां कांस्कांस्त्वं स्वान् गणयसि कांस्कांश्च त्वं परान् गणयसीति ।

सुरुचिः – नाथ ! यद्येवं तर्हि निवेद्यते । कामसेनलोभचन्द्र-मत्सरदासादयः सर्वेऽस्मदीया इति मे प्रतिभाति । विवेक-निधिविचारशर्मविनयचन्द्रादयः सर्वे परकीया इति मे मतम् ।

राजा – (स्वगतम्) विपरीतैव खल्वस्या बुद्धिः । भवतु, ज्ञातव्यमेव सर्वं तस्या हार्दम् (प्रकाशम्) तद्धितः परं किं कर्तुमिच्छसि ?

सुरुचिः – कामसेनः सेनापतिर्विधेयः । लोभचन्द्राय प्रधानपदमर्प-णीयम् । मत्सरदासश्च कोशाधिकारी कर्तव्यः ।

राजा – अथ विवेकनिध्यादीनां का गतिः कर्तव्या ?

सुरुचिः – विवेकनिधिस्तु प्राणान्तशिक्षापात्रम् येन स्वामिद्रोहो विरचितः ।

राजा – परयोः किं विधेयम् ?

सुरुचिः – विचारशर्मा देशान्निष्कासनीयो यतः सोपि विवेकनिधि-सहायकरोस्ति । विनयचन्द्रश्च यावज्जीवं कारागारावासः कार्यः । सोपि कामसेनादिविरोधी विवेकनिधिपक्षपाती चास्ति ।

राजा – (सरोषम्) सुरुचे ! सुरुचे ! श्रुतं श्रोतव्यं ज्ञातं च ज्ञातव्यम् । नातः परं कदाचिदेवं वक्तव्यम् । वञ्चितासि केनापि कपटपटुना पामरेण । यदुच्यते त्वया विवेकनिधौ स्वामिद्रोहः स स्वप्नेपि न संभवति । न ध्रुवोपि स्वप्नेपीदृशानिनयपात्रतामुपगच्छेत् । मृषैव तवान्तःकरणं केनचिद्भ्रमचक्रे निक्षिप्तम् ।

सुरुचिः – प्राणनाथ ! कस्यान्तःकरणं भ्रमचक्रारूढमस्तीति पत्रमेवैत-न्निवेदयिष्यति ।

(इत्युक्त्वा कञ्चुकात्पत्रं निष्कास्य दर्शयति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा - (पत्रं गृहीत्वा) कस्येदं पत्रं केन प्रेषितं च ?

सुरुचिः - विलोक्य निर्णीयतां कस्येमान्यक्षराणीति ।

राजा - (निपुणं निर्वर्ण्य) वत्सस्य ध्रुवस्येवाक्षराणि इति मे प्रतिभान्ति ।

सुरुचिः - नेत्रातिथिर्विधीयतामिदानीमखिलोऽपि लेखसारः ।

राजा - (पत्रमुद्धाट्य वाचयति)

परमदयामृतमयाशयानां श्रीसुनीतिमातृचरणानामाज्ञानुसारी कुशली किल परमेश्वरप्रसादाद् ध्रुवः । कुशलमनुदिनमेधमानमीहते च मातृचरणानाम् । युष्मच्चरणसमीपात्प्रस्थितस्य मे व्यतीताः साधिकाः पञ्चमासाः परं प्रवृत्तिपरतन्त्रतया मन्त्रभेदभियाच नाद्याऽवधि पत्रप्रेषणं कर्तुं प्राभवं तदद्य लिख्यते । युष्मत्प्रेषितेन परमहितैषिवर्येण विवेकनिधिना शपथसहस्त्रार्पणपूर्वमाज्ञप्तोऽहं मातुलकुलगमनाय ततस्तपोवनगमननिश्चयं परित्यज्यागतोऽहमिमां मातुलराजधानीम् । एकत्रसंधीकृता अत्र पञ्चाक्षौहिण्यः सेनाः । अकस्मादेवैकदा तत्रागत्य महाराजं सुरुचिमभ्यसूयामुत्तमं च कारागारावासिनं विधाय पितृपैतामहे मे राज्यसिंहासनेऽभिषेक्ष्यन्ति भार्या मातुलवर्याः । एतत्कर्तुमार्यो विवेकनिधिश्च बहुलं साहाय्यं करिष्यति करोति च । तेन मातुलानामिव विवेकनिधेरपि नोपकारभारः कदापि विस्मार्यः ।

धैर्यं धार्यं ततो मातर्गतास्ते दुःखवासराः ।
राज्यसिंहासनारूढं सद्यो द्रक्ष्यसि ते सुतम् ॥ ३ ॥

एतत्पत्रहारको ब्राह्मण आभ्यन्तर एतद्राज्यस्येति श्रीमत्याः समीपे प्रेषितोऽस्ति ततो निर्विलम्बेन सत्कृत्यातिगुप्तं विसर्जितव्यः । लिखितमिदं पौषमासवलक्षपक्षपूर्णिमायां चन्द्रे । अन्यच्च सर्वं द्वित्रेभ्यो वासरेभ्योऽनन्तरं श्रीमत्याः समीपमुपेत्य निवेदयिष्यामि ।

महाराजकुमारः
श्रीध्रुवः

(पत्रमधः संस्थाप्य स्वगतम्) अहो ! किमेतच्चन्द्रमस्यप्यूष्मा ।
न प्रत्येति वत्सं ध्रुवं प्रतीदृशीं कुटिलतां मानसं मे ।

सुरुचिः - देव ! दृष्टं कौटिल्यं प्रियपुत्रस्य वो ध्रुवस्य प्रियमित्रस्य वो विवेकनिधेः प्राणप्रियायाश्च वः सुनीतेः ?

राजा - सन्ति खल्वक्षराणि ध्रुवस्य मुद्राऽपि ध्रुवस्यैव तथापि -

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नान्तरात्मा मे ध्रुवे तादृशं कौटिल्यं शङ्कते।

सुरुचि: (स्वगतम्) नाधुना मया वत्सस्य ध्रुवस्य निन्दा विधेया। (प्रकाशम्) सत्यं वत्से ध्रुवे नास्ति कौटिल्यम्। परं विवेकनिधिसुनीतिभ्यां बलात्कौटिल्यं शिक्षितो वत्स इति मे प्रतिभाति।

राजा - (क्षणं विचार्य) सुरुचे कथमेतत्पत्रं त्वदीय करगतमभवत्?

सुरुचि: - प्राणनाथ! नाद्यापि पापायां मयि विश्वास: प्राणनाथस्य? भवतु, तदपि निवेद्यते। गतेह्नि प्रात: समये जलानयनाय गच्छन्तीं मे दासीं कपटपेटिकां विलोक्य कश्चिद् ब्राह्मणो 'भद्रे! आकृतिरेव ते निवेदयति राजकीय दासीत्वं तत्पृच्छामि कस्या असि दासि' इत्यपृच्छत्। कपटपेटिकया च महाराज्ञ्या अस्मि दासीत्युक्ते 'यद्येवं तर्हि त्वं सुशीला सुचरितानसूया वा तास्य: काप्यपरासि' इति पृष्टं। ततो निपुणया तया सुशीलैवाहमस्मीत्युक्ते 'भद्रे! तर्हि पत्रमिदं देव्या: सुनीत्याहस्ते समर्पणीयम्' इत्युक्त्वा पत्रं कपटपेटिकाया: करे समर्पितं तया च मह्यं दत्तम्, मया च महाराजाय निवेदितम्। अत: परं महाराज: प्रमाणम्।

राजा - क्वास्तीदानीं स ब्राह्मण:?

सुरुचि: - सदन्नसुवस्त्रालङ्कारसमर्पणै: सत्कृत्य 'पुनरपि शुभपत्रं गृहीत्वागन्तव्यम्। अत्रैव वाप्या: समीपे मे मिलनं भविष्यति' इत्युक्त्वा कपटपेटिकया विसर्जित:। परलोकावलोकनभीरु: सोऽपि प्रपलायित:।

राजा - (सदीर्घनि:श्वासम्) सुनीतिर्विवेकनिधिश्चैतादृशीं कपटरचनां रचयेदिति न प्रत्येति मानसं मे।

सुरुचि: - युष्मन्मनस्तु तदैव प्रत्येष्यति यदैव कारागारे स्थितिर्भविष्यति। 'विनाशकाले विपरीत बुद्धि:' इति लोकोक्तिर्न मृषा। (इत्युक्त्वा त्यातुमिच्छति)

राजा - सुरुचे! मा रोषं कुरु, विचार्यते किमपि मया।

सुरुचि: - किं विचारेण? विचारितमेव मम ललाटे लिखितमविश्वासपात्रत्वं सुनीत्या: कपाले विश्वासपात्रत्वं च। (इति वदन्त्यश्रूणि मुञ्चति)

राजा - देवि! नास्त्यौदास्यकारणम्। ईदृशेऽतिगहने विचारविषये न किमपि सहसा कर्तुं शक्यते। तत: पूर्णं विचारं विधाय यथोचितं करिष्यामि। साम्प्रतं तु शयने गत्वा शय्याया अङ्कमेव शरणं करिष्यामि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

करवाणि । समुच्छलन्ति मे हृदये दुःखतरङ्गाः व्याकुलयन्ति च चित्तं मेऽनन्ताश्चिन्ता ।

सुरुचिः –(सहर्षं स्वगतम्) अभ्यसूयायाः कपटवल्लरी पल्लवितेव दृश्यते साम्प्रतम् (प्रकाशम्) यथाज्ञा देवस्य । इत इतो देवः

राजा – (मार्गे व्रजन् स्वगतम्) हा ! स्वभावशीतलतरे चन्द्रे चन्दनेऽपि चोष्मा ! हा ! कोमले कमलेऽपि काठिन्यम् ! उत्तमोत्तमकुलसंभवेषु पवित्रचरित्रेषु सौशील्यसारल्यसौजन्याद्यनेकसद्गुणरत्नरत्नाकरेषु सुनीतिकुमारध्रुवविवेकनिधिष्वपीदृशं कपटपाटवम् ! हा ! मयायावधि चञ्चच्चामीकरबुद्ध्या विलोकितं सर्वं पित्तलमेव संपन्नम् । हा ! मयायावधि निरवधिरमणीयतया विलोकितं तत्सर्वं गन्धर्वनगरनिर्विशेषं क्षणिकमेव निष्पन्नम् !

(इति विचारयन् सह सुरुच्या निष्क्रान्तः)

(ततः प्रविशत्याकाशमार्गेणावतरन् कपिञ्जलः)

कपिञ्जलः – (स्वगतम्) परमपूज्यस्य देवदानवमानवमाननीयस्य श्रीसद्गुरोर्मे नारदस्य प्रभुताशक्तिर्यथा जगत्प्रख्याता तथैव कलहकोलाहलविलोकनकौतूहलितापि चाबालवृद्धं जगति प्रख्यातैव । तदाज्ञाधीनतदीयशिष्यस्य मे तादृशगुम्फगुम्फनप्रयासपरतंत्रता परापतति स्म कदाचित् । परमिदानीं तु दयालुभिस्तैर्मह्यं समर्पितं कार्यमतीवाश्चर्यकरमस्ति (पुनः साशङ्कम्) अरे ! राजभवनोपवनसमीपमुपेत्य किमहमेतत्प्रलपामि । भित्तयोऽपि कर्णवत्यो भवन्तीति लोकोक्तिर्न मृषा । यदि कदाचित्कस्यचित्कर्णपुटपथातिथितामुपगच्छेन्मदुक्तिस्तदा महान् क्षोभो भविष्यति । (क्षणं कर्णं दत्वा) मञ्जुलोऽयं मञ्जीरध्वनिः श्रूयते तेनानुमीयते कयाचित्कामिन्यात्रागन्तव्यम् । न मादृशस्य तपस्विनस्तादृशे स्थलेऽवस्थितिरुचिता तदन्यत्र गत्वादृश्यस्य भूत्वा का प्रवृत्तिः प्रचलतीति विलोकयामि । तदनन्तरं यथायोग्यं करिष्यामि ।

(इति वदन्निष्क्रान्तः)

(ततः प्रविशति पुष्पावचयं नाटयन्ती विचारवती)

विचारवती – (स्वगतम्) –

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आकाशपुष्पनिकरैरधिवासयन्ती
भाग्यानि भाविविभवोर्मिषु तारयन्ती।
स्वस्वार्थसाधनपरायणतैकनार्ये
ह्याशैव नर्तयति विश्वमशेषमेतत् ॥ ४॥
स्वार्थार्थमन्यमनुजान् परिपीडयन्ती
चिन्ताचितां मनसि निर्भरमर्पयन्ती।
स्वस्वार्थसाधनपरायणतैकनार्ये
ह्याशैव नर्तयति विश्वमशेषमेतत् ॥ ५॥

अहो ! आशे ! आशे ! त्वदीयधूर्तताधूलीपातनिष्फलीभूतज्ञानलोचनो निखिलोयं लोकः। त्वदीयमोहनशक्त्या मोहिताः सर्वे स्वार्थसाधनपरा नराः परान् स्वकीयकपटकलिकालरात्रिबलीन् विधाय स्वार्थान् साधयितुं नक्तंदिनमविरतं पराः प्रयत्नपरम्परा रचयन्ति। क्षणिकसुखदुःखभोगजन्मभूमीभूतमिदं राज्यमपीदानीं तवैवाज्ञावशं वर्तते त्वयैवोन्मत्तीकृतं रजोरूषितं च दृश्यते।

निपुणिका – (प्रविश्य) प्रियसखि विचारवति ! का प्रवृत्तिरिदानीं नगरे नवीना?

विचारवती – अये निपुणिके ! नवीनायां प्रवृत्तावप्यनभिज्ञासि ? या सर्वेषां मुखेभ्यो निःसरति या च सर्वेषां कर्णैः श्रूयते सा प्रवृत्तिरेषैव वर्तते यत्साम्प्रतं सर्वापि प्रजा राजधानीमिमां परित्यज्य तपोवनमेव गमिष्यतीति।

निपुणिका – (साश्चर्यम्) कतमं तपोवनं किं निमित्तं च ?

विचारवती – यत्र कुमारो ध्रुवो दुष्करं तपः कुरुते तत्र, कारणं तु ध्रुवानुराग एव।

निपुणिका – कथं ध्रुवानुरागः प्रयाणसमयात्पञ्चसु मासेषु व्यतीतेष्विदानीमुद्रिक्तः ?

विचारवती – हला निपुणिके ! यस्मिन्नेव दिवसे ध्रुवस्तपोवनं प्रस्थितः तस्मिन्नेव दिवसे सर्वाभिः प्रजाभिरेतत् कर्तुं व्यवसितमेव। किंतु देव्या सुनीत्या विवेकनिधिना च बहुभिः प्रकारैः समाश्वास्य समाश्वास्यैतद्व्यवसायविमुखतां नीताः शरीरैरेव केवलमत्र वसन्ति मनोभिस्तु ध्रुवतपोवन एव।

निपुणिका – तर्हि कथमिदानीं पुनरेव तत्कर्तुं प्रवृत्ताः प्रजाः ?

विचारवती – देव्याः सुरुच्या वचनरचनाविवशस्वान्तो महाराजो पुना कुलीनान् कुलपरंपराप्राप्तानुत्तमानधिकारिणो दूरे विधाय प्रजा-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पीडनपरान्नीचनीचान् कुलीनान्खलानरानुच्चोच्चाधिकारपदेषु स्थापयितुं प्रवृत्तः। नैतावदेव देवी सुनीतिर्विवेकनिधिः सुशीलासुचरित्राऽनसूयाश्च कुमारं ध्रुवमुन्मार्गे प्रवर्तयन्ति ततो राज्यद्रोहिणः सन्तीति सुरुचि-वचोमात्रेण मत्वा सुनीतिविवेकनिधयादिभ्यः सर्वेभ्यः प्राणान्तदण्डं दातुमपि प्रवृत्तः। तदेव प्रजाया महाराजे विरक्तिकारणं कुमारे ध्रुवे चानुरागोद्रेककारणम्।

निपुणिका — (स्वगतम्) हा! सुनीतिपराङ्मुखे महाराजे प्रजाविरक्तिर्युक्तैव (प्रकाशम्) सखि! कया युक्त्या देव्या सुरुच्या तेषु सर्वेषु मधूरोयं राज्यद्रोहित्वारोपो महाराजस्यान्ते दृढीकृत इति किंस्विज्जानासि?

विचारवती :— एतदेवमहदाश्चर्यमस्ति। श्रुतं मया कुमारेण ध्रुवेण स्वहस्ताक्षरैर्लिखितः स्वमुद्रया मुद्रितश्च कश्चिदेको लेखो देव्या सुरुच्या महाराजाय समर्पितः। एतल्लेखदर्शनमेव च पल्लवितस्य पुष्पितस्य फलितस्य विषवृक्षस्य बीजमस्ति नान्यत्।

निपुणिका — सखि! कस्य दोषेणायं परिणामः?

विचारवती — ननु सुरुचेरेव, तत्र का शङ्का?

निपुणिका — नहि नहि।

विचारवती — कस्य तर्हि?

निपुणिका — सापत्न्यस्यैव। सापत्न्यं हि नाम कृत्याकृत्यविवेक-विधुरमेव भवतीति ना विदितं ते। यदि राजा सुनीति-दत्तकर्णोऽभविष्यत् तर्हि सापि सुरुचिं प्राणान्तदण्डपात्रतामनेष्यत्।

विचारवती — (सरोषम्) निपुणिके! नाम्नैव निपुणिकासीत्यवगतम-नेन तव वचसा मयेदानीम्।

निपुणिका — कथमिव?

विचारवती — यतस्त्वं सुनीतिमपि सुरुचिसमां वदसि।

निपुणिका — समाने सापत्न्ये किं वैलक्षण्यं सुनीतेर्दृष्टं त्वयेति त्वमेव वद।

विचारवती — शृणु, सुनीत्या प्रथमं सप्रणामप्रार्थनाशतेन प्राणान्त-दण्डात् सपरिवारा सुरुचिर्मोचितेति नाविदितं ते। सुरुच्या चेदानीं कपटशतघटनया सपरिवारा सुनीतिः प्राणान्तदण्डे योजिता। विचारय वैलक्षण्यमस्ति तयोर्न वा किंचायं सापत्न्यस्य दोषः सुरुचेर्वा?

निपुणिका — यद्येवं तर्हि सत्यं सुरुचेरेव महान् दोषः। अथवा—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उपकृतिशतविक्रीतोऽप्यपकृतिमेवाचरेन्नीचः ।
अपकृतिनिकरकरेष्वप्युपकृतिमेवोत्तमः कुरुते ॥ 6 ॥
इति लोकोक्तिर्न मृषा । तथैवाचरितं च सुनीत्या । तथापि शठेषु शठतैव कर्तुमर्हा नाशठतेति मन्येहम् ।

विचारवती – सखि जानात्येव भवती –
त्यजयेन्न साधुतां साधुर्नासाधुश्चाप्यसाधुताम् ।
यावज्जीवं तथाप्यन्ते साधोरेव ध्रुवोन्नतिः ॥ 7 ॥

निपुणिका – खलु विचित्रातिगहना च परमेश्वरघटना । के वराके आवां तस्याः पारं गन्तुम् ? पूर्णमिदानीं पुण्यैर्मे पुण्यपात्रं तद्गच्छामि ।

विचारवती – ममापि पूर्णं पुण्यपात्रम् । अहमप्यागच्छामि ।
(उभे निष्क्रान्ते)

———— o ————

(ततः प्रविशति विचारमग्नो राजा)

राजा – (प्रविश्य स्वगतम्) हा ! किमपि नवीनमेव मे साम्प्रतं दृष्टिगोचरं भवति । अथवा तदेतन्नवीनं जीर्णं वेति निश्चेतुमपि न मे मतिः शक्तिमती । परन्तु दृश्यमानं तदेव शनैः शनैः परमं प्रसारमुपलभ्यापहरति विवेकशक्तिं बधिरीकरोति स्मृतिशक्तिं समुत्सारयति च मननशक्तिं मे । समस्तमर्मस्थानप्रसृतं हालाहलमिव मामन्धमिव बधिरमिव स्तब्धमिव मूढमिव च करोति । अहो ! विधिविधित्साया विचित्रता या क्षणादेव गगनं मेदिनीं मेदिनीं च गगनं करोति । अहो ! मनुष्याणां मानसी स्थितिः प्रबलपवनप्रोत्पन्ना पयोबुद्बुदपङ्क्तिरिव प्रतिक्षणमस्थिरस्वभावानुभूयते मयेदानीम् । हा ! ये मया परमेण प्रेम्णा निष्प्रतिमेन ममत्वेन पालिता लालिताः पोषिताश्च त एव यदा कपटघटनापटुतया विचित्राः क्रीडाः कुर्वाणा दृष्टिपथमवतरन्ति तदा यद्दुःखं मनसि भवति तदसह्यमवर्णनीयं चास्ति । प्राणप्रियायाः सुनीतेः प्रियं कर्तुं किं किं मयाद्यावधि न कृतम् ? कुमारस्य ध्रुवस्य चिन्तया कीदृशानि दुःखान्यनुदिनमहमनुभवामि ? विवेकनिधिश्च प्रतिदिनमद्यावधि मया स्नेहाद्विश्वासाच्चोत्तमोत्तमामेव पदवीमारोपितोऽस्ति । आद्यतमोयमिति मत्वा तस्यैव वचनानि श्रुतानि मानितानि च । सत्यमेवं तेषां चित्तस्य कीदृशी लघुता ^कीदृशी दुरता^ कीदृशी दुष्टता च ? मया प्रकृष्ट प्रबद्धस्य प्रेम्णो विश्वासस्य च कीदृशः परिणाम एव आगतः ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

-पीडनपरान्नीचनीचान् कुलीनान्नखानरानुच्चोच्चाधिकारपदेषु स्थापयितुं प्रवृत्तः। नैतावदेव देवी सुनीतिर्विवेकनिधिः सुशीलासुचरित्राङ्गनसूयाश्च कुमारं ध्रुवमुन्मार्गे प्रवर्तयन्ति ततो राज्यद्रोहिणः सन्तीति सुरुचि-वचोमात्रेण मत्वा सुनीतिविवेकनिध्यादिभ्यः सर्वेभ्यः प्राणान्तदण्डं दातुमपि प्रवृत्तः। तदेव प्रजाया महाराजे विरक्तिकारणं कुमारे ध्रुवे चानुरागोद्रेककारणम्।

निपुणिका — (स्वगतम्) हा! सुनीतिपराङ्मुखे महाराजे प्रजाविरक्तिर्युक्तैव (प्रकाशम्) सखि! कया युक्त्या देव्या सुरुच्या तेषु सर्वेषु मध्यूरोपं राज्यद्रोहित्वारोपो महाराजस्याग्रे दृढीकृत इति किंस्विज्जानासि?

विचारवती :— एतदेवमहदाश्चर्यमस्ति। श्रुतं मया कुमारेण ध्रुवेण स्वहस्ताक्षरैर्लिखितः स्वमुद्रयामुद्रितश्च कश्चिदेको लेखो देव्या सुरुच्या महाराजाय समर्पितः। एतल्लेखदर्शनमेव च पल्लवितस्य पुष्पितस्य फलितस्य विषवृक्षस्य बीजमस्ति नान्यत्।

निपुणिका — सखि! कस्य दोषेणायं परिणामः?

विचारवती — ननु सुरुचेरेव, तत्र का शङ्का?

निपुणिका — नहि नहि।

विचारवती — कस्य तर्हि?

निपुणिका — सापत्न्यस्यैव। सापत्न्यं हि नाम कृत्याकृत्यविवेक-विधुरमेव भवतीति ना विदितं ते। यदि राजा सुनीति-दत्तकर्णोऽभविष्यत् तर्हि सापि सुरुचिं प्राणान्तदण्डपात्रतामनेष्यत्।

विचारवती — (सरोषम्) निपुणिके! नाम्नैव निपुणिकासीत्यवगतम-नेन तव वचसा मयेदानीम्।

निपुणिका — कथमिव?

विचारवती — यतस्त्वं सुनीतिमपि सुरुचिसमां वदसि।

निपुणिका — समाने सापत्न्ये किं वैलक्षण्यं सुनीतेर्दृष्टं त्वयेति त्वमेव वद।

विचारवती — शृणु, सुनीत्या प्रथमं सप्रणामप्रार्थनाशतेन प्राणान्त-दण्डात्सपरिवारा सुरुचिर्मोचितेति नाविदितं ते। सुरुच्या चेदानीं कपटशतघटनया सपरिवारा सुनीतिः प्राणान्तदण्डे योजिता। विचारय वैलक्षण्यमस्ति तयोर्न वा किंचायं सापत्न्यस्य दोषः सुरुचेर्वा?

निपुणिका — यद्येवं तर्हि सत्यं सुरुचेरेव महान् दोषः। अथवा-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

उपकृतिशतविक्रीतोऽप्यपकृतिमेवाचरेन्नीचः ।
अपकृतिनिकरकरेष्वप्युपकृतिमेवोत्तमः कुरुते ॥ 6 ॥

इति लोकोक्तिर्न मृषा । तथैवाचरितं च सुनीतया । तथापि शठेषु शठतैव कर्तुमर्हा नाशठतेति मन्येहम् ।

विचारवती — सखि जानात्येव भवती —
त्यजयेन्न साधुतां साधुर्नासाधुश्चाप्यसाधुताम् ।
यावज्जीवं तथाप्यन्ते साधोरेव ध्रुवोन्नतिः ॥ 7 ॥

निपुणिका — खलु विचित्रातिगहना च परमेश्वरघटना । के वराके आवां तस्याः पारं गन्तुम् ? पूर्णमिदानीं पुष्पैर्मे पुष्पपात्रं तद्गच्छामि ।

विचारवती — ममापि पूर्णं पुष्पपात्रम् । अहमप्यागच्छामि ।

(उभे निष्क्रान्ते)

——— ० ———

(ततः प्रविशति विचारमग्नो राजा)

राजा — (प्रविश्य स्वगतम्) हा ! किमपि नवीनमेव मे साम्प्रतं दृष्टिगोचरं भवति । अथवा तदेतन्नवीनं जीर्णं वेति निश्चेतुमपि न मे मतिः शक्तिमती । परन्तु दृश्यमानं तदेव शनैः शनैः परमं प्रसारमुपलभ्यापहरति विवेकशक्तिं बधिरीकरोति स्मृतिशक्तिं समुत्सारयति च मननशक्तिं मे । समस्तमर्मस्थानप्रसृतं हाला-हलमिव मामन्धमिव बधिरमिव स्तब्धमिव मूढमिव च करोति । अहो ! विधिविधित्साया विचित्रता या क्षणादेवं गगनं मेदिनीं मेदिनीं च गगनं करोति । अहो ! मनुष्याणां मानसी स्थितिः प्रबलपवनप्रोत्पन्ना पयोबुद्बुदपङ्क्तिरिव प्रतिक्षणमस्थिरस्वभावानु-भूयते मयेदानीम् । हा ! ये मया परमेण प्रेम्णा निष्प्रतिमेन ममत्वेन पालिता लालिताः पोषिताश्च त एव यदा कपटघटनापटुतया विचित्राः क्रीडाः कुर्वाणा दृष्टिपथमवतरन्ति तदा यद्दुःखं मनसि भवति तदसह्यमवर्णनीयं चास्ति । प्राणप्रियायाः सुनीतेः प्रियं कर्तुं किं किं मयाद्यावधि न कृतम् ? कुमारस्य ध्रुवस्य चिन्तया कीदृशानि दुःखान्यनुदिनमहमनुभवामि ? विवेकनिधिश्च प्रतिदिनमद्यावधि मया स्नेहाद्विश्वासाच्चोत्तमोत्तमामेव पदवीमारोपितोऽस्ति । आत्ततमो-यमिति मत्वा तस्यैव वचनानि श्रुतानि मानितानि च । सत्यप्येवं तेषां चित्तस्य कीदृशी लघुता कीदृशी दुष्टता च ? मया प्रबद्धस्य प्रेम्णो विश्वासस्य च कीदृशः परिणाम एव आगतः ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अथवा प्रबलप्रेम प्रेमप्रणयिनं प्राणिनं मत्तमिवोन्मत्तमिव करोति। विश्वासश्चातिभूमिकारूढो विश्वस्तं पराधीनं करोतीति मयेदानीं साक्षादनुभूतम्। प्राणाधिकप्रिया प्रिया पवित्रमित्रमौरसः पुत्रश्च यर्हि विश्वासघातिनो भवेयुस्तर्हि कस्मिन् पुरुषे कस्यां स्त्रियां वा विश्वासः कर्तव्यः? सुनीत्यादानीं यः प्राणान्तदण्ड आदिष्टः स योग्य एवास्ति। यैर्यादृशानि बीजान्युप्यन्ते तैस्तादृशान्येव फलान्युपलभ्यन्ते। (इति परिक्रामति)

प्रतिहारः - (प्रविश्य) महाराज! देवी सुनीतिर्विवेकनिधिप्रभृतयश्च वध-स्थानगमनात्पूर्वं महाराजसमीपमुपेत्य किमपि विज्ञापयितुमिच्छन्ति।

राजा - (सरोषम्) नेदानीं विज्ञप्तिश्रवणावसरः। प्राणान्तदण्डस्तु तेषां योग्य एव न ततोऽन्यत्किमपि भविष्यति (क्षणं विचार्य) अथवा तेषां चरमापि प्रार्थना श्रोतव्यास्माभिर्येन न श्रुतास्माकं चरमा विज्ञप्तिर्महाराजेनेति नापवादपात्रं वयं भवेम। आगच्छन्तु ते मत्समीपं विज्ञापयन्तु च यथेच्छं विज्ञापनीयं सर्वम्।

प्रतिहारः - यथाज्ञा देवस्य

(निष्क्रान्तः)

(ततः प्रविशंति सेनापतिना कामसेनेनानुचरेण चानुयाताः वधस्थानप्रयाणो-चितवेशाः सुनीतिसुशीलासुचरित्रानसूयाविवेकनिधिप्रभृतयश्च)

विवेकनिधिः - (स्वगतम्) हन्त! तेजस्तिमिरयोरिव सौजन्यदौर्जन्ययोर्महदन्तरम्। तदानीं प्राणान्तदण्डात्सुनीत्या रक्षिता या सुरुचिः सैवेयमिदानीं सुनीतिं सपरिवारां प्राणान्तदण्डेन योजयति। साक्षादनुभूतसुनीतिसद्गुणेनापि विस्मृतमिदानीं तत्सर्वं महाराजेन। अथवा परप्रत्ययपरतन्त्रा हि राजानः।

(राजसमीपमुपेत्य सर्वे प्रणमन्ति)

राजा - विवेकनिधे:! किं ते विज्ञापनीयम्?

विवेकनिधिः - (साञ्जलिबन्धम्) महाराज! श्रीमदीयाज्ञा मे शिरोमान्यैव। न मृत्योरहं बिभेमि यतः 'मरणं प्रकृतिः शरीरिणां विकृतिर्जीवनमुच्यते बुधैः' इति महात्मनां मतम्। तथापि यशः-शरीरस्य कलङ्कयिता मिथ्यारोपोऽयं मृत्योरप्यधिकदुःखदो मे ततः कुमारः स्वमातुलराजधान्यां वर्तते न वर्तते वेतीतः प्रेषितैः परमाप्तैर्निर्णयं विधाय हन्तव्य एवायं जन इत्यर्थना मे।

राजा - तद्विषये तु प्रथममेव यो निर्णयो जातः स एव पूर्णः। स्वचित्त एव

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चिरं चिन्तय कस्ते यशः कलङ्कयतीति। पश्य पश्य त्वदीय शरीरस्पिताः के के रुधिरबिन्दवः स्वप्रभुद्रोहहालाहलकालिम्ना न कालीकृता इति। अथवा युक्तमुक्तम् तदा देव्या सुरुच्या। रे मूढ! अलमलमनया मातुलराजधान्याः कुमारस्य सेनायाश्चागमनपर्यन्तकालवञ्चनयुक्त्येति। दृष्टमनुभूतं च ते सर्वं सौजन्यम्।

विवेकनिधिः— महाराज! पुनरपि प्रार्थयामि, भ्रान्तिभूताविष्टमेव देवस्य स्वान्तं न सत्यासत्यनिर्णयं कर्तुं शक्तमिदानीम्। दूरेऽस्तु वार्ता मे परं पतिप्राणा पतिस्मरणा पतिचिन्तना पतिपदपद्मावलम्बना पतिव्रताशिरोमणिर्देवी सुनीतिस्तस्याः प्रियसख्यः सुशीलायाश्च निर्दोषलेशलवापि कपटपटुतरनरघटितकपटघटनावागुरानिबद्धा मृत्युमुखग्रासतां गच्छन्तीति किमल्पः प्रमादः? स्वकपोलकल्पितमिथ्यारोपरचनाकारिणां नीचनीचतराणां तेषां नेश्वरोऽप्येतमपराधं सहिष्यतीति मन्येहम्। महाराजाय समर्पितो यो लेखः सोपि न कुमारेण लिखितोस्ति किंतु कुमारस्यैवाक्षराणि लिखित्वा कयापि युक्त्या कुमारमुद्रां गृहीत्वा तया मुद्रितोस्ति। तदेवं कपटकलया कलुषितं देवस्य स्वान्तं परिणतौ निष्प्रतिक्रियानुतापतप्तं यथा न भवेत्तथा विधेयम्। सत्यं ब्रवीमि विषममृतममृतं च विषं पश्यतीदानीं देवः।

राजा— (स्वगतम्) विवेकनिधेर्वचनश्रवणेन किमपि विचारनिमग्नं भवति मनो मे। अथवा देव्या सुरुच्या तु प्रोक्तमेव पूर्वं यन्न सन्निहितमरणानां गिरः श्रोतव्याः। ते हि मरणभयात्करुणाजनकानि स्वरक्षणकराणि पराहितपराणि च कानि कानि वचनानि न प्रलपेयुरिति (प्रकाशम्) विवेकनिधे! यत्ते वक्तव्यं तत्संक्षेपतो निवेदय। मा विलम्बं कुरु।

विवेकनिधिः— यथाज्ञा देवस्य।

कामः क्रोधस्तथा लोभो मोहो मत्सर एव च।
मदश्च सकलानर्थकारिणो वैरिणस्तव ॥ ८ ॥
आजन्मसेवका युष्मच्चरणैकपरायणाः।
न वयं कुर्महे स्वप्नेऽप्यपराधं निजप्रभोः ॥ ९ ॥

सर्वमेतत्किमपि कपटनाटकमेवास्तीति मन्तव्यं देवेन।

कामसेनः— धिक् पाप! परमपुण्यपवित्राशयं महाराजमपि कामक्रोधलोभमोहमदमत्सरग्रस्तं वदन्न लज्जसे? नातः परं पापस्यास्य वचोपि महाराजेन श्रोतव्यम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(राजा निरुत्तरस्तूष्णीं तिष्ठति)

सुनीतिः - यदि निरपराधाया दास्या अस्याः श्रूयते वचस्तर्हि चरमां प्रार्थनां करवाणि ।

राजा - उच्यतां, श्रूयते ।

सुनीतिः - प्राणनाथ! सुचरित्रा सुशीलानसूया निरपराधा अपि मत्सहवासमात्रापराधेन प्राणान्तदण्डानुभवभाजनतां भजन्तीति न युक्तम् तद्दीनायां मयि दयां विधाय मोक्तव्यास्ता इति मे प्रथमाभ्यर्थना । किंच या प्राणनाथस्य प्रसन्नता सैव मे प्रसन्नता या प्राणनाथस्य वाञ्छा सैव मे वाञ्छा या च प्राणनाथस्याज्ञा सैव मे वन्दनीया धर्मवेदीति मन्येहम् । निरपराधलेशापि स्वप्ने ऽप्यत्यक्तयुष्मच्चरणशरणापि युष्मदिच्छानुसारेण मरणायापि सज्जास्मि । यतो युष्मदीयहृदयसन्तोषकरणं हि मे जीवनस्य परमं मरणं परमं सर्वस्वं परमं सौभाग्यचिह्नं चेति मे निश्चयः । परन्तु निरपराधेयं दासी प्राणनाथेन स्वहस्तेनैव प्राणान्तदण्डं प्रापणीयेति मे द्वितीयाभ्यर्थना । यतः —

प्राणनाथ तव पाणिपल्लवो-
ल्लासितासिलतया वधं तु मे ।
मङ्गलं परममित्यवैमि तत्,
मा स्पृशत्विह भवत्परस्तु माम् ॥ १० ॥

राजा - कामसेन ! निरपराधाश्चेन्मोक्तव्यास्ताः सुशीलाद्यास्तस्याः सहचर्यः ।

कामसेनः - देव देव! किमेतदुच्यते ? देव्याः सुरुच्या मतं स्मरणीयम् ।

सुशीलासुचरित्राचानसूया न मृता यदि ।
मृतापि न मृता ज्ञेया सुनीतिरिति मे मतिः ॥ ११ ॥

इति । मूलभूताः खलु सुनीत्या ध्रुवाभ्युदयस्य च ता एवेति ममापि प्रतिभाति । ततस्ता एव प्रथममुन्मूलनीया अनन्तरं च सुनीतिः ।

राजा - तर्हि तु देवी सुरुचिरेतद्विषये यदाज्ञापयेत्तद्विधेयम् । विरता वयमिदानीमतिगहनादस्मात् कार्यात् ।

सुनीतिः (स्वगतम्) साम्प्रतं प्रणष्टा नः प्राणितव्यप्रत्याशा । (प्रकाशम्) प्रियसख्यो मे ! मत्सहवासस्येदृशं फलमुपलब्धं भवतीभिः । किं करोमि क्व गच्छामि क उपायः का गतिः ? हा ! न तथा ध्रुववियोगो न तथा मिथ्यारोपो न तथा नानाविधानेकदुःखौघो न तथा जीवितान्तोऽयं दण्डः पीडयति मां यथा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

निरपराधलवानामपि भवतीनां मत्सङ्गत्या समुपनतोऽयं प्राणान्तो दण्डः पीडयति।

(इति वदन्त्यश्रूणि मुञ्चति)

सुशीला – प्रियसखि ! समाश्वसिहि समाश्वसिहि । न वयं महाराजस्यामुमुपकारं विस्मरिष्यामो येनास्मन्मनोनुकूलमेवाचरितम् । न वयं विना त्वया क्षणमपि जीवितुं क्षमा न च त्वमस्माभिर्विना क्षणमपि जीवितुं क्षमेति ना विदितं ते ।

सुनीतिः – प्रियसहचर्यो मे । भवतीनामप्रतिमेनामुना प्रेम्णा परमोपकारभारवत्यहं न कदाप्यनृणा भविष्यामि । अयि पवित्रचित्रचरित्रवत्यः! पवित्रयत चरमेण गाढालिङ्गनेन मां मन्दभागिनीं समुत्सारयत मे पूर्वजन्मोपार्जितानि पापानि शीतलयत चानेकतापसंतप्तं मनो मे।

(सर्वा मिथस्तथा करोति)

राजा – (विलोक्य स्वगतम्) अहो ! अलौकिकमेव सर्वासामासां मिथः प्रेमप्राबल्यं प्रतिभाति । इदं सर्वं मनसि निधायैव देव्या सुरुच्या स्वदीर्घदृष्टेरुपयोगः कृत इति मन्येहम् ।

कामसेनः – (स्वगतम्) महाराजस्तूष्णीं स्थित्वा किमपि विचारयति। विलम्बेन कदाचिद्विरुद्धविचारो भविष्यति तत एतेषां त्वरितमुत्सारणं विधेयम् (प्रकाशम्) रे रे पापा ! एत एत नीचकृत्यानि निजान्युपभोक्तुम् ।

(सर्वास्तिरस्क रोति)

सुनीतिः – सुरुचे सुरुचे ! अलमलमेव निरपराधायां मयि विवेकनिधौ सुशीलादासु चासु मृषापराधकल्पनयाऽनया । नाकालमृत्युर्मां तथा व्यथयति यथाऽयं मृषापराधारोपः ।
(ऊर्ध्वमवलोक्य दीर्घमुष्णं च निश्वस्य)

निरपराधलवा अपि तावका
निपतिता विपदम्बुनिधौ वयम् ।
प्रणतपाल कृपालुशिरोमणे
भव विपत्तिहरो नृहरे हरे ! ॥ १२॥

राजा – (स्वगतम्) हृदयभेदीनि इमानि सुनीतेर्वचनानि । (प्रकाशम्) सुनीते ! यूयं सर्वेऽपि निरपराधा इत्येतद्विषये कोऽप्यस्ति साक्षी ?

सुनीतिः – अस्त्येव लोकसाक्षिमण्डलान्तर्वर्ती भगवान्नारायणः साक्षी।

कामसेनः – देव ! किमेतस्या दम्भैकभूमेरपि वचनानि श्रवणे कुरुषे ? मृत्युमुखोन्मुखैस्तैरमङ्गलैः सह वार्ताऽप्यमङ्गलकरी ततस्तेषां

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(राजा निरुत्तरस्तूष्णीं तिष्ठति)

सुनीति: - यदि निरपराधाया दास्या अस्या: श्रूयते वचस्तर्हि चरमां प्रार्थनां करवाणि ।

राजा - उच्यतां, श्रूयते ।

सुनीति: - प्राणनाथ! सुचरित्रा सुशीलानसूया निरपराधा अपि मत्सहवासमात्रापराधेन प्राणान्तदण्डानुभवभाजनतां भजन्तीति न युक्तम् तद्दीनायां मयि दयां विधाय मोक्तव्यास्ता इति मे प्रथमाभ्यर्थना । किंच या प्राणनाथस्य प्रसन्नता सैव मे प्रसन्नता या प्राणनाथस्य वाञ्छा सैव मे वाञ्छा या च प्राणनाथस्याज्ञा सैव मे वन्दनीया धर्मवेदीति मन्येहम् । निरपराधलेशापि स्वप्ने त्वत्यक्तयुष्मच्चरणशरणापि युष्मदिच्छानुसारेण मरणायापि सज्जास्मि । यतो युष्मदीयहृदयसन्तोषकरणं हि मे जीवनस्य परमाभरणं परमं सर्वस्वं परमं सौभाग्यचिह्नं चेति मे निश्चय: । परन्तु निरपराधेयं दासी प्राणनाथेन स्वहस्तेनैव प्राणान्तदण्डं प्रापणीयेति मे द्वितीयाभ्यर्थना । यत: —

प्राणनाथ तव पाणिपल्लवो-
ल्लासितासिलतया वधं तु मे ।
मङ्गलं परममित्यवैमि तत्
मा स्पृशत्विह भवत्परस्तु माम् ॥ १० ॥

राजा - कामसेन ! निरपराधाश्चेन्मोक्तव्यास्ता: सुशीलाद्यास्तस्या: सहचर्य: ।

कामसेन: - देव देव! किमेतदुच्यते ? देव्या: सुरुच्या मतं स्मरणीयम् ।

सुशीला सुचरित्रा चानसूया न मृता यदि ।
मृतापि न मृता ज्ञेया सुनीतिरिति मे मति: ॥ ११ ॥

इति । मूलभूता: खलु सुनीत्या ध्रुवाभ्युदयस्य च ता एवेति ममापि प्रतिभाति । ततस्ता एव प्रथममुन्मूलनीया अनन्तरं च सुनीति: ।

राजा - तर्हि तु देवी सुरुचिरेतद्विषये यदाज्ञापयेत्तद्विधेयम् । विरता वयमिदानीमति गहनादस्मात् कार्यात् ।

सुनीति: (स्वगतम्) साम्प्रतं प्रणष्टा न: प्राणितव्यप्रत्याशा (प्रकाशम्) प्रियसख्यो मे ! मत्सहवासस्येदृशं फलमुपलब्धं भवतीभि: । किं करोमि क्व गच्छामि क उपाय: का गति: ? हा ! न तथा ध्रुववियोगो न तथा मिथ्यारोपो न तथा नानाविधानेकदु:खौघो न तथा जीवितान्तोपायं दण्ड: पीडयति मां यथा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

निरपराधलवानामपि भवतीनां मत्सङ्गत्या समुपनतोऽयं प्राणान्तो दण्डः पीडयति।
(इति वदन्त्यश्रूणि मुञ्चति)

सुशीला – प्रियसखि ! समाश्वसिहि समाश्वसिहि । न वयं महाराजस्या-मुमुपकारं विस्मरिष्यामो येनास्मन्मनोनुकूलमेवाचरितम् । न वयं विना त्वया क्षणमपि जीवितुं क्षमा न च त्वमस्माभिर्विना क्षणमपि जीवितुं क्षमेति ना विदितं ते ।

सुनीतिः – प्रियसहचर्यो मे । भवतीनामप्रतिमेनामुना प्रेम्णा परमोपकार-भारवत्यहं न कदाऽप्यनृणा भविष्यामि । अयि पवित्र चित्रचरित्रवत्यः! पवित्रयत चरमेण गाढालिङ्गनेन मां मन्दभागिनीं समुत्सारयत मे पूर्वजन्मोपार्जितानि पापानि शीतलयत चानेकतापसंतप्तं मनो मे।
(सर्वा मिथस्तथा करोति)

राजा – (विलोक्य स्वगतम्) अहो ! अलौकिकमेव सर्वासामासां मिथः प्रेमप्राबल्यं प्रतिभाति । इदं सर्वं मनसि निधायैव देव्या सुरुच्या स्वदीर्घदृष्टेरुपयोगः कृत इति मन्येहम् ।

कामसेनः – (स्वगतम्) महाराजस्तूष्णीं स्थित्वा किमपि विचारयति । विलम्बेन कदाचिद्विरुद्धविचारो भविष्यति तत एतेषां त्वरित-मुत्सारणं विधेयम् (प्रकाशम्) रे रे पापा! एत एत नीच-कृत्यानि निजान्युपभोक्तुम् ।
(सर्वास्तिरस्कुर्वन्ति)

सुनीतिः – सुरुचे सुरुचे ! अलमलमेव निरपराधायां मयि विवेकनिधौ सुशीलायासु चासु मृषापराधकल्पनयाऽनया । नाकालमृत्युर्मां तथा व्यथयति यथाऽयं मृषापराधारोपः ।
(ऊर्द्ध्वमवलोक्य दीर्घमुष्णं च निश्वस्य)

निरपराधलवा अपि तावका
निपतिता विपदम्बुनिधौ वयम् ।
प्रणतपाल कृपालुशिरोमणे
भव विपत्तिहरो नृहरे हरे ! ॥ १२ ॥

राजा – (स्वगतम्) हृदयभेदीनि इमानि सुनीतेर्वचनानि । (प्रकाशम्) सुनीते ! यूयं सर्वेपि निरपराधा इत्येतद्विषये कोऽप्यस्ति साक्षी ?

सुनीतिः – अस्त्येव लोकसाक्षिमण्डलान्तर्वर्ती भगवान्नारायणः साक्षी ।

कामसेनः – देव ! किमेतस्या दम्भैकभूमेरपि वचनानि श्रवणे कुरुषे ? मृत्युमुखोन्मुखैस्तैरमङ्गलैः सह वार्ताप्यमङ्गलकरी ततस्तेषां

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

34.
वचनेषु देवेन चित्तमेव न देयम् (निष्कोशमसिमुद्यम्य) दुष्टाः ! द्रुतं निःसरत निःसरत । नचेदिहैव सर्वेषां वः प्राणान् पास्यति मदीयोऽयं करालः करवालव्यालः।

(इति सर्वान् भीषयति)

(नेपथ्ये)

अलमलं साहसेन, न हन्तव्या न हन्तव्या निरपराधा एते ।

यस्य प्रियो न तनयो न पिता न बन्धु-
र्मातापि नैव जनिदा न च धर्मपत्नी ।
स्वार्थैकतत्परतरं बलिलाभलुब्धं
तं तोषयेत्क इव भूपतिभूतमुग्रम् ॥ 13॥

राजा - अहो ! अस्मान् प्रत्यधिक्षेपः ।

कामसेनः - कोऽयं भूलोकपरमेश्वरमपि निन्दितुं प्रवृत्तः ?

(पुनर्नेपथ्ये)

रुष्टं क्षणं क्षणमकारणमेव तुष्टं
दुष्टं क्षणादिव च दर्शयति स्वरूपम् ।
यो दष्टुयेव निजपार्श्वगनीचवाचा
तं तोषयेत्क इव भूपतिभूतमुग्रम् ॥ 14॥

कामसेनः - कोऽयं कर्णशूलं कटु रटति ?

(पुनराकाशे)

यन्नर्तनं भवति दुःखकरं नराणा-
मुद्वेगकृच्च भयकृन्निकटस्थितानाम्
शूरश्च यः स्वजनपीडन एव नित्यम्
तं तोषयेत्क इव भूपतिभूतमुग्रम् ॥ 15॥

अनुचरः - अरे ! कोऽयं पापः पुनः पुनः प्रलपति ?

(तत आकाशादवतरति कपिञ्जलः। साश्चर्यम् सर्वेऽभ्युत्थाय प्रणमन्ति)

राजा - भगवन्निदमासनमलङ्क्रियताम् ।

(इत्यासनमर्पयति)

कपिञ्जलः - (आसनमधिरोहति)

कामसेनः - महात्मन् ! कस्माद्देशाद्भगवत आगमनम् ?

कपिञ्जलः - श्रीतपनतनया तीरतपोवनादेवागतम् मां जानीत ।

राजा - भगवन् ! कमुद्दिश्य श्लोकत्रयं गीतं भवता ?

कपिञ्जलः - ननु भवन्तमेवोद्दिश्य ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा – तादृशं लक्षणं मयि किं दृष्टम् ?

कपिञ्जलः – किमतः परं द्रष्टव्यम् ? निरपराधत्वेपि पुत्रे निष्पापायामपि धर्मपत्न्यां निर्दोषेषु सद्गुणवत्सु सुहृज्जनेषु च भूतप्रेतपिशाचादन्यः कः स्वप्नेपीदृशं द्वेषमाचरेत् ?

कामसेनः – (स्वगतम्) नूनमयं कश्चिन्महांस्तपस्वी प्रतीयते, तपोबलेन महाराजं प्रत्यपि निर्भयतया सत्यमेव कथयति। इदानीं सर्वं कपटं स्फुटतां गमिष्यति।

कपिञ्जलः – किञ्च नीचेभ्यो मानवेभ्यो महतीं पदवीं समर्प्य तदुपदेशं ढक्कामिव विना भूतं प्रेतं पिशाचं वा कोऽन्योनुसरेत् ? अरे! आश्चर्यमेतत् यन्निष्पापे वत्से ध्रुवेऽपि पापं कल्पयतां तेषां दुष्टानां हृदयमपि न भिन्नम्। रसनापि न त्रुटिता। अस्मिन्नेव क्षणे तान् सर्वान् सुरुच्या सह प्रबलेन शापबलेन भस्मसात् कर्तुं शक्तोऽस्मि परं सुरुच्यां वत्सस्य परमां भक्तिमवलोक्य तपस्विजनस्यै तादृशक्रियया तपःक्षतिं विचार्य च ततो निवर्तते मे मनः।

(भयकम्पितः कामसेनोऽधोमुखस्तिष्ठति)

राजा – भगवन्! क्षम्यताम् क्षम्यताम्। कस्त्वं, कुत आगतः का च दासानुदासे मय्याज्ञा भगवत इति ज्ञातुमीहे।

सुनीतिः – भगवन् विपत्सम्बन्धो! कस्त्वं देवो मुनिर्मनुजो वा ? जानासि कामपि [प्रवृत्तिं] तपोवनप्रस्थितस्य मे वत्सस्य ध्रुवस्य।

(इत्यर्द्धमुक्त्वाश्रूणि मुञ्चन्ती तूष्णीं तिष्ठति)

कपिञ्जलः – मातः सुनीते! परमपवित्रमहाराजोत्तानपाद! जानीहि भगवतो नारदस्य शिष्यं कपिञ्जलं माम्। जानामि चातः प्रस्थितस्य ध्रुवस्य प्रवृत्तिमद्यावधि सर्वाम्। अभ्यसूयावशीभूतैः सुरुचिकामसेनादिभिर्विस्तारिते प्रपञ्चजाले पतिता एते सर्वे निरपराधा एव। प्रेषितश्चाहं भगवता नारदेन युवाभ्यां धैर्यमर्पयितुम्। निवेदयिष्यामि सर्वं सायंसन्ध्यामुपास्य भवद्भ्याम्। प्रत्यासीदति सायंसन्ध्या, पश्य –

क्षीणा कलाविव सुनीतिरियं दिनश्री–
मित्रेपि मान्द्यमुपतिष्ठति हा! पवित्रे।
उज्जृम्भते च खलवन्तिमिरं समन्तात्
शास्त्राप्तसूक्तिरिव मन्दफला च दृष्टिः ॥ १८॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तद्गच्छामि सन्ध्यावन्दनाय । (निष्क्रान्तः)

राजा – (स्वगतम्) अहो ! कीदृशं प्रमादित्वं ! यदिदानीं मम प्रियाया अनुचराणां चाभिमुखं स्थातुमपि लज्जते मे मनः (प्रकाशम्) प्रिये सुनीते ! पुनरप्यपराद्धं ते सुरुचिवचनान्मया । हा ! मम हृदयमतीव पीड्यते पश्चात्तापेन ।

सुनीतिः – नाथ ! नाथ ! न किंचिद्युवाभ्यां कृतम् । सर्वं मदीयेन प्रारब्ध- - कर्मणा कृतमिति मन्येहम् ।

राजा – विवेकनिधे सुशीले सुचरित्रे अनसूये च ! गच्छत, सायं- कृत्यानि विधाय पुनः कुमारस्य ध्रुवस्य प्रवृत्तिश्रवणायात्र त्वरया गन्तव्यम् ।

विवेकनिधिः – यथाज्ञा देवस्य ।

(इत्युक्त्वा सुशीलादिभिः सह निष्क्रान्तः)

राजा — प्रिये सुनीते ! वयमपि सायंसमयशिवार्चनादिकं परिसमाप्य मुनेरागमनात्पूर्वमेवात्रागमिष्यामः । तत्पूजाभवनमार्गं दर्शय ।

सुनीतिः – यथाज्ञा प्राणनाथस्य । इत इतो देवः ।

(इति राज्ञा सह निष्क्रान्ता)

———— ० ————

(ततः प्रविशति सुनीत्या सुरुच्या विवेकनिधिना सुशीलया सुचरित्रयाऽन- सूयया च सहितो राजा)

राजा – देवि ! शिवार्चनं समाप्य वयं त्वरिततरमत्रागताः परमिदानीं समयनिर्यापसो न भवति । वत्सस्य ध्रुवस्य वृत्तान्तं श्रोतुमत्युत्कण्ठितं मे मनः । कथं भगवतः कपिञ्जलस्यागमने विलम्बो जातः ? प्रायः प्रियजनसमागमे तद्विषयकवृत्तान्तश्रवणे चान्तरायभूतः स्वल्पोपि समय उत्कण्ठयाऽतीव दीर्घः सम्पद्यते ।

भगवन्नारदगुरोः शिष्यास्माकं महागुरो ।
अविलम्बादिहागच्छ न विलम्बे वयं क्षमाः ॥ 17 ॥

(नेपथ्ये)

जय जय जय राजन्नागतं मामवेहि
पुण्यपरवशं ते नारदस्यैव शिष्यम् ।
शृणु शृणु शृणु वाक्यान्यादृतो ऽस्मद्गुरूणाम्
भव भव भवतापान्मुक्तचित्तस्ततस्तैः ॥ 18 ॥

(ततः प्रविशत्याकाशमार्गेण नारदशिष्यः कपिञ्जलः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा – (सानन्दं सपरिवार उत्थाय) अहो ! स्मृतमात्र एवायं प्राप्तः ।
भगवन्निदमासनम् । (इत्यासनमर्पयति)

कपिञ्जलः – (आसनमधिरोहति)

राजा – भगवन् ! उत्तारयन्ति चेतांसि नः कुशलप्रवृत्तिं श्रोतुं ध्रुवस्य ततस्तत्कथनानुग्रहं करिष्यसीत्याशासे ।

कपिञ्जलः – राजन् ! ध्रुवस्य वृत्तं श्रोतुमिच्छसि द्रष्टुं वा ?

राजा – भगवन् ! श्रवणाद्दर्शनं वरमेव ।

कपिञ्जलः – तर्हि प्रयाणदिवसादद्यावधि सर्वमिन्द्रजालविधया दर्शयिष्यामि । निर्व्यग्रचित्तैः सर्वं विलोक्यम् ।

राजा – भगवन्नवहिताः स्मः ।

(कपिञ्जलः सिंहासनादुत्तीर्य मयूरपिच्छचूलिकां परितो भ्रामयति सर्वे विलोकयन्ति च)

(इन्द्रजालम्)

(ततः प्रविशति भस्मरुद्राक्षधारी ध्रुवः)

* ध्रुवः – (बर्हिष्मतीमभिमुखीभूय निश्वस्य च) हा ! दूरं गता सुशीला । सुशीलादर्शनानन्तरं सुशीलासमीपे च मदीयालङ्कारविलोकनानन्तरं च कीदृशी मे मातुर्दशा भविष्यति ? अथवा किमेतद्विचारेणाधुना ?

मातर्बर्हिष्मति मतिमतां पूर्वजानां मम त्वं
राजन्यानां सुरपुरसमा राजधानी प्रसिद्धा ।
प्रस्थानेच्छुः प्रणतशिरसाऽऽमन्त्रयेऽहं ततस्त्वां
द्रष्टास्मि त्वां पुनरपि मुदा श्रीमुकुन्दे प्रसन्ने ॥ १९ ॥

(इति पुरीं प्रणमति)

राजा – अहो ! विनयातिरेको वत्सस्य ।

सुनीतिः – दुर्दर्शमेतत् ।

* ध्रुवः – (सरितमवलोक्य)

बर्हिष्मती सुरपुरीसुरनिम्नगे त्वां
प्रेम्णा नमामि तपसेऽद्य निबद्धबुद्धिः ।
भूयोऽचिराद्भवतु दर्शनमत्र ते मे
तुष्टे रमारमण इष्टद इष्टदेवे ॥ २० ॥

(इति प्रणमति)

विवेकनिधिः – अहो विवेकातिशयः ।

* (इन्द्रजालान्तर्गतपात्रदर्शकमिदं चिह्नम्)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

* ध्रुवः – (वनोपवनान्यवलोक्य साश्रुम्)

बर्हिष्मतीपरिसरोपवनानि सर्वा-
ण्यामन्त्रये ध्रुव इतः प्रणयी प्रयाणे ।
युष्माकमस्तु मम दर्शनमत्र सद्य-
स्तुष्टे पुनर्जलधिजा हृदयाधिदेवे ॥ २१ ॥

राजा – वत्सस्यातीव प्रणयः सर्वत्र ।

* ध्रुवः – (सर्वान् वृक्षान् विलोक्य)

प्रत्येकं प्रणमामि वस्तरुवराः संतापसंहारिणः
सच्छायान् सुफलप्रदाननुदिनं तुल्यान् सदा सज्जनैः ।
नम्रान् कम्रतरान्लसत्सुमनसो बर्हिष्मतीसीमजान्
भूयो दर्शनमस्तु वस्तु कमलाकान्ते प्रसन्ने मयि ॥ २२ ॥

(इत्युक्त्वा सर्वान् प्रणमति)

सुशीला – अहो बर्हिष्मतीसीमभूमिभूमिजेष्वपि वत्सस्य स्नेहातिशयः ।

* ध्रुवः – (स्मृतिमभिनीय)

दीनानाथदयानिधान भगवन् श्रीचन्द्रचूडामणे
श्रीलक्ष्मीहृदयाधिनाथ भगवन् श्रीमन् विरिंचे चिरम् ।
अस्माकं तु दयालुतातचरणान् मातृः समस्ता अपि
प्रेमाम्भोनिधिमुत्तमं च दयया पाया अपायात्प्रभो ॥ २३ ॥

सुचरित्रा – धन्या खलु समग्रेषु गुरुजनेषु वत्सस्य निर्व्यलीका भक्तिः ।

* ध्रुवः – (स्मृतिमभिनीय) सहाध्यायिनो मे मां विद्यालये न विलोक्य कां दशामनुभविष्यन्ति ? परमकृपापीयूषपूरपूर्णमानसाः सद्गुरवश्च मे तपोवनगतं मां कर्णपरम्परया श्रुत्वा परमोदास्यदास्यभाजो भविष्यन्ति । हा ! कदा तेषां गुरुचरणानामहं दर्शनं करिष्यामि ? हा ! कदा च तैः स्निग्धैः सवयोभिः सहाध्यायिभिः सह समागमानन्दमनुभविष्यामि ?

(इति वदन्नश्रूणि मुञ्चति)

राजा – वत्स ! दुःसहश्चेद्विरहस्तर्हि प्रतिनिवर्तस्व ।

विवेकनिधिः – देव ! व्यतीतमेतत् ।

राजा – विस्मृतमेतन्मया प्रेमातिशयात् ।

* ध्रुवः – अथवा सर्वमिदानीं विस्मृत्य मातुः श्रीसुनीत्या उपदेशानु-सारेण गजेन्द्रमोक्षदीक्षितः परमेश्वर एव प्रतिक्षणं स्मरणीयः । (क्षणं विचिन्त्य दीर्घमुष्णं च निश्वस्य) शक्यं सर्वं विस्मर्तुं, न

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुनर्बहिश्चराः प्राणा मे वत्स उत्तमः । कथमिव तं प्रियतमं बन्धुं विस्मरामि ? न तातवियोगो न सद्गुरुवियोगो न मित्रमण्डलवियोगो न विद्यालयवियोगो नापि कृपामृतप्रपाया मातुः श्रीसुनीतेर्वियोगश्च तथा पीडयति मां यथा वत्सस्योत्तमस्य वियोगः पीडयति ।

(इति वदन्नश्रूणि मुञ्चति)

सुरुचिः — (स्वगतम्) विचित्रः खलु प्रेमातिशयो ध्रुवस्य वत्से उत्तमे । मन्ये केनाप्यहं भूतेनाविष्टा बलवता । यतः प्रतिक्षणं ध्रुवस्य सद्गुणान् पश्यन्त्यपि विस्मरामि ।

(प्रकाशम्) वत्स ध्रुव, प्रतिनिवर्तस्व प्रतिनिवर्तस्व ।

राजा — देवि ! गतः सः समयः ।

सुरुचिः — नाथ ! विस्मृतेन्द्रजालव्यापारया मयैवमुक्तम् ।

* ध्रुवः - वत्सेनोत्तमेन मत्प्रयाणावसरे कीदृशं प्रेमप्राबल्यं प्रकाशितम् ? मातुः श्रीसुरुचेः कोपपात्रतामप्यङ्गीकृत्य मया सह वनागमनाय प्रवृत्तः । केवलं बलान्मात्रा सुरुच्या मदङ्गलग्नो वियोजितः । स्मारं स्मारं तदवसरसंभवां तदीयां मद्वियोगकातरां परतन्त्रतादीनां चाकृतिं न क्षणमपि स्वान्तं शान्तिमुपैति मे । हा ! धिङ् मां तादृशप्रेमार्द्र प्रियबान्धवपरित्यागमहापातकिनम् ।

उत्तमोत्तम भवन्मुखाम्बुजं
द्रक्ष्यति क्व नु कदा नु सुन्दरम् ।
हा ! ममात्विदमपुण्यभाजनम्
लोचनद्वयममन्दलोचनम् ॥ २५ ॥

(मूर्च्छया पतति)

राजा — वत्स, वत्स, समाश्वसिहि । समाश्वसिहि ।

(उत्थातुमिच्छति)

कपिञ्जलः - अलं व्यामोहेन । इन्द्रजालमेतत् ।

राजा — विस्मृतं तत्पुनरप्यस्माभिः ।

(ततः प्रविशतः परमहंसब्रह्मचारिवेशौ पिशुनापीडकपटकरण्डौ)

* परमहंसः - ब्रह्मचारिन् ! तपोवनं गच्छतः कुमारस्य वस्त्रालङ्करादि सर्वमप्य-पहरणीयमित्याज्ञाभ्यसूयायाः ।

* ब्रह्मचारी - न खलु वयं तस्या आज्ञानुचराः किंतु देव्याः सुरुच्याएव ।

* परमहंसः - अभ्यसूयैव देवी मन्तव्या ।

* ब्रह्मचारी - भवतु, ततः किम् ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

* परमहंसः – ततोऽत्र स्थित्वा प्रतिपालयावः कुमारागमनम् ।

ब्रह्मचारी – भवतु । एहि नदीतीरनिकटवर्तिनो वटविटपिनस्तले स्थास्यावः । (परिक्रामतः)

राजा – हा ! कर्मचण्डालाविमौ कुतोऽत्रागतौ ?

विवेकनिधिः – देव ! ताभ्यामेवोक्तमत्रागमनकारणम् ।

* ध्रुवः – (संज्ञामुपलभ्य)

उत्तमोत्तम भवन्मुखाम्बुजं
द्रक्ष्यति क्व नु कदा नु सुन्दरम् ।
हा ममेदिदमपुण्यभाजनम्
लोचनद्वयममन्दलोचनम् ॥

(इति पुनः पठति)

* परमहंसः –(साश्चर्यम्) कुमारस्यैवायं स्वर उपलक्ष्यते । तदेहि लतान्तरोहितौ शृणुवः ।

* ब्रह्मचारी – तथा कुर्वः (तथा कुरुतः)

* ध्रुवः – (मनः संस्तभ्य) किमिदानीमुत्कण्ठया ? परमाभ्युदयकामानामुत्कण्ठैव परमो विघ्नः । सर्वथा ब्राह्मणाशिष एव सर्वेषां श्रेयः करिष्यन्ति । (अग्रतो गन्तुमुपक्रमते)

* परमहंसः – (समीपमुपेत्य) वत्स ! राजकुमारोऽसीति ज्ञानदृशा पश्यामो वयम् । तत्कथं पद्भ्यामेव वनं गन्तुं प्रवृत्तोऽसीति ज्ञातुमीहामहे ।

* ध्रुवः – (स्वगतम्) मानसं मे परमहंसमप्येनं विलोक्य न हर्षमुपैतीति मन्ये केनचिद्दम्भेनैव भाव्यमिति (प्रकाशम्) स्वामिन् शेषमपि ज्ञानदृशैवावगन्तव्यम् ।

* परमहंसः – तथा करोमि (क्षणं नेत्रे निमील्य) आः ! अवगतं, राजकुमारः खलु मातृसपत्नीयुक्तिशरभिन्नहृदयस्तपस्तप्तुं गच्छसीति ।

* ध्रुवः – (स्वगतम्) अथ किम् ।

* परमहंसः – कुमार ! तपसे प्रस्थितमपि त्वां सुहृद्वियोगदुःखं पीडयति । विशेषतः सौहृदसिन्धोर्बन्धोर्वियोगो निर्दयं पीडयतीति ज्ञानदृशावलोक्यते ।

* ध्रुवः –(स्वगतम्) मया किल बालभावादवज्ञातोऽयं परमहंसः । परं वर्ततेऽस्याप्रतिहतं ज्ञानचक्षुरित्यनुमीयते (प्रकाशम्) भगवन् यथार्थमुक्तम् । बान्धववियोग एव मां भृशं पीडयति । कदा तपसो निवृत्य

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रियबन्धोर्मे मुखमवलोकयिष्यामीत्युत्कण्ठते चेतः ।

* परमहंसः – वत्स ! न काचिच्चिन्ता विधेया । पश्यामुं ब्रह्मचारिणम् । समस्तमंत्रशास्त्रपारङ्गतोऽसौ भवन्मनोभिलाषसिद्धयेऽत्र स्थितानां च तेषां सर्वेषां संरक्षणाय प्रयतिष्यते ।

* ध्रुवः – परमोऽनुग्रहः ।

* परमहंसः – तर्हि दक्षिणा तु सिद्धमनोरथेनागत्य देया । परं प्रयाणदक्षिणा काचिद् ब्रह्मचारिणे दीयताम् ।

* ध्रुवः – स्वामिन् ! मुहूर्तात्पूर्वमेवसर्वालङ्कारसमूहो मया सुशीलया सह प्रेषितो मातुः समीपे । तेन नास्ति किंचिन्मदङ्गे ।

* परमहंसः – वत्स ! दीयतामेषा दक्षिणकराङ्गुली मुद्रिका । सुवर्णदक्षिणा प्रयाण-समये श्रेयस्करी ।

* ध्रुवः – यथा रोचते परमहंसाय ।

(इत्युक्त्वोत्तार्याङ्गुल्याः परमहंसाय दातुं करं प्रसारयति)

* परमहंसः – दूरं दूरं तिष्ठ । परमहंसाः खलु वयं न सुवर्णं स्पृशामः । केवलं तव श्रेयसेऽयमुपदेशः कृतः । तदस्मै ब्रह्मचारिण एव देहि ।

* ध्रुवः – तथास्तु । ब्रह्मचारिन् ! गृह्यतामियं दक्षिणा ।

* ब्रह्मचारी – स्वस्ति कुमाराय (इति सानन्दं गृह्णाति । अपवार्य परमहंसं प्रति) साम्प्रतं विसर्ज्यतामयं येन मध्येमार्गं सुशीलायाः समीपात्स-र्वाभरणभारमपहरिष्यावः ।

* परमहंसः – (ध्रुवं प्रति) वत्स ! साधयतु भवान् । शुभ इदानीं मुहूर्तः सम्प्रस्ते वाञ्छितसिद्धिर्भवित्री ।

* ध्रुवः – यथाज्ञा परमहंसस्य ।

(निष्क्रान्तः)

* ब्रह्मचारी – हा ! विलम्बेनागमनात्सर्वालङ्कारा न लब्धाः केवलमेकैयं मुद्रिकैव लब्धा । तेन खिद्यते मे मनः ।

* परमहंसः – धिङ् मूर्ख ! मुद्रिकायां लब्धायां सुनीतेर्ध्रुवस्य च सर्वस्वं लब्धमित्यवेहि ।

* ब्रह्मचारी – कथमिव ?

* परमहंसः – श्रृणु, मया खलु परमेणाभ्यासेन ध्रुवस्यैवाक्षराणि लिख्यन्ते ।

* ब्रह्मचारी – ततोऽपि किं फलम् ?

* परमहंसः – ततो ध्रुवस्यैवाक्षराणि पत्रे लिखित्वा तत्र चानया मुद्रया मुद्रिते ध्रुवलिखितमिदं सर्वमिति सर्वोऽपि मंस्यते ।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

* ब्रह्मचारी - इदानीमवगतम् । ध्रुवाक्षरसमैरक्षरैरेकं पत्रं लिखित्वा तत्र लेख्यं मदीयाभरणवस्त्राणि ब्रह्मचारिणेऽस्मै मदीयै तत्पत्रहारिणे समर्पणीयानीति । तच्च मुद्रयानया मुद्रितं कृत्वा सुनीत्यै दत्वा सर्वालङ्कारवस्त्राणि प्राप्स्याम इति तवाभिप्राय: किम् ?

* परमहंस: - मूर्ख ! अलङ्काराणां गणनैव का ?

* ब्रह्मचारी - किं ततोऽप्यधिकमभिमतं तर्हि ते ?

*परमहंस: — मूर्ख ! तादृशेन लेखेन ध्रुवे सुनीतौ विवेकनिधौ च महाराजस्यौदास्यमुत्पाद्य तांश्च सर्वान् प्राणान्तदण्डपात्रतामुपनीय सर्वैरप्यस्माभि: कामसेनादिभिरेव सकलं राज्यमुपभोक्तव्यम्। महाराजस्तु तृणपुरुष इव क्षेत्रे नाममात्रेण स्थास्यतीति ।

राजा - धिक् कर्मचण्डालौ ! युवाभ्यामेव पुरप्यहं वञ्चित: । तदिदानीमेव युवयो: शिरसी छिनद्मि ।

(निष्कोशमसिं कृत्वोत्पातुमिच्छति)

विवेकनिधि: - महाराज महाराज ! व्यतीतमेतदिन्द्रजालमिदम् ।

सुरुचि: - (स्वगतम्) हा ! सर्वापि कपटघटना क्रमात्स्फुटतामुपगच्छति। किं कर्तव्यमिदानीम् ? किमथवा सर्वथा स्वात्मा रक्षणीय: ।

(प्रकाशम्) प्राणनाथ ! दुष्टाभ्यामाभ्यामेवाहमपि वञ्चिता । नेदृशी कपटघटनापदीयस्यभ्यसूया मया विदितपूर्वा । हा ! दुष्टा सा ध्रुवस्य समीपमभ्युपेत्य किं किं करिष्यतीति वेपते मे चेत: ।

राजा - सत्यम् । किं किं वा कृत्यमप्यभ्यसूया न कुर्यात् ? अभ्यसूयायां हितैषिता बुद्धिरेव कुबुद्धि: ।

सुनीति: - (स्वगतम्) परमकृपालुना परमेश्वरेण क्षालित इदानीं वत्सस्य ध्रुवस्य भालदेशादुष्कलङ्को जीवितं च न: सफलं कृतम् ।

* ब्रह्मचारी - मूर्ख ! स्वप्नमोदकस्येव राज्यसुखस्य लोभेन हस्तगतं मोदकं मा मुञ्च ।

* परमहंस: - कीदृशो हस्तगतो मोदक: ?

* ब्रह्मचारी - मध्येमार्गं सुशीलाहस्तादलङ्कारापहरणरूप: ।

* परमहंस: - मूर्ख ! सा तु प्राप्तैव राज्यद्वारं कुतो यावधि मध्ये - मार्गं तस्या: स्थिति: ?

ब्रह्मचारी - तर्हि किं कर्तुमिच्छा ते ?

परमहंस: - कुमार ! केन पथा गच्छति, कुत्र गच्छति, किं कुरुते,

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

के के तस्य सहाया इति सर्वं गुप्ततया ज्ञात्वा निवेद्य च सर्वमध्य सूर्यायै पारितोषिकमपरिमितं ग्राह्यमिति मे वाञ्छा ।

* ब्रह्मचारी - यद्येवं तर्हि अनुचरोऽयं सहैवागमिष्यति । इत इत परमहंस एहि । (निष्क्रान्तौ)

राजा - विवेकनिधे ! "पयः पानं भुजङ्गानां केवलं विषवर्धनम्" इति लोकोक्तिर्न मृषा । प्राणान्तदण्डप्रापणीयौ कपटकरण्डपिशुनावीडा-विख्यातप्तोपि मया त्वया बहु बहु संप्रार्थ्य नगरनिष्कासनमात्रदण्डं प्रापितौ तौ । तस्यैव कर्मणः फलमेतत् ।

विवेकनिधिः - यथाह महाराजः । तथापि सर्वः स्वानुरूपमेव कर्तुं प्रवर्तत इति नाविदितं देवस्य ।

सुनीतिः - (स्वगतम्) इदानीं संजीवितहम् (प्रकाशम्) प्राणनाथ ! खलाः खलु स्वोपकारपरेष्ववापकारपरंपराकरणपरायणा भवन्तीति नाविदितं प्राणनाथस्य ।

राजा - प्रिये ! युक्तैव प्रियाया उक्तिः ।

(ततः प्रविशत्येकाकी ध्रुवः)

* ध्रुवः - (ऊर्ध्वमवलोक्य) हा ! नभोमध्यमधिरूढो भगवान् भास्करः । केन पथा गन्तव्यम् कतमं तपोवनं सेवनीयं को देवः सेवनीयः किं च जपितव्यमिति न किञ्चिदहं जानामि । अस्यान्मया बर्हिष्मती-सीमापि नोल्लङ्घिता । गहनमजनसंचारं चैतद्वनम् । क्षुधा तृषा च परिभूयते मेऽन्तरात्मा । कण्टकक्षताकीर्णौ च मे पादौ न पदात् पदमपि चलितुं शक्तौ । (परितोऽवलोक्य) इदमत्यच्छं पद्मसरस्तत्र स्नात्वा पयः पीत्वा च श्रममपनीय गमिष्यामि ।

(स्नात्वा पीत्वा सरसरसालतरुतले विश्राम्यति)

राजा - (सास्रम्)

हरिकरिनरनौकास्यंदनस्थोपि योऽयं
श्रममतुलमुपायात्क्रोशमात्रं च गत्वा ।
शिव शिव शिव सोयं त्वेक एवात्रपद्भ्यां
भ्रमति तपनतापात्यन्ततप्ते प्रदेशे ॥ २५॥

(अश्रूणि मुञ्चति)

सुशीला - सौवर्णपीठमधिरूढम सुवर्णकुम्भै-
र्दासीकराम्बुजधृतैर्विमलाम्बुपूर्णैः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स्नातिस्म यः प्रतिदिनं स शिलोपविष्ट -
स्तुम्बीफलोद्धृतजलैरभिषिञ्चति स्वम् ॥ २६ ॥
हा ! किमतः परं दुर्दैवस्य दुर्दर्शनम् !

सुचरित्रा - (सगद्गदकण्ठम्)
नरपालसुबालकैरनेकै -
रनुयातो विजहार यः प्रमोदात् ।
भवनोपवनोदरे स एको
विजने हाय घने वने स्थितोऽयम् ॥ २७ ॥

ध्रुवः - तीव्रतरं तपत्ययमपि तीव्रकरो भगवान् । तन्मुहूर्तं विश्राम्य गन्तव्यम् । किं कर्तव्यं क्व गन्तव्यं किं जपितव्यं किं स्मर्तव्यं कथं च तप्तव्यमित्येतन्न किंचिदहं जाने । को मां निर्जने घने वनेऽस्मिन्नुपेत्य दयया सर्वमुपदेक्ष्यति ? अथवा मात्रोपदिष्ट इष्टदेव एव मे लक्ष्मीहृदयदेवः सर्वं करिष्यति ।
भग्नोत्सवेषु कलभेषु च कुञ्जरेन्द्रे -
ष्वाशां विमुच्य पतितासु च हस्तिनीषु ।
ग्राहगृहीतमरक्षदहो गजेन्द्रं
यस्तत्पदार्पितसमस्तभरः शयेऽहम् ॥ २८ ॥
(स्वयं शीर्णपर्णशय्यायां शेते शनैः शनैर्निद्रावशतां चोपैति)

विवेकनिधिः - हा ! दृष्ट्वैतद्विदीर्यते मे हृदयम् ।
लीलायां हेमदोलायां निद्रातिस्म सुखेन यः ।
शेते सोऽयं स्वयं शीर्णशीर्णपर्णसमुच्चये ॥ २९ ॥

सुरुचिः - (स्वगतम्) ननु निह्नुवे (निह्नुमि) शेषं वृत्तं तद्दर्शनाक्षमताव्याजेन । (प्रकाशम्) प्राणनाथ ! नैतद्विलोकयितुं केनापि शक्यते । तन्निवार्यतामतः परं ध्रुववृत्तान्तप्रदर्शनान्मुनिवर्यः । शेषं वृत्तं वाचैव निवेदयतु ।

राजा - भगवन् ! सत्यमाह सुरुचिः । न वयं सर्वेऽप्येतद्विलोकयितुं शक्नुमः । तत्प्रदर्शनप्रकारं परिसमाप्य वाचैव शेषं निवेदयतु भगवान् ।

कपिञ्जलः - (स्वगतम्) सुरुचे ! स्वकीयकृत्यगोपनायायं प्रयासः । न तं निष्पापहृदयो राजा वेत्ति । भवतु, मया तु गुरोराज्ञानुसारेण सर्वं तस्याः कृतं स्फुटतां नेयम् (प्रकाशम्) राजन् ! धनुर्मुक्तशरवन्नेन्द्रजालप्रयोगोऽपि दर्शयितुमुपक्रान्तो मध्ये केनापि रोद्धुं शक्यः । तदिदानीं धैर्यमास्थाय कथंचिद्विलोकनीय एव सर्वैः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा - यथाज्ञा तपस्विन: । द्रष्टुमवहिता: स्म: ।

* ध्रुव: - (उत्स्वप्नायते)

उत्तमोत्तम दुराग्रहं त्वमुं
मुञ्च मुञ्च न मया सह त्वया ।
आगते फलमिहापि तद्वसन्
त्वं मम त्वमिव वत्स वत्सल: ॥ ३०॥

राजा - (सास्रं) अहो मूर्तिमान् खल्वयं सौहृदधर्म: । यस्य निजानुजवियोग: स्वप्नेऽप्येवं संतापयति स्वान्तम् ।

सुनीति: - वत्स ! क्व कौशेयपट्टाम्बराणि क्व वल्कलाम्बराणि, क्व चन्दनाङ्गराग: क्व भस्माङ्गराग:, क्व गजमुक्तालङ्कारा क्व रुद्राक्षालंकारा:, क्व मणिमयमन्दिरनिवास: क्व तरुतलनिवास:, क्व सुवर्णशय्याशयनं क्व खवं शीर्णजीर्णपर्णशय्याशयनं च ? वत्सस्यान्यादृशीमेवेमां दशां विलोकयन्त्या अपि मे हृदयं न शतधा स्फुटतीति मन्ये वज्रमयमेव मे हृदयम् ।

(अश्रूणि मुञ्चति)

* ध्रुव: - (पुनरुत्स्वप्नायते)

मातर्मातर्मनसि न मनाङ् मामकीना विधेया
चिन्ता चिन्तामणिरिव हरिश्चिन्तितं न: स कर्ता ।
सर्वापद्भ्य: सदयहृदयो रक्षिता मां स एव
श्रीलक्ष्मीश: प्रणतजनतापारिजात: प्रतापी ॥ ३१॥

(तत: प्रविशत: परमहंसब्रह्मचारिणौ)

* परमहंस: - (ध्रुवं विलोक्य) ब्रह्मचारिन् ! गाढनिद्रानिमग्नोऽयं कुमार: ।

* ब्रह्मचारी - अथ किम् । किमत: परं कर्तव्यं स्फुरति ते ।

राजा - हा ? दुष्टाविमावत्रागतौ ।

सुनीति: - धिक् पापौ ! नेदृशदशे वत्से ध्रुवे युवयोर्दयोदय: ? अथवा पापानां तु कृपा कुत: ?

* परमहंस: - सखे ! निर्जनं वनमेतत् । तदमुं कुमारं निहत्य हरिणगत्या पलायितव्यमावाभ्याम् ।

* ब्रह्मचारी - तत: किं फलम् ? न खलु किमप्यस्ति तत्समीपे ।

* परमहंस: - मूर्ख ! निष्कण्टकराज्यप्राप्तिरेव फलम् ।

* ब्रह्मचारी - मूर्ख ! दासदासस्य ते कुतो राज्यप्राप्ति: ?

* परमहंस: - जन्मत एव जडस्य ते न जाड्यमद्यापि जीर्णम्

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुच्या निष्कण्टकराज्यप्राप्तौ कामसेनादीनां प्राबल्यं तेषां च प्राबल्ये सर्वेषामस्माकमेव राज्यम् । कोऽत्र ते सन्देहः ?

* ब्रह्मचारी – न केवलं कुमारविनाशेन सा कार्यसिद्धिः साध्या । सन्ति तत्पक्षपातिनो विवेकनिध्यादयो बहवः ।

* परमहंसः – अत्रामुं निहत्य बर्हिष्मत्यां गत्वा सोरस्ताडं सशिरस्ताडं साश्रुकुलाकुलाक्षं च यदा निवेदयिष्यावः कुमारस्य वने मरणं तदा तच्छ्रवणोत्तरक्षण एव सुनीतिः पुत्रवियोगविह्वला प्राणान् त्यक्ष्यति । प्रणष्टप्राणायां च सुनीतौ प्रणष्टा एव विवेकनिध्यादयः । सुशीला सुचरित्रानसूयायाश्च तत्पक्षपातिन्यो हतप्राणा एव भविष्यन्ति । ततः सुलभा निष्कण्टकराज्यप्राप्तिः ।

* ब्रह्मचारी – यद्येवं तर्हि ममापि मतिर्भवन्मतमनुसरति ।

* परमहंसः – तर्हि निष्कोशमसिधेनुकां गृहीत्वा सज्जो भव ।

* ब्रह्मचारी – अयमहं सज्जः । (इत्युभौ ध्रुवं हन्तुमभिधावतः)

राजा – मा मा दुष्टावकृत्यं कुरुतम् । पापयोरयैव शिरसी छिनद्मि ।
(उत्पातुमिच्छति)

विवेकनिधिः – देव ! देव ! व्यतीतमेतत् ।

सुनीतिः – अलमलमलमेतद्वीक्षितुं नास्मि शक्ता
मुनिवर ! भवदीयं त्विन्द्रजालं विचित्रम् ।
विरम विरम तस्मान्मोहमेत्यन्तरात्मा
तिमिरमिहममेदं नेत्रयोश्चाविरास्ते ॥ ३२ ॥
(मूर्च्छया पतति)

विवेकनिधिः – भगवन्कपिञ्जल ! विरम्यतामस्मादुष्परिणामाद्व्यवसायात् ।

राजा – भगवन् ! ममापि मतं विवेकनिधिमतमनुसरति ।

सुरुचिः – (स्वगतम्) कपिञ्जलो विरमेच्चेत् सुभाग्याहम् (प्रकाशम्) ममापि महाराजमतमेवानुसरति मतिः ।

कपिञ्जलः – मा भयं भजत । सत्परिणाममेव भवितेन्द्रजालम् । तत् शीतोपचारैः सुनीतिं ससंज्ञां कुरुत ।
(सुशीला सुचरित्रे तथा कुरुतः)

सुनीतिः –(लब्धसंज्ञा समुत्थाय) सख्यौ ! विरमतं विरमतं प्रयासात् ।

सुशीला-सुचरित्रे ? कोऽयं प्रयासः ?

* ध्रुवः – (पुनर्निद्राप्रलापमलपति)

चरणं करवाणि तावकं शरणं श्रीरमणानुवासरं ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

त्वयि मुक्तभरो गतज्वरो न बिभेम्युग्रतमायमादपि ॥33॥

* ब्रह्मचारी - (साशङ्कं परावृत्य) मूर्ख ! जागर्त्ययम् ।

* परमहंसः - (निपुणं विलोक्य) मूर्खाधिराज ! निद्राप्रलापपरतन्त्रोऽयं न जागर्ति । मा भैषीः प्रहर च्छुरिकाम् ।

* ब्रह्मचारी - न प्रहरिष्यामि । जागर्ति खल्वयम् । त्वमेव प्रथमं प्रहर ।

* परमहंसः - धिग् रे वज्रमूर्ख ! सद्यः कर्तव्ये विलम्बमालम्बसे । नायं जागर्ति । पश्याहमेव प्रथमं प्रहरामि ।

(प्रहर्तुमभिधावति)

(आकाशे)

जागर्ति जागर्ति नितान्तमेषः

* परमहंसः - (सभयाश्चर्यम्) हा ! कोऽयं ब्रूते निःशरीरः ? (सर्वतोऽवलोक्य) न कश्चित् । केवलं मनो मे बिभेति ।

(पुनः प्रहर्तुं धावति)

(पुनराकाशे)

जागर्ति जागर्ति नितान्तमेषः ।

* परमहंसः - ननु को जागर्ति ?

(आकाशे)

श्री वासुदेवः स्वजनावनाय
दयामयात्मा नृहरिर्बभूव
प्रह्लादमाह्लादयितुं य ईशः ॥34॥

* परमहंसः - (सभयम्) ब्रह्मचारिन् ! कस्यचित् तपस्विन इव श्रूयते स्वनः । तदेहि वृक्षखण्डेऽस्मिन्निलीय स्थास्यावः ।

* ब्रह्मचारी - तथा कुर्वः । (वृक्षखण्डे निलीय तिष्ठतः)

ततः प्रविशति आकाशमार्गेण वीणापाणिर्महामुनिर्नारदः ।

* नारदः - ('जागर्ति जागर्ति' इति पुनः पठित्वा स्मृतिमभिनीय) अहो भगवतः स्वभक्तवत्सलता ! यः स्वयं परितः प्रसरत्सलिलयन्त्रमुखनिर्गलत्सलिलधारासाराडम्बरिताऽकाण्डप्रावृषि धारागृहे गाढनिद्रानिगूढोऽप्यकस्मादुत्थाय स्वयशोगायन्तं मां समीपे समाहूय नारद नारद ! महीपतेरुत्तानपादस्य पुत्रो निजापरजननीमुखनिःसृतनिशितवचनविशिखविशीर्णहृदयः परमाभ्युदयप्राप्तये मां शरणं गतस्तपसे प्रस्थित इदानीं बर्हिष्मतीनिकटविकटाटवीवनेषु परिभ्रमति, ततस्तत्र गत्वा मन्मन्त्रोपदेशेन तं कृतार्थं कुर्वित्याज्ञापयाबभूव ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तदहो तत्क्षणमेव वैकुण्ठात्प्रस्थितेन मया समासादितमिदं निर्जनं घनं च वनम् । दुर्गकान्तारान्तरपरिभ्रमणपरिश्रमलुलितगात्रश्चात्र कुमारोऽयं निद्राति । भवतु । न कस्यापि निद्राभङ्गो विधेय इति शास्त्रम् । तदत्र सरःपरिसरे तरत्तुंगतरतरङ्गपरम्परास्फालनशीतलतले शिलातले तरुणतमतमालमालाविरल-च्छायाछादिततीव्रतरतीव्रकरकरनिकरे क्षणमुपविश्य वीणयापि भगवन्तं भक्त-जनवत्सलं श्रीवासुदेवं यावत् तावत्कुमारोऽपि स्वयं विसर्जितनिद्रो भविष्यति ।

(शिलातलमधिश्रित्य तथा करोति)

जयति जयति देवः श्रीपतिर्वासुदेवः ।
सकलनिगमगीतानन्तकीर्तिः कृपालुः ।
स्मरणमपि यदीयं चिन्तितार्थप्रदाने
निरुपमतमचिन्तारत्नतां याति लोके ॥ 35 ॥
कमपरमुपयामस्त्वं विहायात्र देवं
सदयहृदयमीशं भक्तलोके कभक्ते ?
प्रियतममखिलेऽस्मिन्नास्ति यस्यात्मभक्ता-
दपरमखिललोकाधीश्वरस्यापि लोके ॥ 36 ॥

* **ध्रुवः** – (निमीलितनेत्र एव) कोऽयमश्रुतपूर्वो वीणाध्वनिः ? किमयं स्वप्नो मे जागरितं वा ? कुतो वाऽरण्ये वीणारणितम् ? ततः स्वप्न एवायम् । स्वप्नोऽपि भगवन्महिमश्रवणेन सुखदः । (क्षणं निशम्य) ननु जागर्म्येव । नायं स्वप्नः । (उत्थायाक्षिणी उन्मील्य सर्वतोऽवलोक्य च साश्चर्यम्) अहो ! कोऽयं दिव्यो मुनिः सरस्तटशिलातलमलङ्करोति ? (उत्थाय) भगवन्, अभिवादये भगवन्तम् । (दण्डवत्प्रणमति)

* **नारदः** – वत्स ! सद्य एव संप्राप्तसर्वाभिलाषसंपद्भव । भद्रमुख, कतमं कुलमलङ्कृतं भवता जन्मना, का माता रत्नप्रसूत्वप्रख्यातिं प्रापिता, कश्च पिता सत्पुत्रवद्धुरीणतामुपनीतः, किमर्थं चैतद-तिभयंकरं विजनं घनं च वनं संप्राप्तो वत्स इति ज्ञातुमिच्छामि मे ।

ध्रुवः – भगवन् ! आदिमनुवंशमुक्तामणेर्महीमण्डलाखण्डलस्य महा-राजस्योत्तानपादस्य देव्याश्च सुनीत्याः पुत्रं ध्रुवाभिधानं भवच्चरणकिङ्करममुं जानीहि ।

नारदः – वत्स ! समवगतं राजकुमारोऽसीति । सत्यपि राजकुमारत्वे किमर्थं वयोवस्थाप्रतिकूलं भस्मरुद्राक्षादिधारणं वनवासव्यसनं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

न्याङ्गीकृतं वत्सेन ?

* ध्रुवः – अस्ति मे सुरुचिसंज्ञापरमाता । तया च राज्यसिंहासनारूढस्य महाराजस्याङ्के निषण्णं मामधो निपात्य "दुष्ट दुर्भगातनय ! नेदं नृपासनं त्वमारोढुं योग्यः । सुरुचितनुजन्मनैवेदमारोहणीयं न सुनीतिसंभवेन । यद्यस्ति दुर्लभेऽप्ये मनोरथस्तर्हि तपसा परमेश्वरमाराध्य गृहीतव्यं त्वया पुनर्मदुदराज्जन्म " इत्युक्तोऽहं मात्रा सुरुच्या । तत एव परित्यज्य राज्यसुखानि मातुः श्रीसुनीत्याः सौभाग्यसंपत्प्रसिद्धये मत्पूर्वजैरप्यनासादितपूर्वं च पदमधिरोढुं श्रीकमलवासिनीविलासिनं शरणीकृत्य तप एव कर्तुमिहागतोऽस्मि ।

नारदः – (स्वगतम्)

अहो तेजः क्षत्रियाणां मानभङ्गमसृष्यताम् ।
बालोऽप्ययं हृदा धत्ते यत्समातुरसद्वचः ॥ 37 ॥

(प्रकाशम्) वत्स, तवापरमातुर्वचनश्रवणानन्तरं महाराजेन किमप्युक्तं न वा ?

ध्रुवः – भगवन् न किमप्युक्तम् ।

नारदः – अहो ! धिग् राजमदान्धानामद्भुततममान्ध्यम् । यत्सचक्षुषोपि न पश्यन्ति । मन्य एतेषां हिताहितविवेकवैचक्षण्यं तु राज्याभिषेकसमये तीर्थसलिलसहस्रधाराभिरेव क्षाल्यते । स्त्रीजितता च राज्यश्रीरिव तस्मिन्नेव समये तान् वृणुते । साहसकारिता च तस्मिन्नेव समये सहचरी भवतीति ।

राजा – (लज्जयाधोमुखो भूत्वा) भगवन् ! सर्वमपि घटते मय्येवैतत् ।

सुरुचिः – (स्वगतम्) केन मे पापेनादानीमेवायमैन्द्रजालिक आगतः ?

विवेकनिधिः – (स्वगतम्) युक्तमेवोच्यते नारदेन ।

सुनीतिः – व्यथते मे श्रवणेन्द्रियं हृदयं च हृदयदयितनिन्दयाऽनया ।

* नारदः – किञ्च तादृशा स्त्रीजिता चराचरा न नराः किंतु वा (इत्यधोक्ते)

* ध्रुवः – (समुत्थाय बद्धाञ्जलिः) अलमलं भगवन् प्रसङ्गान्तरमेतत् । अथवा मच्चित्तपरीक्षणोपायोयं भगवतः । किमविदितं देवस्य सर्वं दैववशं जगदिति ? सुगृहीतनामानोऽतिपुण्यपवित्रचरित्रा मे तातचरणा नैतद्विषये कमपि दोषमर्हन्ति । नाप्यपरमाता मे तत्स्वसा सुरुचिः । किंतु मदीयं दैवमेव तत्रोपालम्भमर्हतीति मन्येहम् । मयि करुणावेशविवशतयापि भवद्भिः कृतो मे तातचरणेष्वधिक्षेपः क्षते क्षारायते मे ।

सुनीतिः – वत्स ! शोभते मत्पुत्रस्यैतत्ते ।

* नारदः – वत्स ? भवत्वनपराधी तातस्ते । परं सुरुचिमपि कथमनपराधिनीं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तदाहो त्वरक्षणमेव वैकुण्ठात्प्रस्थितेन मया समासादितमिदं निर्जनं घनं च वनम् । दुर्गकान्तारान्तरपरिभ्रमणपरिश्रमलुलितगात्रश्चात्र कुमारोऽयं निद्राति । भवतु । न कस्यापि निद्राभङ्गो विधेय इति शास्त्रम् । तदत्र सरःपरिसरे तरत्तुङ्गतरतरङ्गपरम्परास्फालनशीतलतले शिलातले तरुणतमतमालमालाविरलच्छायादिततीव्रतरतीव्रकरकरनिकरे क्षणमुपविश्यो पवीणयापि भगवन्तं भक्तजनवत्सलं श्रीवासुदेवं यावत् तावत्कुमारोऽपि स्वयं विसर्जितनिद्रो भविष्यति ।

(शिलातलमधिश्रित्य तथा करोति)

जयति जयति देवः श्रीपतिर्वासुदेवः ।
सकलनिगमगीतानन्तकीर्तिः कृपालुः ।
स्मरणमपि यदीयं चिन्तितार्थप्रदाने
निरुपमतमचिन्तारत्नतां याति लोके ॥ 35 ॥
कमपरमुपयामस्त्वं विहायात्र देवं
सदयहृदयमीशं भक्तलोकैकभक्तं ।
प्रियतममखिलेऽस्मिन्नास्ति यस्यात्मभक्ता-
दपरमखिललोकाधीश्वरस्यापि लोके ॥ 36 ॥

* **ध्रुवः** – (निमीलितनेत्र एव) कोऽयमश्रुतपूर्वो वीणाध्वनिः ? किमयं स्वप्नो मे जागरितं वा ? कुतो वाऽरण्ये वीणारणितम् ? ततः स्वप्न एवायम् । स्वप्नेऽपि भगवन्महिमश्रवणेन सुखदः । (क्षणं निशम्य) ननु जागर्म्येव । नायं स्वप्नः । (उत्थायाक्षिणी उन्मील्य सर्वतोऽवलोक्य च साश्चर्यम्) अहो ! कोऽयं दिव्यो मुनिः सरस्तटशिलातलमलङ्करोति ? (उत्थाय) भगवन् , अभिवादये भगवन्तम् । (दण्डवत्प्रणमति)

* **नारदः** – वत्स ! सद्य एव संप्राप्तसर्वाभिलाषसंपद्भव । भद्रमुख , कतमं कुलमलङ्कृतं भवता जन्मना , का माता रत्नप्रसूत्वप्रख्यातिं प्रापिता , कश्च पिता सत्पुत्रवद्धुरीणतामुपनीतः , किमर्थं चैतदतिभयंकरं विजनं घनं च वनं संप्राप्तो वत्स इति ज्ञातुमिच्छा मे ।

* **ध्रुवः** – भगवन् ! आदिमनुवंशमुक्तामणेर्महीमण्डलाखण्डलस्य महाराजस्योत्तानपादस्य देव्याश्च सुनीत्याः पुत्रं ध्रुवाभिधानं भवच्चरणकिङ्करममुं जानीहि ।

नारदः – वत्स ! समवगतं राजकुमारोऽसीति । सत्यपि राजकुमारत्वे किमर्थं कथोवस्थाप्रतिकूलं भन्मरत्नादिपरित्यज्य वनवासव्यसनं

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चाङ्गीकृतं वत्सेन ?

*ध्रुवः – अस्ति मे सुरुचिसंज्ञा परमाता । तया च राज्यसिंहासनारूढस्य महाराजस्याङ्के निषण्णं मामधो निपात्य "दुष्ट दुर्भगातनय ! नेदं नृपासनं त्वमारोढुं योग्यः । सुरुचितनुजनुषैवेदमारोहणीयं न सुनीतिसंभवेन । यद्यस्ति दुर्लभेऽस्मिन् मनोरथस्तर्हि तपसा परमेश्वरमाराध्य गृहीतव्यं त्वया पुनर्मदुदराज्जन्म " इत्युक्तोऽहं मात्रा सुरुच्या । तत एव परित्यज्य राज्यसुखानि मातुः श्रीसुनीत्याः सौभाग्यसंपत्प्रसिद्धये मत्पूर्वजैरप्यनासादितपूर्वं च पदमपि रोढुं श्रीकमलवासिनीविलासिनं शरणीकृत्य तप एव कर्तुमिहागतोऽस्मि ।

नारदः – (स्वगतम्)

अहो तेजः क्षत्रियाणां मानभङ्गमसृष्यताम् ।
बालोऽप्ययं हृदा धत्ते यत्समातुरसद्वचः ॥ 37 ॥

(प्रकाशम्) वत्स, तवापरमातुर्वचनश्रवणानन्तरं महाराजेन किमप्युक्तं न वा ?

ध्रुवः – भगवन् न किमप्युक्तम् ।

नारदः – अहो ! धिग् राजमदान्धानामद्भुततममान्ध्यम् । यत्सचक्षुषोऽपि न पश्यन्ति । मन्ये एतेषां हिताहितविवेकवैचक्षण्यं तु राज्याभिषेकसमये तीर्थसलिलसहस्रधाराभिरेव क्षाल्यते । स्त्रीजितता च राज्यश्रीरिव तस्मिन्नेव समये तान् वृणुते । साहसकारिता च तस्मिन्नेव समये सहचरी भवतीति ।

राजा – (लज्जयाऽधोमुखो भूत्वा) भगवन् ! सर्वमपि घटते मय्येवैतत् ।

सुरुचिः – (स्वगतम्) केन मे पापेनादानीमेवायमैन्द्रजालिक आगतः ?

विवेकनिधिः – (स्वगतम्) युक्तमेवोच्यते नारदेन ।

सुनीतिः – व्यथते मे श्रवणेन्द्रियं हृदयं च हृदयदयितनिन्दयाऽनया ।

*नारदः – किञ्च तादृशा स्त्रीजिता धरावरा न नराः किंतु वा (इत्यर्धोक्ते)

*ध्रुवः – (समुत्थाय बद्धाञ्जलिः) अलमलं भगवन् प्रसङ्गान्तरमेतत् । अथवा मच्चिन्तपरीक्षणोपायोऽयं भगवतः । किमविदितं देवस्य सर्वं दैववशं जगदिति ? सुगृहीतनामानोऽतिपुण्यपवित्रचरित्रा मे तातचरणा नैतद्विषये कमपि दोषमर्हन्ति । नाप्यपरमाता मे तत्वत्स्ना सुरुचिः । किंतु मदीयं दैवमेव तत्रोपालम्भमर्हतीति मन्येहम् । मयि करुणावेशविवशतयापि भवद्भिः कृतो मे तातचरणेष्वधिक्षेपः क्षते क्षारायते मे ।

सुनीतिः – वत्स ! शोभते मत्पुत्रस्यैतत् ।

*नारदः – वत्स ! [illegible] नातस्ते । परं सुरुचिमपि कथमनपराधिनीं

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मन्यसे यथा सर्वमिदं कृतम् ।

* ध्रुवः - भगवन् !

माता यथैव परमं किल दैवतं मे-
पूज्यः पितापि च तथैव हि दैवतं मे ।
ताभ्यां समां च सुरुचिं जननीं मदीयां
मन्ये मनोवचनकर्मभिरेकरूपः ॥ ३८ ॥

राजा — वत्स ! धन्या ते गुरुजनभक्तिः ।

सुरुचिः - वत्स ! दुराशया अभ्यसूयया वचनैर्वञ्चितचित्ता नेदृशं तेऽलौकिकं गुणगणमप्यविदम् ।

* नारदः - वत्स ! यद्येवं तर्हि निवर्तस्व । राजानं सम्यगुपदिश्य त्वां सन्मानपात्रं युवराजपदाधिरूढं च कारयितास्मि ।

निखिलनिजजनानां स्वान्तसंतापहेतुम्
परिहर परितापं तापसं चापि वेशम् ।
अलमलमलमस्मिन् वत्स बाल्ये तपोभि-
र्वयसि तु चरमे त्वं पुत्र कुर्यास्तपांसि ॥ ३९ ॥

इदानीं तु मद्वचसा महाराजेन तुभ्यं यौवराज्ये समर्पिते -

मणिगणखचितोच्चैः स्वर्णसिंहासनस्थो
नतनरपतिचूडारत्ननीराजिताङ्घ्रिः ।
हरिकरिनरनौकास्यन्दनैः संचरन् स-
न्ननुभव नृपलक्ष्मीलाभसौख्यं त्वनन्तम् ॥ ५० ॥

राजा - (स्वगतम्) भगवन् ! बहूपकृतं मयि भगवता । यथा त्वदुक्तं सर्वं कर्तुमवहितोऽस्मि ।

* ध्रुवः - भगवन् ! नायमायासस्तदर्थम् । वत्स उत्तम एवोत्तमस्तत्सर्वं प्राप्तुम् । मम तु मत्पूर्वजैरप्यनासादितपूर्वमेव किमपि पदमारोढुमयं परिकरबन्धः ।

* नारदः - वत्स ! बालबुद्धिरेषा ते । यत्करस्थितमिव प्राज्यं साम्राज्यं मया दीयमानमपि परित्यज्य किमपि दुर्लभं लब्धुं मनोरथं बध्नासि । किञ्च यं देवमाराध्य स्वमनोरथसिद्धिमाकाङ्क्षसे सोऽपि जन्मनियुतैरपि दुस्तोषो न योगिभिर्गम्यो न तपस्विभिः प्राप्यो न च दैवैरपि दृश्यः । ततो दुराग्रहममुं विमुच्य मया सहागच्छ पितुस्ते राजधानीम् । मद्वचसा च पिता ते राज्यमपि तुभ्यं समर्पयिष्यति ।

ध्रुवः — भगवन् ! राज्यमेतन्मयि करुणां विधाय वत्सायोत्तमाय

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पिता मे यथार्थचेत्तया विधेयम् । न मे तस्मिन् स्पृहा । श्री गजेन्द्र-रक्षणदीक्षित: श्रीनारायणो दुस्तोषो वा सुतोषो वा भवतु । मया तु स एव समाराध्य: । तत्प्रसादाच्च मनोरथ: पूर्णतां नेय: । यतो मन्मात्रा स एव परमं दैवतं न इत्युपदिष्टं मह्यम् ।

त्वयि गुरौ सति देव दयामये
मयि तथैव भवद्वचनानुगे ।
मयि कथं करुणावरुणालयो
न तरुणां करुणां स करिष्यति ॥ ५१ ॥

किञ्च

अयि मयि तु दयादृशं दयाब्धि-
श्चरति तपांस्यपि दुश्चराणि देव: ।
यदि न रचयिता तदा मदीयं
वपुरपि ध्यानलसादिदं करिष्ये ॥ ५२ ॥

* नारद: - वत्स! सत्यं तपसा तुष्यति हरिरिति । नियमेन तपसावश्यं तुष्येदेव देवदेव: तथापि बहुविघ्नानि श्रेयांसीति नाविदितं ते ।

कति कति न तपोवने वसन्ति
पतितरुमूलममूलमन्त्रसाध्या: ।
मणिधरफणिनां गणा: कराला-
विषमगराजगराश्च राजसूनो ॥ ५३ ॥

कति कति हरयो न कुम्भिकुम्भ-
स्थलदलनप्रबला वसन्ति तस्मिन्
कति कति च न वानरा वराहा:
कति न गजा नगजास्तरक्षवश्च ॥ ५४ ॥

भूतप्रेतपिशाचा: कति कति न तपोवनेषु विचरन्ति ।
धीराणामपि धैर्यस्थैर्यं कुर्वन्ति ये क्षणेन चलम् ॥ ५५ ॥

किं बहुना ? सर्वथा त्वादृशेन सुकुमारेण राजकुमारेण तपोवने प्रवेशोऽपि दुष्करतरस्तपश्चरणवार्ता तु दूरापास्ता । ततो मद्वचनमनुरुध्य पितु: पुरं प्रतिनिवर्तस्व इति मे मतम् ।

* ध्रुव: - भगवन् ! श्रूयतामिदानीं मन्मतम् ।

यदि हरिस्तपसा परितुष्यति
प्रणतपालकृपालुशिरोमणि: ।
कुरु ... तर्हि जनस्त्वयम्

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुनतयश्चरमा नहि चैदिमा: ॥ ५६ ॥

हरन्तु हरयो वपुर्वनवराहयूथानि वा
दशन्तु फणिनां गणा: कवलयन्तु भूतदय: ।
[गि?] गलन्त्वजगराश्च वा नरहरिप्रसादं विना
सुनीतितनयो ध्रुवो नहि पुनर्गृहं प्राप्स्यति ॥ ५७ ॥

राजा – अहो बाल्येऽपि दृढाग्रहत्वं वत्सस्य !

सुनीति: – दु:श्रवणमेतत् ।

* नारद: – (स्वगतम्) अतिभूमिकामारूढो वत्सस्य सदाग्रह: । शृणोम्यधिकमपि तदीयमुत्साहवचनम् (प्रकाशम्) ततस्तत: ?

* ध्रुव: – किं बहुना ?

पदमासादयिष्यामि परमं परमेशितु: ।
वपुर्वा पातयिष्यामि तपोभिरतिदुष्करै: ॥ ५८ ॥

अथवा किं संशयेन ?

कृपापारावारान्मनुमनुपमं सद्गुरुवराद्
गृहीत्वाऽहं त्वत्तो हरिमुपचरिष्यामि नियत: ।
ततस्तूर्णं लक्ष्मीहृदयदयित: पूर्णकरुण:
कृतार्थं कर्ता मां न हरिपदभक्तिर्हि विफला ॥ ५९ ॥

* नारद: – (सानन्दम्) साधु, राजकुमार, साधु । भगवति दृढभक्तिरसीति तुष्टोऽहम् ।

भक्त्या हरौ विमलयाचलया गुरौ च
प्रीतोऽस्मि तद्वरमनन्यसमं वृणीष्व ।
मां त्वं त्ववेहि भगवत्पदयोरनन्य-
भक्तं नरेन्द्रसुत नारदनामधेयम् ॥ ६० ॥

* ध्रुव: – (साश्चर्यं सानन्दम्) किं भगवान्नारद एव ! तर्हि तु धन्योऽयं वासर:, धन्येयं वेला, धन्यश्चाहं यतोऽद्य भगवत: श्रीलक्ष्मी-कान्तस्य परमहृदयं भगवन्तं पश्यामि । न खलु स्वल्पपुण्यै: श्रीमतां दर्शनं स्वप्नेऽपि लभ्यम् । तेन सुवर्णसूर्योदयवन्तं पीयूषवृष्टिमन्तमिव चेमं वासरं मन्येऽहम् । तदेतत् प्रार्थये –

वरार्हं मन्यसे मां चेद्, यदि देयो वरश्च मे ।
श्रीश्रीकान्तप्रियं तर्हि मन्त्रं कमपि मे दिश ॥ ६१ ॥

* नारद: – वत्स ! यद्येवं तवेच्छा तर्हि तुभ्यमुपदेक्ष्यामि भगवत्प्रियतमं द्वादशाक्षरं [illegible] त्वया मधुवनं गत्वा

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीयमुनातीरे जप्तव्य:। ततस्ते सद्य: सिद्धिर्भवित्री।

परमहंस: – कपटकरण्ड! मुनेरस्य तेज एव मां दूरतस्तापयति। मन्ये कदाचिद्दृष्टिगोचरावावां रोषाद्धक्ष्यतीति। तदेहि त्वरिततरं पलायनं कुर्वहे।

* ब्रह्मचारी – पिशुनापीड! सत्यमुक्तं त्वया। किं चैतावद्वृत्तान्तकथनेनापि भजिष्यावोऽभ्यसूयाया: प्रीतिदानपात्रताम्। तदेहि गच्छाव:।

(उभौ पलायेते)

* ध्रुव: – भगवन्! क्व मधुवनं केन पथा गन्तव्यमित्येतद्विषयेऽप्यनभिज्ञ एवास्मि।

* नारद: – मा चिन्तां कुरु। एहि सरस्यस्मिन् स्नानं विधाय प्रथमं मन्त्रमिमं गृहाण।

* ध्रुव: – यथाज्ञा भगवत:।

(नारदेन सह सरस्यवतीर्य निमज्योन्मज्य च सर्वतो विलोक्य)

चञ्चच्चामीकरप्रोच्चप्राकारा परिखावृता।
केयं तु नगरी रम्या मणिहर्म्यावलीयुता॥ 52॥
वैदूर्यनिर्मलजला परित: कदम्ब-
खण्डैर्वृता नयनहर्षकरी नदीयं।
का-वा विभो कतममिन्द्रमणिप्रभाभं
पुण्यं तपोवनमिदं घनकुञ्जपुञ्जम्॥ 53॥

* नारद: – वत्स! सेयं मधुरापुरी। सेयं च श्रीतपनतनया नदी। इदं च तन्मधुवनम्। अत्रैव स्थित्वा त्वया तपस्तप्तव्यं जप्तव्यश्चायं द्वादशाक्षरो मन्त्र:।

(कर्णे मन्त्रमुपदिशति)

* ध्रुव: – (दण्डवत् प्रणम्य) कृत: कृतार्थो भगवताऽहं मन्त्रोपदेशप्रदानानुग्रहेण।

राजा – (स्वगतम्) भाग्यवान् वत्सो यस्य भगवता नारदेन गुरु-पदमङ्गीकृतम्।

सुनीति: – (स्वगतम्) हस्तस्थित: खल्विदानीं वत्सस्याभ्युदय:।

* नारद: – वत्स! योऽयं तुभ्यं मन्त्र उपदिष्टस्तदधिष्ठाता देव: श्रीवासुदेव: सर्वेषु चराचरेषु पूजनान्ते नित्यं चिन्तनीय:। वासुदेव: सर्वमिदमिति चिन्तनीयम्।

* ध्रुव: – बाढं, धृतं शिरसा गुरुशासनम्।

नारद: – वत्स! गच्छामीदानीं श्रीनारायणाश्रमम्।

(आकाशमार्गेण गच्छति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

* ध्रुवः – (उच्चैर्विलोक्य) अहो ! परमकृपालुर्भगवान् नेत्रपथमतिक्रान्तः । क्व कदा वा पुनस्तद्दर्शनसुखमनुभविष्यामि । अलमिदानीमेतद्विचा-रेण । तदुपदिष्टमेवाचरामि । (क्षणं विचार्य) गच्छामि तावद्भगवत्प-रिचर्यां समारब्धुम् ।

(निष्क्रान्तः)

(ततः प्रविशति रथाधिरूढाभ्यसूया)

* अभ्यसूया – महता प्रयासेन पञ्चदशभिर्दिवसैः प्राप्ताहं मधुरापुरी-परिसरम् । लोका इदमेव वनं मधुवनं कथयन्ति । कपट-करण्डोक्त्यनुसारेणात्रैव क्वचित्कुमारेण तपस्विवेषेण भाव्यम् तत्तावदन्वेषयामि ।

(रथादवतीर्य परिक्रामति)

राजा – एषोऽभ्यसूयावृत्तान्तः प्रक्रान्त ऐन्द्रजालिकेन ।

सुरुचिः – (स्वगतम्) प्रथममेव मया स्वात्मा रक्षणीयः (प्रकाशम्) महाराज ! मयाऽभ्यसूयाया ईदृशं क्रूरतरं हृदयमस्तीति न विदित्वा ध्रुवानयनाय प्रेषिता । सा तु पापा तत्र किं करिष्यतीति न जाने ।

राजा – कस्तत्र तवापराधः । यत्करिष्यति तद्द्रक्ष्याम इदानीमेव ।

सुनीतिः – (स्वगतम्) कदा पुनर्वत्सं ध्रुवं दर्शयिष्यति दयालुरैन्द्रजालिकः ।

(ततः प्रविशति पात्रहस्तो ध्रुवः)

* ध्रुवः – (फलदलप्रसूनभारनमांस्तरून् विलोक्य)

तरवो न फलं दलं प्रसूनं
भवदीयं त्ववचेतुमस्मि शक्तः ।
यदहं त्विह वासुदेवरूपान्
भवतो वेद्मि ततो नतोऽस्मि युष्मान् ॥५५॥

(पात्रमधो निधाय प्रणमति)

(पात्रं च स्वयं समर्पितैः फलदलप्रसूनैः पूर्णं भवति)

* अभ्यसूया – (विलोक्य) अहो कुमारस्त्वत्रैव तरुखण्डे किञ्चिदन्-तिष्ठति । भवतु, लतान्तरिता विलोकयामि ।

(लतान्तरे निलीय तिष्ठति)

* ध्रुवः – (श्रीयमुनां विलोक्य सानन्दम्) अहो गुरूपदेशमाहात्म्यम् ।

पतितरङ्गमहो यमुनाजलं
~~मम~~ रमारमणो नयनातिथिः ।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भवति नूतननीरदसुन्दरः
कमलकोमललोलविलोचनः ॥ ५५ ॥

नमः प्रतितरङ्गप्रकाशमानाय श्रीवासुदेवाय ।
(दण्डवत्प्रणमति)

राजा - सिद्धो वत्सस्य सर्वत्र वासुदेवभावः ।

सुनीतिः - (स्वगतम्) वत्स ! धन्या ते निर्व्याजा भगवद्भक्तिः ।

* अभ्यसूया - दुःखोद्रेकादुन्मत्त इवायं मे प्रतीयते । यत एकाकी किमपि किमप्यसंबद्धं प्रलपति । सुनीतिपुत्र ईदृशीं दशामेवार्हति ।

* ध्रुवः - (परितोऽवलोक्य)

तालेतमालेऽपि तथा रसाले
शाले प्रियालेऽपि तमेकमेव ।
पश्यामि पीताम्बरमार्तबन्धुं
श्रीवासुदेवं सकलेष्टदेवम् ॥ ५६ ॥

* अभ्यसूया - असंशयं विकल एवायम् ।

* ध्रुवः - (पुष्पैः पत्रैः फलैश्च पूर्णं पात्रं वीक्ष्य)
अहो मत्प्रार्थितैस्तरुवरैः स्वयमेव करुणया पूरितं पत्रैः पुष्पैः फलैश्च मे पात्रम् । तदाश्रमं गत्वा रचयामि भगवत्पूजाम् ।
(निजाश्रमं प्रतिगच्छति । अभ्यसूया चालक्षितैव शनैः शनैरनुगच्छति)

(ततः प्रविशति परमेश्वरपूजानिमग्नो ध्रुवः)

अभ्यसूया - (प्रविश्य ध्रुवं दृष्ट्वा च) मणिमन्दिराण्यपहाय पर्णोटजवासं सुनीतिपुत्रं विलोक्य संतुष्यति स्वान्तं मे । बिनाभ्यसूयया कान्या कर्तुमिदं शक्ता ? इदानीं मया तपोभङ्गं विधाय अतो भ्रष्टस्ततो भ्रष्टो विधेयोऽयम् । परिसमाप्तपूजने कुमारे सर्वं मन्मतिकौशल्यं करिष्यामि ।
(तरुतले तिष्ठति)

* ध्रुवः - (परमेश्वरपरिचर्यां परिसमाप्य सगद्गदं साश्रु च)

करुणावरुणालय प्रभो
करुणादृग्लहरीः प्रतिक्षणम् ।
प्रणतेष्वखिलेषु निःक्षिपा -
खिलसन्मङ्गलमौक्तिकोज्ज्वलाः ॥ ५७ ॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा- अहो ! भक्त्युद्रेको भगवति वत्सलस्य ।

सुनीतिः - परमया नया ते भक्त्या तुष्यतु भक्तप्रियो भगवांस्तुभ्यम् ।

* अभ्यसूया - (स्वगतम्) उन्मत्त एवायं यतो मृण्मयीं मूर्तिमपि न जानाति ।

* ध्रुवः - श्रीत्रिविक्रम रमाहृदीश्वर
त्वं मदीयहृदये वसानिशम् ।
भक्तलोकसकलार्थसिद्धिदः
कल्पपादप इव स्मृतोपि यः ॥ 58 ॥

* अभ्यसूया - (समीपं गत्वा) कुमार ! अभिजानासि माम् ?

* ध्रुवः - (अनाकर्णितकेन)
यौ निःसीमानुपमितमिथः प्रेमपीयूषपूर्णौ
यावन्योन्याननशशिकलासक्तचेतश्चकोरौ ।
यौ च स्वीयाश्रितजनमनोभीष्टदानोद्यतौ तौ
लक्ष्मीलक्ष्मीहृदयदयितौ सर्वलक्ष्मीप्रदौ स्ताम् ॥ 59 ॥
(दण्डवत्प्रणिपत्य पुष्पाञ्जलीन् समर्प्य प्रदक्षिणां कुरुते)

* अभ्यसूया - (स्वगतम्) अद्भुतैव कुमारस्योन्मत्तता यया निकटस्थितामपि न पश्यति । (पुनः प्रकाशम्) कुमार ! अभिजानासि माम् ?

* ध्रुवः - (साश्चर्यम् विलोक्य) किं मातुः श्रीसुरुचेः प्रीतिपात्रमभ्यसूया ? नमामि त्वाम् । अपि कुशलं मातृचरणानां पितृचरणानां च ?

* अभ्यसूया - कुशलं सर्वेषाम् । त्वद्वियोगेन दुःसहं दुःखमनुभवतिं माता ते सुरुचिः पिता च ।

* ध्रुवः - वात्सल्यविवशयोस्तयोः स्यादेव पुत्रवियोगदुःखम् । ततस्ततः ?

* अभ्यसूया- ततस्ताभ्यां तवानयनायात्र प्रेषिताऽहम् ।

* ध्रुवः अपि कुशलं वत्सस्योत्तमस्य ?

* अभ्यसूया - स खलु भवद्वियोगदुःखितो नाहमत्र विना ध्रुवं स्थातुं शक्नोमीति वदन् तन्मातुलगृहे गतः । देवी सुरुचिस्तु त्वद्वियोग-विह्वला नान्नमश्नाति । न सुखं शेते । न च कुत्रापि सुखं विन्दते । केवलं शून्यहृदया नयनाभ्यामश्रुधारासारान् वर्षन्ती "हा ! वत्स ध्रुव, क्व कदा वा त्वन्मुखदर्शनसुखमहमनुभविष्यामि" इति प्रलपन्ती रात्रिंदिनानि ~~च~~ क्षयं नयति । तदयं स्वकीयो रथस्तया तुभ्यं प्रेषितोऽस्ति । इमानि च दिव्यान्याभरणानि दिव्यान्य-म्बराणि चेमानि प्रेषितानि । तानि सर्वाणि विधार्य रथमारुह्य बर्हिभमबीमभसल्य मातृचरणानां पितृचरणानां च नयनानि सुखयेति मे अभ्यर्थना ।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

* ध्रुवः - अभ्यसूये। माता सुरुचिर्दूरस्थितेऽपि मयीदृशं प्रेमातिशयं निबध्नाति एतावतैवात्मानं कृतार्थं मन्ये। रथोयं वस्त्राणीमानि भूषणानि चेमानि वत्सायोत्तमाय संप्रेष्यन्ताम्। निःस्पृहोयं जनस्तादृशेषु पदार्थेषु।

* अभ्यसूया - कुमार! उत्तमादत्यधिकः प्रियस्त्वं देव्याः सुरुच्याः। तत एव कुमाराय प्रेषितं सर्वम्।

* ध्रुवः - सोयं महानुपकारः परं नैतन्मे रोचते।

* अभ्यसूया - कुमार! देवी सुरुचिस्तत्रागताय तुभ्यं यौवराज्याभिषेकं कारयिष्यति। ततोऽवश्यमागन्तव्यमेव।

* ध्रुवः - न मे यौवराज्यमपि भगवत्प्रसादं विना रोचते।

* अभ्यसूया - वत्स! भगवानेव सुरुच्या हृदयमारुह्य त्वयि प्रसादं कुरुत इति मत्वा गृह्यतां सर्वम्।

* ध्रुवः - नैवं परोक्षं भगवतापि दत्तमादातुं मे वाञ्छा। यदा स एव भगवान् साक्षादागत्य यद्दास्यति तदैव तद्ग्रहीतुं मे वाञ्छा।

* अभ्यसूया - (स्वगतम्) दृढनिश्चयः खलु कुमारः। न क्वापि तदीयं चेतो लुब्धतां धत्ते। भवतु। यावद्बुद्धिबलं तपोभङ्ग एव कार्यः (प्रकाशम्) राजकुमार! परमप्रेमार्द्रहृदयया देव्या सुरुच्या यत्सन्दिष्टमतिगुह्यं तुभ्यं तच्छ्रूयताम्।

* ध्रुवः - मातुः सन्देशं श्रोतुमवहित एवास्मि।

* अभ्यसूया - समुद्ररसनाराज्यं प्राज्यं तुभ्यं नरेश्वरः।
अत्रागतायार्पयित्वा वानप्रस्थमपेक्षते ॥ ६०॥
किं च रूपयौवनपन्याभिः राजकन्याभिस्त्वरम्।
अत्रागतस्य ते पुत्र कारयिष्ये करग्रहम् ॥ ६१॥

इति चरमः सन्देशः।

* ध्रुवः - अभ्यसूये! शृणु ममापि चरमं सन्देशम्।

* अभ्यसूया - श्रूयते, उच्यताम्।

* ध्रुवः - साम्राज्यं स्वाराज्यं, प्राज्यं पातालराज्यं वा।
भगवत्करुणालोकालौकिकलाभं विना न मे तुष्ट्यै ॥६२॥
किं च - न विना भगवत्कृपावलोकं
ललनाः स्वर्ललनाश्च काङ्क्षते मे।
हृदयं भगवत्पदारविन्द-
कमलं वद तत्र किं करोमि ॥६३॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

माता मन्तव्या । महाराजस्य ते पितुः परमद्वेषिण्याः सुनीत्या नामापि न गृहीतव्यम् । मुखमपि न विलोकनीयम् । तपःक्लेशममुं परित्यज्ये- दानीमेव बहिर्हिमतीं प्रत्यागन्तव्यम् । नरेश्वर एव परमेश्वरः सर्वं कर्तुं शक्तो न मृत्तिकापरमेश्वरः ।

* **ध्रुवः** - तथा सति किं फलं मे भविष्यति ।

* **अभ्यसूया** - यौवराज्यमिदानीं ते साम्राज्यं च महीपतौ ।
स्वर्लोकवासितां याते निश्चलं ते भविष्यति ॥68॥

* **ध्रुवः** - ततोऽपि किम् ?

* **अभ्यसूया** - ततः

छत्रचामरविभूतिभूषितः
स्वर्णसन्मणिमयासनस्थितः ।
स्वर्वधूसमवधूसमन्वितः -
त्वं गमिष्यसि महीमहेन्द्रताम् ॥69॥.

* **ध्रुवः** - (स्वगतम्) अहो ! धिगस्याः पापायाः प्रलोभनपाटवम् (प्रकाशम्) अभ्यसूये ! श्रुतं श्रोतव्यम् । अवगतं चावगन्तव्यम् । सकलमही- मण्डलमहेन्द्रतां सहस्त्रं समाःसमास्वादयन्तु सुगृहीतनामानस्तातपादा मे । जन्मप्रदात्रीममरायुषाप्यप्रतिक्रियोपकारां मातरं परित्यज्य न मे साम्राज्यं रोचते, न मे छत्रचामरादिविभूतयो भूतये, नापि स्वर्वधूसमवधूसमागमोऽपि सुखाय । नमस्तस्मै सुवर्ण- मणिमयसिंहासनाय । परमपवित्रतीर्थरूपया मात्रा सह स्थितस्य मे शीर्णजीर्णपर्णकुटीवासोऽपि मणिमयमन्दिरवासो रुद्राक्षालंकारा अपि महार्हमणिमयालङ्कारा भस्माङ्गरागोऽपि हरिचन्दनाङ्गरागो भिक्षाशनमप्यमृताशनम् । विना च तया मात्रा राजाधिराजदशापि मे रङ्करङ्कदशा असंख्यशतसहस्त्रविचित्रालङ्कारा अपि चित्रालङ्कारा मणिमयभव्यभवनवासोऽपि वनवासो हरिचन्दनाङ्गरागलेपोऽपि पङ्क- पटललेपः सुधारसनिर्विशेषभोजनजातमपि दुर्जरविषविमिश्रभोजन- निर्विशेषमिति मन्येहम् । नातः परं मदग्रे कदाचिदीदृशं वक्तव्यम् । किं च भगवन्निन्दाकरीमिमां ते जिह्वां छेदार्हामपि मातुः ~~सुरुचे~~ सुरुचेर्गौरवान्न छिनद्मि । याहि दूरं न मे मुखमपि दर्शय ।

राजा - वत्स ! धन्योऽसि, खलु धन्योऽसि ।

सुनीतिः - (स्वगतम्) परमयानया मातृभक्त्या संप्राप्तसर्वाभिलाषो भूयाः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचिः – (स्वगतम्) निष्फलं सर्वमभ्यसूयादाक्षिण्यम् (प्रकाशम्) मूर्खा खल्वभ्यसूया या मातृभक्तिभरधुरन्धरस्य ध्रुवस्याग्रे मातृपरित्यागोपदेशं कर्तुं प्रवृत्ता ।

* अभ्यसूया – (स्वगतम्) हा! सर्वोऽपि ममाशयोऽनेन ज्ञातः । न च मदुपदेशवशतां प्राप्तः । तदिदानीं वध्य एवायम् (प्रकाशम्) मूर्ख ! मयापि देव्याः सुरुच्याः स्नेहगौरवादेव न हन्यसे तद्ब्रूहि सुनीतिं परित्यज्य साम्राज्यलक्ष्मीं लब्धुमिच्छसि न वा ?

* ध्रुवः – साम्राज्यपदसंप्राप्तिर्वराकि कैव नश्वरी ।
परेश्वरपदं रम्यं गम्यं नैव तया विना ॥ 70 ॥

* अभ्यसूया – मूढ ! मात्रा सहैव परमेश्वरपदं प्राप्स्यसीति ममापि प्रतिभाति (इत्युक्त्वा) भो भो भूतप्रेतपिशाचाः ! सत्वरमत्रागत्य भक्षयतामुं दुर्विनीतम् (इति प्रोच्चैरुद्घोष्य मन्त्रितां यष्टिं भूतले त्रिवारं प्रहरति)

(ततो भूमिं विदार्य निष्क्रान्ताः सर्वतो भूतप्रेतपिशाचाः ध्रुवमभिधावन्ति)

राजा – अहो प्रचण्डेयं दुष्टा भूतप्रेतपिशाचानां मन्त्रानपि जानाति ।

सुनीतिः – (सोद्वेगम्) हा! कथमिव वत्सो मे भयङ्करानेतानुद्वीक्ष्य धैर्यं धारयिष्यति ?

सुरुचिः – नाथ ! पापाशया सा किं किं कर्तुं न शक्ता । नातः परं तस्या मुखमप्यवलोकयिष्यामि ।

* ध्रुवः – (स्वगतम्) हा! मन्ये अमी भूता मां भक्षयिष्यन्ति । नास्ति कोऽपि रक्षणोपायः । हा ! दैव !
माता मन्मरणं निशम्य मरणं यातातिशोकार्दिता
तातः सदुःखस्तथैव तदिदं सर्वं कथंचित्सहे ।
हे वत्सोत्तम ! का तदा तव दशा भाव्येति चित्ते चिरं
हा! हा! चिन्तयतो मतिर्मम महामोहाम्बुधौ मज्जति ॥ 71 ॥
(इति वदन्नश्रूणि मुञ्चति । क्षणं विचार्य) कथमहं क्षत्रियो भूत्वैवं कातरतरतामनुभवामि ? भूताः किं मे करिष्यन्ति ? अस्ति मे रक्षको वासुदेवः (पुनः सधैर्यम्) अथवा नैतद्विषये भगवते वासुदेवाय श्रमो देयः (प्रकाशम्)
भूतप्रेतपिशाचा, यदि भक्तिर्मेऽस्ति तातपादानाम् ।
चरणेषु निर्व्यलीका तर्हि लयं यात भूतले त्वरया ॥ 72 ॥
(इत्युक्त्वा कमण्डलुजलं निक्षिपति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

।।० माता मन्तव्या । महाराजस्य ते पितुः परमद्वेषिण्याः सुनीत्या नामापि न ग्रहीतव्यम् । मुखमपि न विलोकनीयम् । तपःक्लेशममुं परित्यज्येदानीमेव बहिर्भवितौ प्रत्यागन्तव्यम् । नरेश्वर एव परमेश्वरः सर्वं कर्तुं शक्तो न मृत्तिकापरमेश्वरः ।

* ध्रुवः - तथा सति किं फलं मे भविष्यति ।

* अभ्यसूया - यौवराज्यमिदानीं ते साम्राज्यं च महीपतौ ।
स्वर्लोक वासितां याते निश्चलं ते भविष्यति ॥68॥

* ध्रुवः - ततोपि किम् ?

* अभ्यसूया - ततः
छत्रचामरविभूतिभूषितः
स्वर्णसन्मणिमयासनस्थितः ।
स्वर्वधूसमवधूसमन्वित -
स्त्वं गमिष्यसि महीमहेन्द्रताम् ॥69॥

* ध्रुवः - (स्वगतम्) अहो ! धिगस्याः पापायाः प्रलोभनपाटवम् (प्रकाशम्) अभ्यसूये ! श्रुतं श्रोतव्यम् । अवगतं चावगन्तव्यम् । सकलमहीमण्डलमहेन्द्रतां सहस्त्रं समाःसमास्वादयन्तु सुगृहीतनामानस्तातपादा मे । जन्मप्रदात्रीममरायुषाप्य प्रतिक्रियोपकारां मातरं परित्यज्य न मे साम्राज्यं रोचते, न मे छत्रचामरादिविभूतयो भूतये, नापि स्वर्वधूसमवधूसमागमोपि सुखाय । नमस्तस्मै सुवर्णमणिमय सिंहासनाय । परमपवित्रतीर्थरूपया मात्रा सह स्थितस्य मे शीर्णजीर्णपर्णकुटीवासोपि मणिमयमन्दिरवासो रुद्राक्षालंकारा अपि महार्हमणिमयालङ्कारा भस्माङ्गरागोपि हरिचन्दनाङ्गरागो भिक्षाशनमप्यमृताशनम् । विना च तया मात्रा राजाधिराजदशापि मे रङ्करङ्कदशा असंख्यशतसहस्त्रविचित्रलालङ्कारा अपि पित्तलालङ्कारा मणिमयभव्यभवनवासोपि वनवासो हरिचन्दनाङ्गरागलेपोपि पङ्कपटललेपः सुधारसनिर्विशेषभोजनजातमपि दुर्जरविषविमिश्रभोजननिर्विशेषमिति मन्येहम् । नातः परं मदग्रे कदाचिदीदृशं वक्तव्यम् । किं च भगवन्निन्दाकरीमिमां ते जिह्वां छेदार्हामपि मातुः ~~सुरुचेः~~ सुरुचेर्गौरवान्न छिनद्मि । याहि दूरं न मे मुखमपि दर्शय ।

राजा - वत्स ! धन्योसि, खलु धन्योसि ।

सुनीतिः - (स्वगतम्) परमयानया मातृभक्त्या संप्राप्तसर्वाभिलाषो भूयाः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचिः — (स्वगतम्) निष्फलं सर्वमभ्यसूयादाक्षिण्यम् (प्रकाशम्) मूर्खा खल्वभ्यसूया या मातृभक्तिभरधुरन्धरस्य ध्रुवस्याग्रे मातृपरित्यागोपदेशं कर्तुं प्रवृत्ता ।

* अभ्यसूया — (स्वगतम्) हा ! सर्वोऽपि ममाशयोऽनेन ज्ञातः । न च मदुपदेशवशतां प्राप्तः । तदिदानीं वध्य एवायम् (प्रकाशम्) मूर्ख ! मयापि देव्याः सुरुच्याः स्नेहगौरवादेव न हन्यसे तद्ब्रूहि सुनीतिं परित्यज्य साम्राज्यलक्ष्मीं लब्धुमिच्छसि न वा ?

* ध्रुवः — साम्राज्यपदसंप्राप्तिर्वराकि कैव नश्वरी ।
परेश्वरपदं रम्यं गम्यं नैव तया विना ॥७०॥

* अभ्यसूया — मूढ ! मात्रा सहैव परमेश्वरपदं प्राप्स्यसीति ममापि प्रतिभाति (इत्युक्त्वा) भो भो भूतप्रेतपिशाचाः ! सत्वरमत्रागत्य भक्षयताममुं दुर्विनीतम् (इति प्रोच्चैरुद्घोष्य मन्त्रितां यष्टिं भूतले त्रिवारं प्रहरति)

(ततो भूमिं विदार्य निष्क्रान्ताः सर्वतो भूतप्रेतपिशाचाः ध्रुवमभिधावन्ति)

राजा — अहो प्रचण्डेयं दुष्टा भूतप्रेतपिशाचानां मन्त्रानपि जानाति ।

सुनीतिः — (सोद्वेगम्) हा ! कथमिव वत्सो मे भयङ्करानेतानुद्वीक्ष्य धैर्यं धारयिष्यति ?

सुरुचिः — नाथ ! पापाशया सा किं किं कर्तुं न शक्ता । नातः परं तस्या मुखमप्यवलोकयिष्यामि ।

* ध्रुवः — (स्वगतम्) हा ! मन्ये अमी भूता मां भक्षयिष्यन्ति । नास्ति कोऽपि रक्षणोपायः । हा ! दैव ।

माता मन्मरणं निशम्य मरणं यातातिशोकार्दिता ।
तातः सदुःखस्तथैव तदिदं सर्वं कथंचित्सहे ।
हे वत्सोत्तम ! का तदा तव दशा भाव्येति चित्ते चिरं
हा ! हा ! चिन्तयतो मतिर्मम महामोहाम्बुधौ मज्जति ॥७१॥

(इति वदन्नश्रूणि मुञ्चति । क्षणं विचार्य) कथमहं क्षत्रियो भूत्वैवं कातरतामनुभवामि ? भूताः किं मे करिष्यन्ति ? अस्ति मे रक्षको वासुदेवः (पुनः सधैर्यम्) अथवा नैतद्विषये भगवते वासुदेवाय श्रमो देयः (प्रकाशम्)

भूतप्रेतपिशाचा, यदि भक्तिर्मेऽस्ति तातपादानाम् ।
चरणेषु निष्पलीका तर्हि लयं यात भूतले त्वरया ॥७२॥

(इत्युक्त्वा कमण्डलुजलं निक्षिपति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

* भूतप्रेतपिशाचाः — हा! हताः स्मः (इत्युक्त्वा भूतले प्रविशन्ति)

* अभ्यसूया — (स्वगतम्) अहो! प्रभावो बालस्य! (प्रकाशम्) अयि डाकिन्यः शाकिन्यः शीघ्रमेनं त्रिशूलैर्विदारयत। (इत्युक्त्वा यष्टिं प्रहरति)

(ततः प्रविशन्ति छिन्धि छिन्धि भिन्धि भिन्धीति वादिन्यो डाकिन्यः शाकिन्यश्च)

* डाकिन्यः / शाकिन्यः — उत्तिष्ठोत्तिष्ठ बाल! बालबुद्धे कुर्वभ्यसूयावचनम्। न चेदेभिस्त्रिशूलैस्त्वां छेत्स्यामो भेत्स्यामश्च।

(ध्रुवमभिधावन्ति)

* ध्रुवः — (निराकुल एव विलोक्याञ्जलौ जलं गृहीत्वा च)

डाकिन्यः शाकिन्यो यदि मे मातुः सुनीतिसंज्ञायाः।
निजभर्तरीशभक्तिस्तर्हि लयं यात भूतले त्वरया॥ 73॥

(अञ्जलिं निक्षिपति)

* डाकिन्यः / शाकिन्यः — हा! हताः स्म दह्यन्तेऽस्माकं सर्वाण्यङ्गानि।

(भूतले प्रविशन्ति)

* अभ्यसूया — (स्वगतम्) पलायिता डाकिन्यः शाकिन्यश्च। भवतु। यक्षिण्यस्त्ववश्यममुं भक्षयिष्यन्ति। (प्रकाशम्) अयि निजभक्तजनविपक्षपक्ष-भक्षिण्यो यक्षिण्यो भक्ष्यतामुमस्मद्विपक्षपक्ष-पक्षपातिनमर्भकम्।

(यष्टिं भूमौ प्रहरति)

(ततः प्रविशन्ति कपालहस्ताः सहस्रशो यक्षिण्यः)

* यक्षिण्यः — (कतिचिद् बालकाङ्गानि भक्षयन्त्यः) रे रे दुष्ट! मुञ्च तपश्चर्यामाश्रय चाभ्यसूयोपदेशम्। नो चेदिमानि बालकाङ्गानीव तवाङ्गकानि भक्षयिष्यामः।

* ध्रुवः — (सधैर्यमवलोक्य)

उत्तमो यदि मे वत्सः प्राणादप्यधिकः प्रियः।
यक्षिण्यस्तर्हि सहसा लयं यात रसातले॥ ७४॥

(अञ्जलिं प्रक्षिपति)

* यक्षिण्यः — हा! हताः स्म (इति वदन्त्यो लयं यान्ति)

राजा — गता यक्षिण्यो लयं तेन परितुष्टं स्वान्तं मे। भगवन् कपिञ्जल! बहूपकृतमस्मासु भगवता। ध्रुववृत्तान्तं दर्शयता ध्रुवस्यान्तःकरणवृत्तान्तमपि दर्शितम्।

कपिञ्जलः — राजन् एतद्विषये मे गुरुचरणानामेवोपकारो

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मन्तव्यः।

* अप्रमसूया — (स्वगतम्) हा! निष्फलाः सर्वे मन्त्राः। भवतु। अन्यत्करिष्यामि। (इत्युक्त्वा रचानमयूरपिच्छ-मूलिकामानीय परितो भ्रमयित्वा किमपि पठति)।

राजा — अहो! पापेयम् इन्द्रजालविद्यायामपि प्रवीणा-स्तीति प्रतिभाति।

(नेपथ्ये)

वत्स ध्रुव! क्वासि? देहि मे दर्शनम्।

* ध्रुवः (साश्चर्यम्) चिरान्मातुः श्रीसुनीत्याः स्वरः श्रूयते। मन्ये मातुलगृहादप्यवमानिता खेदा-न्मां मृगयन्त्यत्रागतेति। श्रृणोमि तावत् किं वदति।

(पुनर्नेपथ्ये)

वत्स वत्स ध्रुव क्वासि? देहि मे दर्शनम्।

* ध्रुवः — एषोऽस्मि मातरेषोऽस्मि पर्णकुट्यां कदम्बतरुमूले

(ततः प्रविशति एकाकिनी मायासुनीतिः)

* मायासुनीतिः — (सगद्गदकण्ठम्) वत्स! चिरा-द्दृष्टोऽसि। वत्स! त्वदीयवदनचन्द्रविलो-कनविरहेऽन्धास्मि। सुरुचिवचनविषज्वाला-माला तवेव ममापि हृदयमद्यापि पीडयति।

* ध्रुवः — मातरलमिदानीं विषादेन। स्वस्था भव। (इत्युक्त्वा कमण्डलुं गृहीत्वा पादप्रक्षालनाय गच्छति)

* मायासुनीतिः — (स्वगतम्) तदीयकरतलगतजल-स्पर्शसमय एव मे विनाशः। तस्माद्युक्त्या निवारयाम्येनम्। (प्रकाशम्) वत्स! अल-मलमायासेन।

* ध्रुवः — मातः! कोऽयमायासः। कुलाचारः खल्वयम्।

* मायासुनीतिः — कुलाचारोऽपीदानीं नोचितः।

स्नातेन ... मे ... नोचितम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

* भूतप्रेतपिशाचाः — हा! हताः स्मः (इत्युक्त्वा भूतले प्रविशन्ति)

* अभ्यसूया — (स्वगतम्) अहो! प्रभावो बालस्य! (प्रकाशम्) अयि डाकिन्यः शाकिन्यः शीघ्रमेनं त्रिशूलैर्विदारयत। (इत्युक्त्वा यष्टिं प्रहरति)

(ततः प्रविशन्ति चिंधन्धि छिन्धि भिन्धि भिन्धीति नादिन्यो डाकिन्यः शाकिन्यश्च)

* डाकिन्यः
शाकिन्यः — उत्तिष्ठोत्तिष्ठ बाल! बालबुद्धे कुर्वभ्यसूयावचनम्। न चेदेभिस्त्रिशूलैस्त्वां छेत्स्यामो भेत्स्यामश्च।

(ध्रुवमभिधावन्ति)

* ध्रुवः — (निराकुल एव विलोक्याञ्जलौ जलं गृहीत्वा च)

डाकिन्यः शाकिन्यो यदि मे मातुः सुनीतिसंतायाः।
निजभर्तरीशभक्तिस्तर्हि लयं यात भूतले त्वरया॥ 73॥

(अञ्जलिं निक्षिपति)

* डाकिन्यः
शाकिन्यः — हा! हताः स्म दह्यन्तेऽस्माकं सर्वाण्यङ्गानि।

(भूतले प्रविशन्ति)

* अभ्यसूया — (स्वगतम्) पलायिता डाकिन्यः शाकिन्यश्च भवतु। याक्षिण्यस्त्वरश्यमेनं भक्षयिष्यन्ति (प्रकाशम्) अयि निजभक्तजनविपक्षपक्ष — भक्षिण्यो याक्षिण्यो भक्षतामुमस्मद्विपक्षपक्ष-पक्षपातिनमर्भकम्।

(यष्टिं भूमौ प्रहरति)

(ततः प्रविशन्ति कपालहस्ताः सहस्रशो याक्षिण्यः)

* याक्षिण्यः — (कानिचिद्बालकाङ्गानि भक्षयन्त्यः) रे रे दुष्ट! मुञ्च तपश्चर्यामिमाम् अभ्यसूयोपदेशात् न चेदि-मानि बालकाङ्गानीव तवाङ्गकानि भक्षयिष्यामः।

* ध्रुवः — (सधैर्यमवलोक्य)

उत्तमो ~~मे~~ यदि मे वत्सः प्राणादप्यधिकः प्रियः।
याक्षिण्यस्तर्हि सहसा लयं यात रसातले॥ 74॥

(अञ्जलिं प्रक्षिपति)

* याक्षिण्यः — हा! हताः स्म (इति वदन्त्यो लयं यान्ति)

राजा — गता याक्षिण्यो लयं तेन परितुष्टं स्वान्तं मे। भगवन् कपिञ्जल! बहूपकृतमस्मासु भगवता। ध्रुववृत्तान्तं दर्शयता ध्रुवस्यान्तःकरणवृत्तान्तमपि दर्शितम्।

कपिञ्जलः — राजन् एतद्विषये मे गुरुचरणानामेवोपकारो

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मन्तव्यः।

* अभ्यसूया — (स्वगतम्) हा! निष्फलाः सर्वे मन्त्राः। भवतु। अन्यत्करिष्यामि। (इत्युक्त्वा रक्तानमयूरपिच्छमूलिकामानीय परितो भ्रमयित्वा किमपि पठति)।

राजा — अहो! पापेयम् इन्द्रजालविद्यायामपि प्रवीणास्तीति प्रतिभाति।

(नेपथ्ये)

वत्स ध्रुव! क्वासि? देहि मे दर्शनम्।

*ध्रुवः (साश्चर्यम्) चिरान्मातुः श्रीसुनीत्याः स्वरः श्रूयते। मन्ये मातुलगृहादप्यवमानिता खेदान्मां मृगयन्त्यत्रागतेति। शृणोमि तावत् किं वदति।

(पुनर्नेपथ्ये)

वत्स वत्स ध्रुव क्वासि? देहि मे दर्शनम्।

*ध्रुवः — एषोऽस्मि मातरेषोऽस्मि पर्णकुटयां कदम्बतरुमूले

(ततः प्रविशति एकाकिनी मायासुनीतिः)

* मायासुनीतिः — (सगद्गदकण्ठम्) वत्स! चिराद्दृष्टोऽसि। वत्स! त्वदीयवदनचन्द्रविलोकनविरहेणान्धास्मि। सुरुचिवचनविषज्वालामाला तवेव ममापि हृदयमद्यापि पीडयति।

*ध्रुवः — मातरलमिदानीं विषादेन। स्वस्था भव।

(इत्युक्त्वा कमण्डलुं गृहीत्वा पादप्रक्षालनाय गच्छति)

* मायासुनीतिः — (स्वगतम्) तदीयकरतलगतजलस्पर्शसमय एव मे विनाशः। तस्मादुपायान्निवारयाम्येनम्। (प्रकाशम्) वत्स! अलमलमायासेन।

* ध्रुवः — मातः! कोऽयमायासः। कुलाचारः खल्वयम्।

* मायासुनीतिः — कुलाचारोऽपीदानीं नोचितः। अस्नातायाः मे, ~~त्वया~~ स्नातेन त्वया पादप्रक्षालनं नोचितम्

(विश्राम्य) स्नातायां मयि सर्वं विधेयम् ।

* ध्रुवः — यथा मातुराज्ञा ।

(कमण्डलुमधः स्थापयित्वा कृताञ्जलिरग्रतस्तिष्ठति)

* माता सुनीतिः —

ध्रुव! भवद्वदनेन्दु विलोकन-

प्रबललोभवती कति नापगाः ।

कति नगानगराणि च वा कति

प्रतिदिनं क्रमशः पथमगमम् ॥७५॥

प्रतिदिनं भ्रमणश्रमखेदतः

सुचरणावरुणाविह पश्य मे ।

इह भवत्कृत एव समागता

कुरु दयां मयि मातरि पुत्रक ॥७६॥

त्वयि पुत्र भवद्वियोगिनी

विपदस्तवन्नभवं नु का न काः ।

धृतिरास्तिनमो विना त्वया

स्वगृहे स्थातुमिहागता ततः ॥ ७७॥

* ध्रुवः — मातर्मा ति धैर्यं धार्यं न विषादो

विधेयः ।

सन्तुष्टे श्रीरमाप्राणप्रिये प्रणतवत्सले ।

श्रीवासुदेवे त्वरया यास्यावः स्वनिकेतनम् ॥ ७८॥

* माता सुनीतिः — वत्स नातःपरं तपः कार्यम् ।

कमलामलकोशकोमलं

क्व वपुस्ते क्व च दुष्करं तपः ।

तदलं तपसा उपसारय

प्रबलं ते हृदयाद्दुराग्रहम् ॥ ७९॥

* ध्रुवः — मातर्नायं दुराग्रहः किन्तु सदाग्रहः ।

यदत्र भवत्या समुपदिष्टं तदेव करोमि ।

* माता सुनीतिः — पुत्र! तदा मयैवोपदिष्टम् । इदानीमहमेव

तपसो निवृत्तिमाज्ञापयामि ।

* ध्रुवः — नैतन्मयक्तुं शक्यते ।

* माता सुनीतिः — त्वं यदि तपो न त्यक्ष्यसि तर्ह्यहं

प्राणांस्त्यक्ष्यामि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

*ध्रुवः — किमेतदुच्यते —

साम्राज्यं स्वाराज्यं श्रियः समस्ताः सुखानि सकलानि।
निर्मलतपःसुरद्रुमफलानि जानीहि वत्स त्वम् ॥ ८०॥
इति पूर्वमुपदिष्टवती तत्रभवती भवती तदनन्तरं
मया तपः करिष्यामीति प्रतिज्ञातम्। इदानीं पुन-
स्तपो न कार्यमित्युक्तिर्युक्ता किं ते ?

* मायासुनीतिः — वत्स! शृणु तत्र कारणम् —
बालोमादि विहाय मातरमहो घोरे घनेऽस्मिन् वने
तप्तं दुष्करदुष्करे तप इदं मापेक्ष्य दैहादिकम्।
हे वत्स प्रणता त्वयापि न दया लेशोऽपि यस्याभवत्
किं तस्योपरि निर्दयस्य तपसा तस्मात्परूत्सज्यताम् ॥
८१॥
इति मे चरमं वचः। (अश्रूणि मुञ्चति)

*ध्रुवः — (स्वगतम्) नेयं माता मे सुनीतिः। न कदाचिदपि सा
परमदयालुशिरोमणौ परमेश्वरे निर्दयतामारो-
पयेत्। अथवा दुःसहदुःखदुर्दशावशात्
तथा ब्रवीतीति न तस्या अपराधः (प्रकाशम्)
मातः क्षन्तव्यं मे बालचापलम्। दुःसहदुःख-
परतन्त्रायास्तवेमामुक्तिं नाहं श्रवणगोचरी करि-
ष्यामि। प्रथममेव यदुक्तं त्वया तन्मे प्रमाणम्।
शृणु ममापि चरमं वचः —
अमी मातः सिंहा वनकरिण एते च समदा
वराहाद्या श्चान्ये वनवसतयोऽनन्तसुखवान्।
तपःक्लेशादेतत् पततु च वपुर्वा नहि विना
प्रसादं श्रीविष्णोस्तव तु तनयस्त्यक्ष्यति तपः॥ ८२॥
तदतः परं न किमपि मात्रा वक्तव्यमिति मे
सप्रणामा प्रार्थना।
(इत्युक्त्वा पर्णकुट्यां स्थित्वा भगवद्ध्यानमभि-
नयति)

* मायासुनीतिः — हा! वत्स, कथमेकपद एव निर्दय-
तामङ्गीकुरुषे ? क्व सा ते मातृभक्तिः ?
क्व सा ते मातृवत्सलता ? क्व सा ते
[illegible] परतन्त्रता ? हा! दीनां नानाविध-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(विश्रम्य) स्नातायां मयि सर्वं विधेयम्।

* ध्रुवः — यथा मातुराज्ञा।

(कमण्डलुमधः स्थापयित्वा कृताञ्जलिरग्रतस्तिष्ठति)

* मायासुनीतिः —

ध्रुव! भवद्वदनेन्दु विलोकन-
प्रबललोभवती कति नापगाः।
कति नगान्नगराणि च वा कति
प्रतिदिनं भ्रमदाप्रहमप्यहम्॥७५॥

प्रतिदिनं भ्रमणश्रमखेदतः
सुचरणावरुणाविह पश्य मे।
इह भवत्कृत एव समागता
कुरु दयां मयि मातरि पुत्रक॥७६॥

तदपि पुत्र भवद्वियोगिनी
विपदस्तवनवमवं नु का न काः।
धृतिरास्तिनमो विना त्वया
स्वगृहे स्थातुमिहागता ततः॥७७॥

* ध्रुवः — मातर्मातिधैर्यं धार्यं न विषादो
विधेयः।

सन्तुष्टे श्रीरमाप्राणप्रिये प्रणतवत्सले।
श्रीवासुदेवे त्वरया यास्याव स्वनिकेतनम्॥७८॥

* मायासुनीतिः — वत्स नातः परं तपः कार्यम्।

कमलामलकोशकोमलं
क्व वपुस्ते क्व च दुष्करं तपः।
तदलं तपसा उपसंहर
प्रबलं ते हृदयाद्दुराग्रहम्॥७९॥

* ध्रुवः — मातर्नायं दुराग्रहः किन्तु सदाग्रहः।
यदत्र भवत्या समुपदिष्टं तदेव करोमि।

* मायासुनीतिः — पुत्र! तदा मयैवोपदिष्टम्। इदानीमहमेव
तपसो निवृत्तिमाशासयामि।

* ध्रुवः — नैतत्कर्तुं शक्यते।

* मायासुनीतिः — त्वं यदि तपो न त्यक्ष्यसि तर्ह्यहं
प्राणांस्त्यक्ष्यामि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

* ध्रुवः — किमेतदुच्यते —

साम्राज्यं स्वाराज्यं श्रियः समस्ताः सुखानि सकलानि।
निर्मलतपःसुरद्रुमफलानि जानीहि वत्स त्वम्॥ ८०॥

इति पूर्वमुपदिष्टवती त्वमवती भवती तदनन्तरं मया तपः करिष्यामीति प्रतिज्ञातम्। इदानीं पुनस्तपो न कार्यमित्युक्तिर्युक्ता किं ते?

* मातासुनीतिः — वत्स! शृणु तत्र कारणम् —
बालोमादृ विहाय मातरमहो घोरे घने ऽस्मिन् वने
तात दुष्करदुष्करे तप इदं मापेक्ष्य देहादिकम्।
हे वत्स प्रणयात्त्वयापि न दया लेशोऽपि यस्यामवत
किं तस्योपरि निर्दयस्य तपसा तस्मात्तपस्त्यज्यताम्॥
इति मे चरमं वचः। (अश्रूणि मुञ्चति) ८१॥

* ध्रुवः — (स्वगतम्) नेयं माता मे सुनीतिः। न कदाचिदपि सा परमदयालुशिरोमणौ परमेश्वरे निर्दयतामारोपयेत्। अथवा दुःसहदुःखदुर्दशावशाशयतया ब्रवीतीति न तस्या अपराधः (प्रकाशम्)
मातः क्षन्तव्यं मे बालचापलम्। दुःसहदुःखपरतन्त्राया स्तवेमामुक्तिं नाहं श्रवणगोचरीकरिष्यामि। प्रथममेव यदुक्तं त्वया तन्मे प्रमाणम्।
शृणु ममापि चरमं वचः —
अमी मातः सिंहा वनकरिण एते च समदा
वराहाद्याश्चान्ये वनवसतयोऽशन्त्यचरवान्।
तपःक्लेशादेतत् पततु च वपुर्वा नहि विना
प्रसादं श्रीविष्णोस्तव तु तनयस्त्यक्ष्यति तपः॥ ८२॥
तदतः परं न किमपि मात्रा वक्तव्यमिति मे सप्रणामा प्रार्थना।
(इत्युक्त्वा पर्णकुट्यां स्थित्वा भगवद्ध्यानमभिनयति)

* मातासुनीतिः — हा! वत्स, कथमेकपद एव निर्दयतामङ्गीकुरुषे? क्व सा ते मातृभक्तिः? क्व सा ते मातृवत्सलता? क्व सा ते
[illegible] हा! दीनां नानाविध-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ विपद्विलीनां सुखलवलेशविहीनामपि मां विलोक्ये-
दानीं ते हृदये दयोदयो ऽपि न प्रभवति? यद्येवं
मां न प्रगणय्य तप एव तपस्यसि त्वं तर्हि
त्वदेकजीविताऽवलम्बाया मन्दभाग्यायाः पत्या महा-
राजेन परित्यक्ताया मे का गतिः? किं शरणं कृत्वा-
परो मे दुःखदुःखी भविष्यतीति। चिन्तय। चिन्तय।
(इति वदन्ती बाष्पाकुलाकुलाक्षी मूर्च्छितेव पतति)

* अभ्यसूया — न भूतप्रेतपिशाचैर्न डाकिनीशाकिनी-
भिर्न यक्षिणीभिरपि किञ्चित्कृतम्। मायासुनी-
तिस्त्ववश्यं तपोभ्रष्टं करिष्यति कुमारमित्या-
सीन्मे मनसि प्रत्याशा, परं साऽपि निष्फला
जाता। हृदयभेदीन्यप्यस्या इमानि करुण-
करुणानि विलपितान्यकिञ्चित्कराण्येव
ध्रुवे जातानि। किमतः परं कर्तव्यम्?
(क्षणं विचार्य) अयं खलु समाधिनिष्ठः
शुष्ककाष्ठनिश्चलस्तिष्ठति। तदस्य शिरश्छेद
एव मया विधेयः।
(निष्कोषमसिं गृहीत्वा शिरश्छेत्तुमभिधावति)

राजा — पापे पापे अलमलमनेन पापेन व्यवसायेन। सज्ज एव
मे खड्गः प्रथमं तवैव शिरश्छेत्तुम्। (इति वदन्नुत्तिष्ठति)

विवेकनिधिः — महाराज। इन्द्रजालमेतत्।

राजा — हा विस्मृतमेतत्। कदा तत्सुदिनं भविष्यति यस्मिन्नभ्य-
सूयामुन्मूलयिष्यामि।

सुनीतिः — हा। भगवन्नाथनाथ दयासिन्धो। त्वमेवेदानीं ध्रुवस्य
सर्वस्वं शरणम्। त्वयैवायं रक्षणीयः (मूर्च्छया पतति)

सुशीला — देवि। समाश्वसिहि, समाश्वसिहि।
(शीतोपचारैः संसज्ञां कुरुते)

सुनीतिः — हला सुशीले सुस्थास्मि। विरम शीतोपचारेभ्यः।

* अभ्यसूया — दुष्ट, नेदानीं जीविष्यसि। (ध्रुवमभिधावति)

(आकाशे)
अलमलं तपसा वरदोऽस्मि ते
वरय तद्वरमात्ममनोगतम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

परमया परितुष्ट भवेहि मां
ध्रुवतया ध्रुव ते परदैवतम् ॥ ८३॥
(~~इति पुनः पठति~~)

(सर्वे प्युत्थाय प्रणमन्ति)

श्रीवासुदेवो ध्रुवं समाधिनिष्ठं विलोक्य तदीयहृदयात्स्व-
रूपमपकर्षति)

* ध्रुवः – (अकस्मात्सखेदम्)

कमपराधलवं तु निरीक्ष्य मे
हृदयतो भगवन्प्रपलायसे।
यदि न दर्शयितासि निजं वपुः
स्वजनमेव भवेहि तदा मृतम् ॥

* अभयसूया – (सभयाशङ्कम्) हा! किमेतत्! निर्जनेऽपि
वने कस्यायं शब्दः श्रूयते? (कर्णं दत्त्वा) आः ज्ञातम्
ध्रुवतपसा परितुष्टस्य तदिष्टदेवस्यैवैतद्वरप्रदानवाक्यम्
इदानीं पलायनमेव शरणं मे।
(रथमारुह्य पलायते)

राजा – पापायाः पलायनेन संतुष्टं मे स्वान्तम्।
(ततः आकाशादवतीर्य)

* श्रीवासुदेवः – अलमलं तपसा वरदोऽस्मि ते
वरय तद्वरमात्ममनोगतम्।
परमया परितुष्ट भवेहि मां
ध्रुवतया ध्रुव ते परदैवतम् ॥
(इति पुनः पठति)

(सर्वे प्युत्थाय प्रणमन्ति)

(श्रीवासुदेवो ध्रुवं समाधिनिष्ठं विलोक्य तदीयहृदयात्स्वरूप-
मपकर्षति)

* ध्रुवः – (अकस्मात्सखेदम्)

कमपराधलवं तु निरीक्ष्य मे
हृदयतो भगवन्प्रपलायसे।
यदि न दर्शयितासि निजं वपुः
स्वजनमेव भवेहि तदा मृतम् ॥ ८४॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(इति वदन् नयनजलमालाकुललोचनः किंचिल्लोचने समुन्मील्य पुरतः एव भगवन्तं श्रीवासुदेवमुद्वीक्ष्य सानन्दाश्चर्यमुत्थाय कृताञ्जलिः

धन्योऽहं धन्योऽहं धन्या जननी पिता च मे धन्यः।
धन्याश्च पूर्वजा मे साक्षात्पश्यामि यन्निजेष्टं त्वाम् ॥ ८८॥

(दण्डवत् निपतति)

* श्रीवासुदेवः – (ध्रुवमुत्थाप्यालिङ्ग्य च) वत्स, वत्स! ब्रूहि किं ते प्रियं करोमि?

* ध्रुवः – जगद्गुरो भगवन्! सर्वान्तर्यामिणस्ते विदितमेवास्ति तथापि विज्ञापयामि। प्रथमं तु दयामयाशयायै मम मात्रे सुनीत्यै दयया दर्शनं देयम्।

* श्रीवासुदेवः – क्वास्ति ते माता? समाहूयतां, दास्यामि तस्यै दर्शनम्।

* ध्रुवः – दयामयाशये मातर्मातः क्वासि? क्वासि? एहि कृतार्थय भगवतः श्रीरमारमणस्य दर्शनेनात्मनो लोचने।
(इति वदन् सर्वतः परिक्रम्य) भगवन्! क्वापि गता मद्दुःखदुःखिता गतेति मन्येऽहम्। हा! तस्या अदर्शनाद्वेपते मे हृदयम्।

(अश्रूणि मुञ्चति)

* श्रीवासुदेवः — वत्स मातृवत्सल! मा चिन्तां कुरु। या त्वयाऽदृष्टा न सा ते माता। किंतु सुरुचिप्रेरिता मयसूया कल्पित मायामयी सुनीतिः। सा नात्र मत्समीपे स्थातुं शक्ता तव प्रीत्या त्वन्मातुश्चावश्यं दर्शनं दास्यामि। अन्यदपि वरं वृणीष्व।

* ध्रुवः – प्रणतपाल भगवन् महाविष्णो! त्वत्पदादन्यन्नाहं वृणे

* श्रीवासुदेवः – वत्स! षट्त्रिंशद्वर्षसाहस्रं पितृपैतामहं राज्यमनुशास्य मृत्योरपि मूर्ध्नि पदं दत्त्वा त्वत्पूर्वैरप्यनारूढपूर्वं मत्पदं प्राप्स्यसि।

* ध्रुवः – दीनबन्धो दयासिन्धो! न खलु मे मात्रा विना विष्णुपदमपि प्रीतये भविष्यति।

* श्रीवासुदेवः – वत्स मातृभक्तधुरीण! मातापि ते त्वया सहैव तत्रागमिष्यति।

सुनीतिः – (स्वगतम्) मत्पुत्रोऽपि भूत्वा वत्सः कथं स्वार्थं मात्रे याचते?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

* ध्रुवः — (स्वगतम्) मातृस्नेहविवशतया विस्मृतं मया वरयाचनायाम् (इत्यधोमुखस्तिष्ठति)

* श्रीवासुदेवः — वत्स! किं विचारयसि? अस्ति किमप्याशास्यशेषं चेन्निःशङ्कमुच्यताम्।

* ध्रुवः — भगवन्!

सुनीत्या च सुरुच्या च मात्रा तातेन चैव तैः सह।
सह वत्सेनोत्तमेन प्राप्तुं तत्पदमुत्सहे ॥८६॥

(इत्युक्त्वा प्रणमति)

सुनीतिः — (स्वगतम्) कृतमिदानीं सौनीतेयानुरूपम्।

राजा — धन्योऽसि वत्स! धन्योऽसि योऽपकारिष्वप्यु-करोषि।

सुरुचिः — (स्वगतम्) कापीदृगवर्ण्यैव ध्रुवस्य महाशयता

* श्रीवासुदेवः — वत्स! यद्यप्यनन्यप्राप्यमेतत्पदं तथापि त्वद्भक्तिभराविवशस्य मे न किञ्चिदप्यदेयं तुभ्यम्। ततो वच्मि

सुनीत्या च सुरुच्या च मात्रा तातेन च तैः सह।
वत्स वत्सेनोत्तमेन प्राप्स्यसि त्वं तु तत्पदम् ॥८७॥

* ध्रुवः — महाननुग्रहः।

(गलदविरलहर्षाश्रुजलजालो दण्डवत् प्रणमति)

* श्रीवासुदेवः — वत्स! गच्छेदानीं पितुस्ते राजधानीम्। मदाज्ञया गरुड एव त्वां तत्र प्रापयिष्यति।

(इत्युक्त्वान्तर्हितः)

* ध्रुवः — अहो! श्रीवासुदेवस्तु त्वरिततरमेवान्तर्हितः। इतोऽधुना मया तदाज्ञानुसारेण श्रीबर्हिष्मती नगरी गन्तव्या। परं हा! चिरपरिचितानामेषां वियोगो दुनोति मे हृदयम्। (सबाष्पम्) मातः श्रीयमुने, भ्रातर्मधुबन, परमार्यास्तपोवनवासास्तपस्विनश्च ध्रुवस्यायं प्रयाणप्रणामः (सर्वान् प्रणमति) नायं जनः कदाचिद्युष्मदुपकारान् विस्मरिष्यति। कदा च वः पुनर्मे पुण्यैः पुण्यं दर्शनं भविष्यति?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीमधुरे श्रीयमुने श्रीमधुवनपादपाः सर्वे ।
श्रीमन्तश्च तपस्विन एभ्यः प्रणतिर्ध्रुवस्य वरचरमा ॥ ८८ ॥
(निष्क्रान्तः)

राजा – हा ! अन्तर्हितो नयनयोः सुखदो वत्सः ।
सुनीतिः – नाथ न केवलं वत्स एवान्तर्हितः किं त्वगण्य-
पुण्यगण दर्शनीया श्रीमत्पुण्यतपनतनयातीरभूषिता
श्री मथुरा सीमापि ।
राजा – अथ किं दृश्यते ? बर्हिष्मतीसीमेयम् !
(ततः पुनः प्रविशति ध्रुवः)
* ध्रुवः – (सर्वतो विलोक्य) सेयं बर्हिष्मती सीमेयम् !
दूरतो दृश्यते । सेयं पवित्रा सरित् । ते ते
चामी तरवो यानामन्त्र्याहं प्रस्थितः । प्रणमामि
सर्वान् येषां प्रसादान्मया शीघ्रं तपःसिद्धिः संपादिता
(सर्वान् प्रणम्य पुनः सर्वतो विलोक्य) तदेवेदं
पुण्यं सरो यत्र जगद्गुरुणा भगवता नारदेन समागमो-
ऽभूत् । अहो भगवतः कृपालुता ! यत्कृपयैव मे भगवत्प्र-
प्राप्तिः । कथमिव तस्य सद्गुरुप्रवरस्य यावज्जीवमुपकारमहं
विस्मरिष्यामि (क्षणं विचार्य)
परेशो यो जन्मायुतशततपोदुर्लभतमः
स मे षड्भिर्मासैः सपदि परितुष्टो वरमदात् ।
प्रभावोऽयं यस्या जयति मम मातुर्हि सुरुचेः
शिवं तस्याः कुर्यात्परशिव इतीच्छामि नितराम् ॥ ८९
(पुनः क्षणं विचार्य) उक्तं खल्वम्बसूचया वत्स उत्तमो
मद्विरह दुःखितो निजमातुलराजधानीं गत इति । विना चोत्तमं
मामपि बर्हिष्मती न सुखयिष्यति । तद्यावदुत्तमागमनमत्रैव-
सरस्तीरे निवासः सुखकरः (सरसरसालतरुतलमाश्रित्य तिष्ठति)
(इतीन्द्रजालम्)
कपिञ्जलः – (उत्थाय मयूरपिच्छं च परितो भ्रामयित्वा) राजन्
सर्वमेतत् षाण्मासिकं वृत्तजातं वत्सस्य ते विद्याप्रभावेन दर्शितम्
राजा – भगवन् ! महाननुग्रहः कृतः । तेन खल्वविदित गतयामा
यामिनी प्रभाता नः । कदा पुनस्तत्सर्वं सत्यं द्रक्ष्यामि
(ततः प्रविशति धीरः)

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पौरः - (प्रविश्य) महाराज ! दिष्ट्या वर्धसे वर्धसे ।
फलितास्ते पुण्यपादपाः ।

राजा - भद्रमुख । केन खलु कारणेन ?

पौरः - कुमारस्य ध्रुवस्यागमनेन ।

राजा - स्वस्ति ? केन दृष्टो वा वत्सो ध्रुवः ?

पौरः - महाराज । मयैव सरस्वतीरे सरसरसालमूले निषण्णो दृष्टः ।

राजा - (दीर्घमुष्णं च निःश्वस्य साश्रुपातम्) भद्रमुख । वृद्धस्य पुत्रविरह दुःखितस्य च ममापि कोऽयमुपहासः ? कुतस्तादृशं सद्भाग्यं मे ?

कपिञ्जलः - राजन् । नायमुपहासः । सत्यमेवायं वदति गुरु-प्रसादान्मदीयमिन्द्रजालं सत्यार्थदर्शकमेवेति गन्तव्यम् ।

राजा - (साश्चर्यम्) - यद्येवं तर्हि कृतार्थ एवाहम् ।
इत्युक्त्वानर्घ्यं मुक्ताहारं पौरायार्पयित्वा) विवेकनिधे ।

सिच्यन्तां सकलाः सुगन्धिसलिलैः श्रीराजमार्गाः सदे
बध्यन्तां वरतोरणानि परितः प्रोच्चैः पताका अपि
यास्यामो ध्रुवमीक्षितुं प्रभुकृपापात्रं चमूः सज्ज्यता-
मागच्छन्तु रथाश्वहस्तिशिबिकाः सौवर्णभूषाभृतः ॥ १० ॥

विवेकनिधिः - यथाज्ञा देवस्य । (निष्क्रान्तः)

कपिञ्जलः -(उत्थाय) राजन्, मदीयगुरुचरणानामाज्ञानुसारेण मदीयं कर्तव्यं सर्वं परिसमाप्तम् । साम्प्रतमहं श्रीगुरुचरण-कमलसमीपमुपैमि । (आकाशमार्गेण निष्क्रान्तः)

(सर्वे ऽप्युत्थाय प्रबद्धाञ्जलयः आकाशाभिमुखं पश्यन्ति)

राजा - (क्षणं विलम्ब्य) प्रिये सुनीते । सुरुचे ! सुशीला-सुचरित्रानसूयाद्याभिः सह युवाभ्यामपि तत्रागन्तव्यमेव तत्सर्वा यूयं नवानि वस्त्राणि संधार्य समागच्छत यावत्तावदहमपि प्रातः कृत्यं परिसमाप्य सज्जो भवामि ।

सुनीत्यादयः - यथाज्ञा महाराजस्य इत इतो देवः ।
(निष्क्रान्ताः सर्वे)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

120.

रा
सुनी

राजा

*

स
(
पु
S
प्र

(पु
म
मा
स:

कपि
स
राजा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(ततः प्रविशति स्वप्नदर्शनव्याकुलचित्तः उत्तमः)

उत्तमः — हा भ्रातर्ध्रुव, ध्रुव। त्वादृशस्यापि पुण्यचरित्रस्य भूतप्रेतपिशाचैः पीडनम्? हा सौहार्दसिन्धो। कदा त्वां कुशलिनं द्रक्ष्यामि? रक्षन्तु त्वां मात्रा सुनीत्या पूजिता इष्टदेवताः। यत्स्वप्ने मन्दभाग्येन मया दृष्टं तद्यदि सत्यं तर्हि हता मातृभक्तिः, मृता पितृभक्तिः, शुष्कः सौहार्दसिन्धुः, प्रणष्टं प्रावीण्यं, नष्टं च सर्वस्वमुत्तमस्य। हा! किं कर्तव्यं क्व गन्तव्यं केन पथा च मधुवनं गन्तव्यमिति न किंचिज्जाने। पर्यटनानभ्यासवशादनेककण्टकक्षतशताकीर्णतया पदात्पदमपि चलितुं न शक्नौ पादौ। न च मनोऽपि मे ध्रुवसमागममन्तरा स्थातुं शक्नोति। हा किं करोमि? कथं मयार्यस्य ध्रुवस्य समागमः स्यात्? अथवा

प्रियतमः स मम ध्रुव एव चेत्
ध्रुव इव प्रणतार्तिहर प्रभो।
विर तर्हि विभो ध्रुवसङ्गमं
सपदि मह्यमसह्यतदाधये ॥ ६१॥

गता षण्मासा मे ध्रुवविरहिणो यद्यपि विभो
तथापीदानीं मे त्रुटिरपि विना तं युगसमा।
दयाब्धे तत्तेन प्रणयनिधिना संगमय मां
ध्रुवेणार्यं भ्राता यदि न जनिमिच्छेद्धृतममुम् ॥ ६२॥

(मूर्छया पतति)

(तत प्रविशति गरुडः)

गरुडः — (स्वगतम्) परमकृपालुना परमेश्वरेणाज्ञप्तोऽहं ध्रुवसमीप एवोत्तमं प्रापयितुम्। तदयमुत्तमो मूर्छित इवात्र पतितो दृश्यते। भवतु। ईदृगवस्थमेवेमं ध्रुवसमीपे स्थापयामि। (इति वदन्नुत्तमं स्कन्धे निधाय निष्क्रान्तः)

(ततः प्रविशति ध्रुवः)

ध्रुवः — उत्तमोत्तम मुखाम्बुजं तव
प्रस्फुरत्तरललोचनं कदा
लोचने मम विलोकयिष्यतो
दीर्घदर्शनतमाः प्रशाकले ॥ ६३॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

हा! कदा स श्लाघ्यः समयो भविता यत्र त्वां द्रक्ष्यामि ?
कदा सा कल्याणी वेला विलसिष्यति यस्यां सुधामयानि त्वदङ्गकान्यालिङ्गिष्यामि ? कदा तत्सुदिनं भविष्यति यस्मिन् सुधामयमिव त्वदीयं वचनामृतं श्रोष्यामि । परमप्रेमपीयूषपारावार भ्रातरुत्तम । क्वासि क्वासि देहि मे दर्शनम्

(मूर्छिया निपतति)

गरुडः — (प्रविश्य) आः क्षणादेव परमेश्वरेणादिष्टं स्थानमागतोऽहं तत्र सरस्तीरे रसालबालसरसालकालप्रदेशे श्रान्तः कुमारः ध्रुवो क्रीडितो लक्ष्यते । ततोऽत्रैव सरस्तमतमालतरुमूले छायायामुत्तमं निधाय प्रभुपदकमलसमीपमुपैमि ।

(उत्तमं स्कन्धादवतीर्य निष्क्रान्तः)

उत्तमः — (संज्ञामुपलभ्य निमीलितनेत्रः)

भ्रातर्भ्रातर्ध्रुव वद कथं भूतबाधा तवापि ।
श्रीकान्तश्रीचरणकमलद्वन्द्वबद्धैकबुद्धे ।
भ्राता तेऽहं परमतपसा संप्रतोष्येष्टदेवं
निर्भूतां तां प्रिय तव कृते भूतधात्रीं विधास्ये ॥ ६४ ॥

ध्रुवः — (संज्ञां प्राप्य साश्चर्यानन्दम्) केनेयमुत्तमस्येव वाकसुधा वृष्टा ?

(परितोऽवलोकयति)

उत्तमः — (पुनर्निमीलितनेत्रः) आर्य भ्रातर्मा मदीयां चिन्तां कुरु । गुरुजनाश्रितं मार्गमुत्तमोपि न त्यक्ष्यति ।

ध्रुवः — अहो । अदूर एव दक्षिणतः श्रूयते वत्सस्योत्तमस्येव मधुरं भणितं तदुत्वा पश्यामि । इत्युत्थाय किञ्चिद्गत्वा तमालतरुमूले पतितमुत्तमं विलोक्य सविशेषाश्चर्यम्) किमिदं माया स्वप्नो वा । कुतोऽत्र मातुलराजधानीतोऽकस्मादुत्तमस्यागमनं संभवेत् । अथवा भगवत्प्रसादे किं न संभवेत् ? परमकृपालुना परमेश्वरेण मन्मनोरथपूरणायैवायं कृपया प्रेषितः (समीपे गत्वा — प्रकाशम्) भ्रातर्भ्रातरुत्तम! ~~कुतस्त्व~~ कुतस्त्वमत्राकस्मादागतोऽसि? जानासि किञ्चिन्मां त्वत्प्रेमपरतन्त्रं भ्रातरं ते ?

उत्तमः — (साश्चर्यं नेत्रे समुन्मील्य ध्रुवं विलोक्य च जवादुत्थाय) कुतोऽत्रार्यो ध्रुवः ? फलितमिदानीमथवा मत्पूर्वजन्मागण्यपुण्यपारिजातः (गलदविरलनयनजलो ध्रुवस्य पादयोः पतति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ध्रुवः – (साश्रम्) वत्स, वत्स। अलमलमत्यायासेन।

(इति वदन्नुत्थाप्य गाढमालिङ्गति)

उत्तमः – (स्पर्शसुखमनुभूय स्वगतम्)

न स्वर्गे न बिलस्वर्गे सा सुधा न सुधाकरे।
सौहार्दरसलीन्धूनां बन्धूनां यास्ति सङ्गमे ॥ ६५॥
न हिमे न हिमांशौ वा नाहि सा हरिचन्दने।
अलौकिकी शीतलता यास्ति बन्धुसमागमे ॥ ६६॥

(हर्षाश्रुधारासाकुलाकुलाक्षावुभौ क्षणं वक्तुमशक्तौ तूष्णीं शिलातले तिष्ठतः)

ध्रुवः – (मनः संस्तभ्य) वत्स उत्तम! श्रुतं मया मयि तपोवनं प्रयाते त्वयापि मद्वियोगान्मातुलराजधान्यां निवासः कृत इति। तत्कथमकस्माद्भवत आगमनम्? कथमपि जिनो निराभरणो निरम्बरो निर्वाहनो वत्स त्वयपरिग्रहस्य तपस्वीवेमां दशां दधासीति ज्ञातुमिच्छामि। तन्निवेदय सर्वमात्मवृत्तं गतचिन्तं मां कर्तुमिच्छसि।

उत्तमः – आर्य! श्रूयतां निवेदयामि। अहं खलु युष्मद्विरहदुःखदग्धो मातुलराजधान्यां सार्द्धमासपञ्चकं न्यवसम्। व्यतीतायां रात्रौ निशीथे स्वप्ने मया श्रीयमुनातीरे तपस्यन्नार्यो दृष्टः।

ध्रुवः – ततस्ततः?

उत्तमः – दृष्ट्वा च यावत्परमसुखसुधाब्धौ निमग्नस्तावदभ्यसूयापि दृष्टा।

ध्रुवः – भूतार्थवादी स्वप्नः। ततस्ततः?

उत्तमः – ततः परमक्रुद्धया तया भूतप्रेतपिशाचा आर्यं हन्तुं प्रेषिताः, तेषां घोरा आकृतयः श्रौर्यं चाद्यापि स्मृतिपथगतानि कम्पयन्ति मम हृदयम्।

ध्रुवः – (स्वगतम्) तादृशमेव तदासीत् (प्रकाशम्) वत्स! स्वप्नः खलु न विश्वासार्हः। ततस्ततः?

उत्तमः – ततो नानाप्रहरणभीषणेषु तेषु धावत्सु चार्यं हन्तुमार्येण साश्रुपातमुक्तमिदं हृदयभेदि पद्यमश्रौषम्।

माता मन्मरणं निशम्य मरणं यास्यति शोकार्दिता
श्रीतातो गुरवश्च ते तदखिलं दुःखं कथंचित्सहे ।
हे वत्सोत्तम का तदा तव दशा भाव्येति चिन्ताचिरं
हा हा ! चिन्तयतो मतिर्मम महामोहाम्बुधौ मज्जति ॥

तत्कालीनाचार्यस्य करुणरसवर्षिणी सौहृदवर्षिणी चाकृतिर्न मेऽद्यापि नयनपथादपसरति ।

ध्रुवः — वत्स ! एष निर्निमित्तो निष्प्रतिमतमस्य ते सौहृदस्यैव महिमा । ततस्ततः ?

उत्तमः — आर्यस्य चरमवचःश्रवणोत्तरक्षण एव प्रबुद्धोऽहं स्वप्नदर्शनदुःखसंजातहृदयकम्पः किंकर्तव्यतामूढो यत्रार्यस्तत्रैव मया गन्तव्यमिति निश्चित्य शयनादुत्थाय नामन्त्र्य मातामहौ नापृच्छ्य मातुलवर्यान् नावेद्य मित्रेभ्यश्च सदनुचरैरिव सुधाकरकरैर्दर्शितमार्गः केनाप्यलक्षितो युष्मत्समीपमेवागन्तुं प्रस्थितः ।

ध्रुवः — वत्स ! अतीव दुष्करमेतदारब्धम् । ततस्ततः ?

उत्तमः — आर्य ! अविमृश्यकारिता सर्वं संतापयत्येव । द्वितीयेऽह्नि क्षुधितस्तृषितः श्रान्तश्चाहं भग्नोत्साहो भग्नमनोरथश्च भक्तजनचिन्तितपूर्तिचिन्तामणिं श्रीरमारमणमेव युष्मत्समागमाय शरणं यात इत्येतावन्मात्रं जानामि । कतममेतद्वनं कथमत्र ममागमनं कथं च युष्माकमकस्मादत्रागमनं किमयं स्वप्नः किंवा मायेति न किंचिज्जाने । तत आर्य एव सर्वं निवेदयतु ।

ध्रुवः — (सहर्षाश्रुवर्षाकुलः) वत्स ! इयं सा तु बर्हिष्मती तातचरणानां राजधान्यविदूरे दृश्यते । पश्य एतच्च बर्हिष्मतीसीमवनम् । वत्स ! अहमपि क्षणमात्रेणात्र मधुवनाद्भगवदादिष्टेन पक्षिराजेन प्रापितो वत्सेन विना बर्हिष्मती न मे सुखाय भविष्यतीति यावदुत्तमागमनमत्रैव मया स्थेयमिति निश्चित्यात्र स्थितो वत्सस्य सद्यः समागमानन्दाप्तये प्रणतपारिजातं जगत्त्राततातं श्रीरमारमणमेव शरणमकरवम् । मन्ये करुणावरुणालयेन तेनैवावयोः स्वकीयकिङ्कर्योर्मनोरथपूरणाय एतत्संविधानं कृतम् । अन्यथा क्व ते

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

माता महाराजधानी ? क्व मधुवनं ? क्वेयं बर्हिष्मती सीमभूमिः ?
तन्नमस्तस्मा अघटित घटना पटीयसे परमेश्वराय । यावज्जीवमविस्मर्योपकारभारः स एव भगवान् मनसा वचसा कर्मणा च सेव्यः कृतज्ञेनेति मे मतम् ।

उत्तमः – आर्य ! युक्तमेवोक्तमार्येण । क इवान्यस्तादृशो दयालुर्यो बालस्यापि दुर्लभतमानि प्रार्थितानि पूरयेत् ?

ध्रुवः – वत्स ! वत्सस्य समागमानन्दसुधासिन्धुनिमग्नमपि मामेका चिन्ता संतापयति ।

उत्तमः – कीदृशी सा चिन्ता ?

ध्रुवः – वत्स ! तव मातामहाराजधान्यां सर्वजनान् तवादर्शनजन्यो महान् शोकसागरः प्लावयिष्यति । सत्वरतरं च प्रेषितैश्चारैर्विज्ञापितत्वत्प्रयाणवृत्तान्तास्तातचरणा मातरश्च नौ दुष्पारे दुःखपारावारे निमज्जनं करिष्यन्तीति ।

उत्तमः – आर्य ! भवितव्य एवायं तर्कः । सर्वेषामनर्थानां मूलमयमेवाविमृश्यकारी जन इति विचार्याद्य विद्यते परं तदानीं न किंचिदस्फुरन्मे ।

ध्रुवः – वत्स । नेदानीं लेशमात्रमपि खेदस्य कारणम् । इदानीमेवावाभ्यां श्रीपितृचरणानां समीपे गन्तव्यम् । दृष्ट्वैव नौ सद्य एव शोष्यति पितृचरणानां मातृचरणानां च शोकसागरः । पितृचरणैश्च शीघ्रतरं प्रेषितैर्भयश्चारैर्भ्यो विदितभवदीयकुशलवृत्तान्ताया भवन्मातामहराजधान्या अपि शोकसागरः शोष्यतीति ।

उत्तमः – आर्य । तर्हि शीघ्रमेव पवित्रय पादपद्मपङ्क्त्या बर्हिष्मतीम्

ध्रुवः – वत्स ! एहि, एहि गच्छावः ।

(निष्क्रान्तौ)

(ततः प्रविशति सपरिवारो महाराजः)

राजा – विवेकनिधे ।

विवेकनिधिः – आज्ञापयतु देवः ।

राजा – देव्याः सुनीत्याः सुरुच्याश्चार्थे किमस्ति वाहनम् ?

विवेकनिधिः – महाराज । स्वर्णशिबिके सज्जीभूते एव ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा — सुशीला सुचरिता नसूयानां चर्यै किमस्ति वाहनम् ?

विवेकनिधिः — अस्ति सज्जः सौवर्णो रथः।

राजा — सन्ति सर्वे पौरा जानपदाश्च लोका वत्सस्य ध्रुवस्यावलोकनाय सज्जाः ?

विवेकनिधिः — सन्ति सर्वे सज्जाः

राजा — सर्वे राजानः सामन्ताश्चागताः ?

विवेकनिधिः — अथ किम् ? द्वारि मिलिता राजानः सामन्ताश्च प्रतिपालयन्ति महाराज दर्शनमेव।

राजा — तर्हि किमतः परं कर्तव्यम् ?

विवेकनिधिः — देव महामहोत्सवादद्य गन्धगजारोहणमेव देवेन कर्तव्यम्। शृङ्गारिता चास्ति करिणी कुमारस्य ध्रुवस्यार्थे

(ततः प्रविशति द्वारपालः)

द्वारपालः — (प्रविश्य) देव वङ्गदेशात् पत्रमादाय समागतौ दूतौ द्वारि तिष्ठतः।

राजा — शीघ्रं प्रवेशय

(द्वारपालो गच्छति दूतौ प्रवेशयति च)

दूतौ — (राजानम् प्रणम्य पत्रमर्पयति)

राजा — (सानन्दं गृहीत्वा) विवेकनिधे! श्रावय किमाह पयत्यार्यः वङ्गदेशेश्वरः।

विवेकनिधिः — (पत्रमुद्घाट्य)

महाराजाधिराजाय श्रीमते वत्सायोत्तानपादाय शुभाशिः सहस्रापण पूर्वं सखेदमिदं निवेद्यते।

सुनीति } — हा! किमेतदापतितम् ?
सुरुचि }

राजा — धैर्यं धृत्वा सर्वं श्रोतव्यम्।

विवेकनिधिः — अद्य निशीथे शयन भवनादेकाकी वत्स उत्तमः क्वापि प्रपलायितः। श्रुत्वा चैतत्पूर्वस्यां कुमारश्चन्द्रहासो दक्षिणस्यां सेनापतिर्भद्रसेनः पश्चिमायां प्रधाना धर्मवर्मा कौबेर्यां च कुकर्मा स्वयमहं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तदन्वेषणाय प्रस्थितः। सर्वेष्वादशयोजनं वनान्युपवनानि च भ्रान्त्वा न खलु बालस्यैकाकिनः पद्भ्यां गच्छतश्च प्रहरद्वयमात्रेण दशयोजनाधिकभूभागोल्लंघनं संभवतीति विचार्य प्रतिनिवृत्ताश्च। किं मूढतामेवोपगताः किं केनापि द्रक्षसा भक्षितः किं वा केनापि यक्षेणापहृतः किमथवा दैवकोपात् सदेह एव प्रणष्टो वत्स इति निर्णेतुं न प्रभवामः। शतधा तदन्वेषणपरम्परापरायणान्तः क्षणा निर्विण्णा एव वयम्। भवद्भिरपि तदन्वेषणपरायणैर्भाव्यम्। प्रणतजनवत्सलः परमेश्वरः प्रयास साफल्यं करिष्यतीति। नान्यत्किंचिल्लेखितुं स्फुरतीति विरम्यते लेखनात्।)

राजा — वत्स वत्स किमेतदापतितम्? उत्तम उत्तम। क्व गत्वा ते भुवचन्द्र चन्द्रिकां दीनौ मे चक्षुश्चकोरावास्वादयिष्यतः?

(इति वदन् मूर्छया पतति)

सुरुचि सुनीती — हा वत्स! कथं विना त्वया जीविष्यावः?

(मूर्छया पततः)

विवेकनिधिः — देव! समाश्वसिहि समाश्वसिहि।

(पटान्तेन वीजयति)

सुशीला सुचरित्रे — देव्यौ! समाश्वसितं समाश्वसितम्।

(व्यजनैर्वीजयतः)

राजा — (संज्ञां प्राप्य) सद्गुरुशिरोमणे! दयमयात्मन् देवर्षे भगवन्नारद! देहि मे दीनाय दर्शनम्।

सुनीतिसुरुची — (संज्ञामुपलभ्य) हा मन्दभाग्यानः कृपालुः कपिञ्जलोऽपि गुरुसमीपे प्रस्थितः।

(राजा — प्रेषय वा भगवन् भवद्भिर्द्रष्टव्यं कपिञ्जलम्।

(ततः प्रविशत्याकाशमार्गेण सकपिञ्जलो नारदः)

नारदः — जय जय जय राजन्! मा किमादं विदध्या निजजननिविलापसन्तापपापप्रहर्ता।
जनयति जनकं तं श्रीरमाप्राणनाथो
वश इव तव सूनोः सोऽयमद्य ध्रुवस्य ॥६७॥

CC-0 Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(सर्वेऽप्युत्थाय प्रणमन्ति)

राजा - (नारद! नारदाय स्वसिंहासनं समर्प्य कपिञ्जलाय चान्यं सिंहासनं समर्प्य पूर्वं नारदस्य पश्चात्कपिञ्जलस्य पादप्रक्षालनं कुरुते ।)

नारदः - राजन्नलमलमायासेन (स्वासने स्थित्वा) किमर्थं स्मृतोऽस्मीति निवेदय ।

राजा - यथाज्ञा सद्गुरोर्देवर्षेः (इत्युक्त्वोत्थाय कृताञ्जलिः) भगवन् ! यामप्रकादारभ्य क्लेशाश्लेषाधीना धीर्मे न क्षणमपि सुखलेशमप्यनुभवति । तदेतत्कस्या मे पापायाः कृतेः फलम् ? पूर्वं वत्सस्य ध्रुवस्यैव चिन्तया चिन्ताचित्त आसम् । इदानीमनागत एव ध्रुवे वत्सस्योत्तमस्य दुस्सहा चिन्ता समापतिता । केन मे पापकर्मणा एवमुत्तरोत्तरं पुत्रवियोगदुःखान्यापतन्ति, केन सत्कर्मणा तस्य पापस्य निवृत्तिः स्यात्, अस्ति वत्सोत्तमः कदाचात्रागमिष्यतीति श्रीमतां मुखकमलाच्छ्रोतुं श्रीमतां स्मरणं मया कृतम् ।

(इत्युक्त्वोपाविवेश)

नारदः - महाराज उत्तानपाद ! स्त्रीजितत्वं सर्वेभ्यः पापेभ्यः पापकृत्तममिति मा विक्षितं ते । स्त्रीजितता सर्वानर्थानामुत्पत्तिक्षेत्रम् । सर्वसद्गुणानां वध्यशीला । सर्वाभ्युदयानामुच्चाटनविद्या । कृत्याकृत्यविचारणामुत्सारणकला । हेयोपादेयविवेकस्याकालमृतिश्चेति निर्विवादम् । स्त्रीजितेन त्वया के केऽनर्था नाचरिताः ? सकलसद्गुणपरिपूर्णश्चन्द्रशीलो वत्सो ध्रुवः परित्यक्तः । सर्वोत्तम उत्तमोऽपि दूरे कृतः । पतिव्रतारत्नं सुनीतिः परित्यक्ता । विद्याविवेकविनयाब्धिर्विवेकनिधिः तिरस्कृतः । सुशीला सुचरितानसूयाश्च निःसारिताः । अभ्यन्तरी कृता च पापाऽभ्यसूया । दूरेऽस्तु सर्वेषां पापानां कथा । क्षणमात्रपरिचिताऽभ्यसूयासङ्गतिः कान् काननर्थान्नोत्पादयेत् ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सा पुनराबाल्यातः परीक्षिता । मीवैला ननर्थानुत्पादयेदेव तत्र किं चित्रम् ? यथा वत्सस्य ध्रुवस्य तपोवन प्रयाणे मूलमभ्यसूया-भूत तथैव वत्सस्योत्तमस्यापि प्रयाणे मूलमभ्यसूयैवास्तीति मे शङ्कमवेहि ।

सुरुचिः – (स्वगतम्) दुष्कृतया तया ममापि पुत्रः कथं वने प्रेषितः ?

राजा – भगवन्नभ्यसूया तु ध्रुवतपोभङ्गाय मथुरासीमनि मधुवनं प्रतिगतेति कथिञ्जल दर्शितादिन्द्रजालादवगतम् । मधुवन-स्थिता सा बङ्गेश्वर राजधानीस्थितमुत्तमं कथं प्रव्राजयेदिति शङ्कते मनो मे ।

नारदः – राजन् यस्मिन्नवसरे तया भूतावलिर्ध्रुवं प्रति प्रेषिता तस्मिन्नवसरे ध्रुवेण भूतावलिभयभीतेन संशोकमेत दुष्कम् । तस्मिन्नवसरे ध्रुवेण भूतावलिभयभीतेन मातः मन्मरणं निशम्य मरणं याताऽतिशोकार्दिता माता कथंचित्सहे । ताताः सद्गुरवस्येव तदिदं सर्वं कथंचित्सहे । हे वत्सोत्तम का तदा तव दशा भविष्यतीति चिन्ते चिरं हा ! हा ! चिन्तयतो मतिर्मम महामोहाम्बुधौ मज्जति ॥

राजा – अहो ! करुणतरा वत्सस्योक्तिः । ततस्ततः ?

नारदः – तच्च सर्वं बङ्गेश्वरराजधान्यां सुप्तेनोत्तमेन स्वप्ने दृष्टं श्रुतं च । दृष्ट्वैव तद्भयचकितलोचनः प्रबुध्य ध्रुवगतनैसर्गिकवात्सल्यविवशाशयो निशीथ एवोत्थाय ध्रुवेण सह समानसुखदुःखतामनुभवितुं मधुवनं प्रति प्रस्थितः । समागमिष्यति चाल्पेनैव कालेन कुमार उत्तमः । ततो न कुमारेण ध्रुवेण सहैव कुमार उत्तमः । ततो न तद्विषये काचिच्चिन्ता विधेया ।

राजा – हा क्व मधुवनं क्व बङ्गदेशराजधानी ? क्व ध्रुवः क्व च कुमार उत्तमः ? कदा कथं कुत्र वा तयोः समागमः संभवेत् ? तदनंतरं च संगतयोस्तयोर्मुखचन्द्रचन्द्रिकां वयं पास्यामः । कुतस्तावत्पर्यन्तं प्राणनमपि नः स्यात् ? हा पापेऽभ्यसूये

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

131. त्वैनैव पापेन भस्मीभूत भव। (मूर्च्छया पतति)
विवेकनिधिः — महाराज! समाश्वासिहि समाश्वासिहि।
(इति वदन् वीजयति)
सुनीतिसुरुची — हा वत्स, उत्तम! कथमेवमेकपद एव सर्वानस्मानना-
पृच्छ्य पृच्छ्य प्रयातोऽसि! (मूर्च्छया पततः)
सुशीलासुचरित्रे — देव्यौ! धैर्यं धार्यतां धैर्यं धार्यताम्।
(वीजयतः)
राजा — (संज्ञामुपलभ्य) भगवन् क उपाय इदानीं वत्सयो-
र्ध्रुवोत्तमयोः समागमस्य?
~~सुनीति सुरुची —~~
~~दत्त्वा सर्वस्वमपि नौ प्राणानप्यपि समर्प्य नौ।~~
~~उत्तमध्रुवयोर्द्रष्टुं मुखचन्द्रौ स्पृहास्ति नौ ॥६८॥~~
~~नारदः — राजन्! वनिताविनोदमृगत्व आत्मनो दूरे~~
~~कृते सर्वाभ्युदयानां भाजनत्वमभिगच्छसि। त्वमपि~~
~~सुरुचे! आबाल्यपरिचिताया अभ्यसूयाया यावत्परित्यागं~~
~~न करिष्यसि तावन्नास्ति ते सुखप्राप्त्याशापीति~~
~~निःशङ्कं मवेहि।~~

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुनीतिसुरुची - दत्त्वा सर्वस्वमर्पिनौ प्राणान्वापि समर्प्य नौ।
उत्तमध्रुवयोर्देवं मुखचन्द्रौ स्पृहालिनौ ॥ ९८॥

नारदः - राजन्! वनिताविनोदमृगत्व आत्मनो दूरे कृते सर्वाभ्यु-
दयानां भाजनत्वमधिगच्छसि। त्वमपि सुरुचे! आबाल्य-
परिचितायाः अभ्यसूयायाः यावत्परित्यागं न करिष्यसि
तावन्नास्ति ते सुखप्राप्त्याशापीति निःशङ्कमवेहि।

राजा - भगवन्! युष्मदीयसदुपदेशमहामन्त्रश्रवणेनैव मदीयहृदयाल-
यात्प्रपलायिता स्त्रीवशतापिशाची स्वतन्त्र एवास्मीदानीमहम्।

सुरुचिः - भगवन्! नातः परं यावज्जीवमभ्यसूयायाः मुखमप्यवलोक-
यिष्यामीति मे प्रतिज्ञा।

नारदः - पश्यतं तर्हि

कमलकोमललोलविलोचनौ
शमदमाविव मूर्तिधरौ वरौ।
नयजयाविव वा सहचारिणौ
सहजसौहृदसारमयाशयौ ॥ ९९॥
एतावभ्यागतौ वत्सौ कुमारावुत्तमध्रुवौ।
कृतार्थयत चक्षूंषि स्वानि दृष्ट्वाद्य तावुभौ ॥ १००॥
(ततः प्रविशतो ध्रुवोत्तमौ)

ध्रुवः - (प्रविश्य) तात, तात ध्रुवोऽहमभिवन्दे।
(इति वदन्नेत्रयोरश्रूणि मुञ्चन् दण्डवत् प्रणमति)

राजा-(सहर्षम्) वत्स, वत्स, ध्रुव! परमाभ्युदयभाजनं भूयाः।
(इति वदन्नुरसाश्लिष्यति)

उत्तमः - उत्तमोऽहमभिवन्दे। (इति वदन् पादयोः पतति)

राजा - वत्स, वत्सोत्तम! ध्रुवाभ्युदयसमानभागभाग् ~~एव~~ भव!
(उरसाश्लिष्यति)

ध्रुवः - मातर्मातः सुरुचे! ध्रुवोऽहमभिवन्दे।

सुरुचिः - (स्नासमालिङ्ग्य) वत्स, चिरं जीव्याः!

उत्तमः - दयामृतमयाशये मातः सुनीते! उत्तमस्यायं प्रणामः।
(सास्रं दण्डवत् प्रणमति)

सुनीतिः - वत्स! परमेश्वरप्रसादेन चिरं जीव्याः (आश्लिष्यति)

उत्तमः - मातः! उत्तमस्यायं प्रणामः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सुरुचिः - वत्से! चिरं जीव्याः। अपि खलु कुशलं ते?
उत्तमः - अस्ति कुशलं मे परमस्नेहाधारस्य ध्रुवस्यानुग्रहेण।
(ततः प्रविश्य सर्वे पौरजानपदाः राजानं प्रणम्य प्रणम्य च ध्रुवोत्तमौ)
पौराः - देव! दिष्ट्या वर्धसे कुमारयोरागमनमहामहोत्सवेन।
(स्व स्वासनेषूपविशन्ति)
राजा - विवेकनिधे! पापाभ्यसूया प्राणान्तदण्डं प्रापणीया यथैव तत्सर्वं दुःखं स्वकापराधेन निर्मितम्।
सुनीतिः - (साञ्जलिरुत्थाय) प्राणनाथ! महोत्सवमयेऽस्मिन्समये प्राणनाथात् किमपि याचितुमीहे।
राजा - याचस्व, नास्त्यदेयं किमपि तुभ्यम्।
सुनीतिः - प्राणनाथ! मुहूर्तात्पूर्वं कुमारं ध्रुवं कुमारमुत्तमं च कोऽपि द्रष्टा वा पश्याम इत्याशापि नासीत्। परमकृपालोः परमेश्वरस्य महामुनेर्नारदस्यानुग्रहेण च तावेतौ कुमारावपि पश्याम इदानीम्। किमेतदल्पमानन्दस्थानम्? ईदृशे महानन्दमये समयेऽस्मिन् सर्वैरराजरङ्कैः सानन्दैर्भाव्यम्। न केनापि औदास्यदास्यमङ्गीकार्यम्।
राजा - अत्र कः सन्देहः? सर्वैः सानन्दैरेव भाव्यम्।
सुनीतिः - तर्हि वराकीमभ्यसूयां प्राणान्तदण्डान्मुक्तां विधाय परमानन्दनिमग्नां करिष्यति देव इत्यभ्यर्थना मे।
नारदः - वत्से सुनीते! धन्यासि खलु धन्यासि, या महापराधनिधानेषु परमापकारकारिष्वपि परमोपकारमेव कर्तुं प्रवृत्तासि।
विवेकनिधिः - देव! देव्याः प्रार्थनोक्तियुक्तैव मे प्रतिभाति। ततः परं देवः प्रमाणम्।
राजा - प्राणप्रिये सुनीते! निर्निमित्ता निष्प्रतिमा च ते परोपकारप्रवृत्तिः। प्रिये! तैस्तैश्च तेऽनन्यसामान्यैः सद्गुणैः परतन्त्रोऽहम्। त्वत्प्रीतये प्राणान्तदण्डार्हामपि तां प्राणान्तदण्डान्मुक्तां करोमि।
सुनीतिः - महाननुग्रहोऽयम्। (सास्रं प्रणमति)
ध्रुवः - तातचरण! अतिप्रियमिदं मे।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा - भगवन् देवर्षे! परममन्त्रोपदेशेन वत्सं ध्रुवं भगवत्प्रीतिपात्रं संपादयता श्रीमता प्रति: सह सर्वस्वसमर्पणेनापि नानृणा भवितुं वयं शक्ताः परमुपरं युष्माद्दिव्येन कापिञ्जलेन प्रार्थिताः सर्वे वयं स्वोविद्याच्चमत्कृतिप्रदर्शनेन। तस्मै ग्रामसहस्रमिदमर्प्यते तवद्वीकाराविप्यन्ति भवंत इत्याशासे।

नारदः - राजन्! मुनयो वयं राज्यसुखपराङ्मुखवृत्तय एव नित्यम्। तद्यदि मदीयं कापिञ्जलस्य चास्या नृणमेव गन्तव्यं ते तर्हि वर्तत एवैक उपायः

राजा - भगवन्! क इव?

नारद - यद्याग्रहस्तर्हि श्रूयताम्!

यावज्जीवं सुनीतौ चेत्प्रणयप्रवणो भवेः।
अभ्यसूयाभ्यसूयां च प्राप्तानृण्यो हि नस्तदा ॥ १०१॥ ॥

राजा - भगवन्!

यावज्जीवं सुनीतिर्मे प्राणेभ्योऽप्यधिका प्रिया।
अभ्यसूयामुखं चापि प्रेक्षिष्ये न कदाचन ॥ १०२॥

इत्येषा मे प्रतिज्ञा।

नारदः - राजन्! यद्येवं तर्हि प्रतिदिनमत्रोत्तरोत्तरां (?) श्रियमभ्युदयभाजनतामनुभूय परत्र परमेश्वरप्रसादपात्रतामनुभविष्यसि। गतश्चे मम कापिञ्जलस्य च त्वमिदानीमनृणताम्।

(आकाशमार्गेण कापिञ्जलेन सह निष्क्रान्तः) तरा

(सर्वेप्युत्थाय प्रणमन्ति) जु

राजा - प्रिये सुनीते, सुरुचे! महामहोत्सवं विदधाः स्वायंभुवेश्वरमन्दिरमुपेत्य सर्वेऽपि वयं तदीयां कार्यनां कुर्महे। त्य

सुनीतिसुरुची - यथाज्ञा महाराजस्य!

राजा - विवकानिधे! गच्छ, सर्वैः पौरजानपदैः सह महामहोत्सवं भगवन्मन्दिरे कारय। —

विवकानिधिः - यथाज्ञा देवस्य! (सह पौरजानपदैः निष्क्रान्तः)

राजा - वत्स, ध्रुव! वत्सोत्तम! इतस्ते भगवन्मन्दिरं गच्छाम:

ध्रुवोत्तमौ - यथाज्ञा तातचरणानां! (उत्तिष्ठतः)

राजा - सुनीते, सुरुचे! सखीभिः सह स्वायंभुवेश्वरमन्दिर

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥

मार्गं दर्शयतं मे ।

सुनीतिसुरुची — यथाज्ञापयत्यार्यपुत्रः । इत इतो देवः ।

(निष्क्रान्ताः सर्वे)

॥ इति श्रीमत्सद्गुरुकेशवकृपाकल्पवल्लरीपल्लवायमाने श्रीध्रुवाभ्युदयनाम्नि नाटके पञ्चमोऽङ्कः ॥

श्रीमत्सूर्यकुमारिका सुजननी श्रीविट्ठलेशः पिता
यस्य भ्रातर उत्तमोत्तमगुणाः श्रीमत्कुबेरादयः ।
श्रीमत्केशवशास्त्रिणश्च गुरवो मित्रं कविः शङ्करः
तस्येयं कृतिरस्तु तुष्यतु तया श्रीमान्सदा शङ्करः ॥१॥

॥ अथ षष्ठोऽङ्कः ॥

(ततः प्रविशति शङ्कुकर्णो यक्षः)

शङ्कुकर्णः — (ऊर्ध्वमवलोक्य निःश्वस्य च) हा ! दुःखिताः खलु देवा यतो मन्त्राधीना विहिताः । हा कथमीदृशमकार्यं मया कार्यम् ? कथं वा भयसूर्याप्रजप्तमन्त्राधीनतया वा न कृत्वापि सुखं मे ? यद्भवतु तद्भवतु । महाराजाज्ञामन्तरा न किञ्चित्कार्यम् । (अग्रतोऽवलोक्य) अहो महाराजः इहैवालकनन्दातीरे तरुच्छायायां तिष्ठति । (समीपमुपेत्य प्रणम्य च) जयतु जयतु श्रीमहेश्वरमहामित्रं देवः । प्रणमाम्यहं परिचारकपरमाणुः शङ्कुकर्णः ।

कुबेरः — शङ्कुकर्ण ! कुत आगतोऽसि ? कथं दीन इवालक्ष्यसे ?

शङ्कुकर्णः — (निःश्वस्य) देव ! दीना दुःखिनश्च देवा एव मन्त्राधीनत्वात् ।

कुबेरः — कथमीदृशो विचारः स्फुरितस्ते मनसि ? स्फुटं कथय किमस्ति ते दुःखमिति ।

शङ्कुकर्णः — श्रूयतां देवेन । आस्ति खलु बर्हिष्मतीमहीपतिरुत्तानपादो नाम राजा ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कुबेरः — आस्तां। जानामि जगत्प्रसिद्धं तम्। ततस्ततः?
शङ्कुकर्णः — तस्य च द्वे माहिष्यौ वर्तेते।
कुबेरः — जानामि ते अपि। एका सुनीतिरन्या सुरुचिश्च। ततस्ततः?
शङ्कुकर्णः — सुनीतिरतिसरलापि सुरुच्या सापत्न्यसहजद्वेषात्पीड्यते।
कुबेरः — एतदपि विदितप्रायमेव मे। सुरुच्युक्तवचनशरभिन्नहृदयः सुनीतिपुत्रो मधुवने तपस्तप्त्वा बहुभिर्मासैर्भगवत्प्रसादं लेभ इति। ततस्ततः?
शङ्कुकर्णः — परमेश्वरप्रसादपात्रीभूतं सम्प्राप्तयौवनं कुमारं ध्रुवं यौवराज्येऽभिषिच्य तदङ्के चोत्तमं निवेश्य राजोत्तानपादः परमानन्दात् निखिलभूवलयभूषणभूतानि तीर्थानि सेवितुं प्रस्थितः।
कुबेरः — अवस्थानुरूपमेवेदं महाराजेनाचरितम्। ततस्ततः?
शङ्कुकर्णः — कुमारस्य ध्रुवस्य यौवराज्याभिषेकं न सहमानयाऽसूयाप्रेरणया सुरुच्या पुत्रमुत्तमं राज्येऽभिनिवेशयितुं नानाविधमन्त्रजपैर्वशीकृतोऽहम्।
कुबेरः — युज्यत एवासूयाप्रसरण्याः सुरुचेः सर्वमकृत्यमपि कृत्यमिव कर्तुम्। ततस्ततः?
शङ्कुकर्णः — ततश्चानेकमन्त्रपुरश्चरणवशीकृतं मां प्रातर्दर्शनायागतो ध्रुवो भक्षणीय इति प्रेरयति। कथं मया स महात्मा निरपराधो भक्षणीयः? कथं च तदभीप्सितम् असम्पाद्य मन्त्राधीनत्वात् सुखं स्थातुं शक्यम्? तेन दुःखेन दुःखितो देवमेव प्रष्टुं देवपादमूलं प्राप्तोऽस्मि।
(पादयोः पतति)
कुबेरः — (प्रहस्य स्वगतम्) अहो! उत्तम उत्तमतां न त्यजति नीचस्य नीचतां न मुञ्चतीति निर्विवादम्। अपाराण्यपि सुनीत्या ध्रुवेण च विरचितान्युपकारभाराणि विस्मृत्य सुरुचिरिदानीं सुनीत्या ध्रुवस्य घातादिहितं कर्तुं प्रवर्तते। किं सुरुचेरविवेकम्। अथवा कोऽपराधः सुरुच्याः पापाया असूयाया एवेयं पापकृतिः। असूयाविवशाः को वा पश्यन्नप्यन्धः शृण्वन्नपि बधिरो जानन्नप्यज्ञो न भवति लोकेऽस्मिन् लोकः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(प्रकाशम्) शङ्कुकर्ण! श्रुतं मया सर्वं त्वदीयं दुःखकारणम्। त्वया त्विदानीं तत्र गत्वा (कर्णे) एवं एवं कर्तव्यम्।

शङ्कुकर्णः — यथाज्ञा देवस्य। (प्रणम्य निष्क्रान्तः)

कुबेरः — मन्त्रपराधीनतया दुःखितो गतो दीनः शङ्कुकर्णः। नूनमशक्तोपासनापि दुःखदीपायना भवत्येव। इदानीमहमपि श्रीमहेश्वरपूजनाय गच्छामि। (निष्क्रान्तः)

— — —

(ततः प्रविशति उद्विग्नचित्तो ध्रुवः)

ध्रुवः — (स्वगतम् सोद्वेगम्) हा! क्व माता सुरुचिः? क्व बन्धुरुत्तमः? कथमद्य न तौ दृष्टिपथमवतरतः? न तयोर्दर्शनं विना मे मनसः शान्तिर्भवति।

सुनीतिः — (प्रविश्य) कुमार कुमार! कथमुद्विग्न इव लक्ष्यसे?

ध्रुवः — आर्ये मातः! गतेऽह्नि सायंसमये मात्रा सुरुच्या वत्स, त्वया श्वः प्रातःकाले सरित्तीरसमीपाश्रमवासिनो योगिराजस्य दर्शनार्थं गन्तव्यमित्याज्ञप्तोऽहम्। परं पश्चिमरात्रावकस्मात्

क्रोधान्ध एव घनघुर्घुरघोरशब्दो
हा! केसरी चरणचालितभूमिभागः।
क्रूरं हरत्यखिल ~~मानवमान~~ मानवमानवन्द्यां
कोऽनु ममाशु परिरक्षतु कोऽपि वीरः' ॥१॥

एतां दीनां भयार्तां च नगरजनस्य वाणीं श्रुत्वा समुल्लङ्घ्य मातुराज्ञां न प्रणम्य योगिराजमपि न चिन्तयित्वा च योगिराजलब्धव्यवरलाभहानिं गोरक्षणार्थं त्वरिततरं गतोऽहम्।

सुनीतिः — युक्तमेवाचरितं वत्सेन। राज्ञां प्रथमो धर्मः गोब्राह्मणपरिरक्षणं प्रजापालनं च। ततस्ततः?

ध्रुवः — दूरमनुद्रुतेन मया मध्येमार्गं केसरिणा स्वयंप्रमुक्ता निर्भया निःशङ्का नगरं प्रतिगच्छन्तो गावो मया दृष्टाः केसरी चापश्यत एव मे क्वाप्यन्तर्हितः। ततोऽहं योगिराजदर्शनाय गतः परं मात्रा सुरुच्या निर्दिष्ट ~~आश्र~~ आश्रमे न कोऽप्यासीत्।

सुनीतिः — वत्स! निसर्गनिःस्पृहा हि योगिनः। प्रातर्दर्शनार्थं न गते त्वयि रोषात्परित्यज्याश्रमं क्वचिद्वनान्तरं गतो

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भविष्यति । ततस्ततः ?

ध्रुवः — ततो मातुराज्ञा न पालिता मयेति क्षमापनाय मातुः श्रीसुरुचेर्मन्दिरं गतो यावत् तावन्माता श्रीसुरुचिरपि नास्ति मन्दिरे । न च वत्स उत्तमोऽपि ।

सुनीतिः — वत्स ! द्वारपालेभ्यः पृष्टं न वा ? पृष्टैश्च तैः किमुक्तम् ?

ध्रुवः — मातर्द्वारपालास्तु, रथमारुह्य योगिराजदर्शनार्थं गता देवीति निवदन्ति । परं योगिराज एव नास्ति तपोवने न च माता सुरुचिर्नाप्युत्तमः । न च तत्र रथो नापि हया न किङ्कराश्च ।

सुनीतिः — (क्षणं विचार्य) वत्स ! पूर्णं संभाव्यं अभ्यसूयैव प्रवञ्चा । सा खलु तद्विषयाभिज्ञा भविष्यत्येव ।

ध्रुवः — मातः ! सत्यमुक्तम् । तथा करोमि ।

(ततः प्रविशत्युद्विग्नाभ्यसूया)

अभ्यसूया — (स्वगतम्) निष्कपटे कृतं कपटमात्मने फलतीति लोकोक्तिर्न मृषा । ध्रुवविनाशाय कृतः प्रयोगोऽप्युत्तमनाशाय जातः । सुरुचिमपि रथेन सहैव नीत्वा कुपितो यक्ष उत्पतित आकाशमार्गेण । तत्स्मरन्त्या मेऽद्यापि कम्पते हृदयम् । भयभिन्नगतित्वात् कथं कथमपि विलम्बेन राजद्वारं प्राप्ता । किमिदानीं सुरुचिमन्दिरगमनेन ? सुनीतिमन्दिरमेवेदानीं गन्तव्यम् ।

(अग्रतो गच्छति)

ध्रुवः — (दूरतोऽवलोक्य) एहि, एहि, अभ्यसूये ! मात्राकुलेनैव त्वं स्मृतासि । कथय क्वास्ति माता मे सुरुचिर्वत्स उत्तमश्च ? तयोश्चिन्तयैव व्यग्रोऽस्मि ।

अभ्यसूया — (स्वगतम्) इदानीं सुरुचेः प्रवासो मृतश्चोत्तमः । ततो नास्ति ताभ्यां काचिल्लाभाशा । तदधुना सुनीति-ध्रुवयोर्मनो वश्यतां नेयम् (प्रकाशम्) देवि ! कुमार ! पराहितकरणं स्वस्यैवाहितकारकं गच्छतीति नाविदितं कुमारस्य ।

ध्रुवः — जगत्प्रसिद्धमेवैतत् । ततः किम् ?

अभ्यसूया — कुमार ! सुरुचिः खलु जन्मत एव सुनीतेस्तव

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चाहितवानसि सम्भवादित्यपि नाविदितं ते।

ध्रुवः — (सरोषम्) नैतन्मया पृच्छ्यते। मातुः श्री सुरुचेः प्रवृत्तिमेव यदि जानासि तर्हि कथय।

अभ्यसूया — सैव मयाप्युच्यते। सुरुच्या मन्त्रजपपुरश्चरणैर्वशीकृतः कश्चिद्यक्षो योगिवेशं धृत्वा तपोवने न्यवसत्। तस्मै च राज्ञी सुरुच्या प्रातर्ध्रुवो मदाज्ञया दर्शनार्थमागमिष्यति स त्वया त्वरया भक्षणीय इति कथितं, तेन च तदङ्गीकृतम्।

ध्रुवः — (अतिकोपात्) मूढे! किमेतदन्यदन्यत् किमपि प्रलपसि? धिक् त्वां यथाद्यावधि परिपोषितासि तामेवेदानीं निन्दितुं प्रवृत्तासीति।

अभ्यसूया — (सभयकम्पं मौनमाश्रित्य तिष्ठति)

ध्रुवः — कथं मौनमालम्बितम्? जानासि मातृप्रवृत्तिं न वा, सत्वरमुच्यताम्।

अभ्यसूया — जानाम्येव संपूर्णां प्रवृत्तिं मातुस्ते। परं मद्वचनश्रवणेन कुमारस्य रोष उदेति ततो मयान्न वदामि।

ध्रुवः — उच्यतां ततः परम्।

अभ्यसूया — गोरक्षणव्यग्रतया कुमारो योगिराजदर्शनार्थं न गतः।

ध्रुवः — स्वकर्मपारतन्त्र्यात्प्रातर्गन्तुं न शक्तोऽहम्। ततस्ततः?

अभ्यसूया — तत उत्तमस्तु ममार्यो ध्रुवो योगिराजदर्शनार्थं गत इति ज्ञात्वा तूर्णं तपोवनं सूर्योदयसमय एव प्रविष्टो यक्षेण च ध्रुवबुद्ध्योत्तम एव भक्षितः।

ध्रुवः — हा वत्स उत्तम! एष ते परिणामः?

प्रणयामृतवारिधिं क्व ते
मुखमिन्दुप्रतिमं विलोक्य मे।
हृदयं परितोषमेष्यति
ललितसौन्दर्यसुधारसोज्ज्वलम्॥ २॥

हा! गतं सौजन्यं हृतं सौहार्दं प्रणष्टं सौशील्यं नष्टं सारल्यमस्तमितमौदार्यं गलितं गाम्भीर्यं चलितं धैर्यं च। हा वत्स, कथमेवमेकपद एव मां मातरं चानापृच्छ्य

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

परलोकप्रयाणयात्रा स्वीकृता। श्वावं प्रतिपालय माम्। अहमपि सहैव त्वया यास्यामि। (मूर्च्छया पतति)

सुनीतिः - वत्स! समाश्वसिहि समाश्वसिहि।

(पटाञ्चलेन वीजयति)

ध्रुवः - (क्षणेन संज्ञामुपलभ्य)

हा वत्स वत्सोत्तम सौहृदाब्धे

कथं त्वया प्राणसमेन हीनः।

जीवन्निमेषार्द्धमपि ध्रुवश्चेज्जीवन्जनो हा ध्रुव एव नायम्॥ ३॥

कः कोऽत्र भोः!

द्वारपालः - (प्रविश्य) आज्ञापयतु देवः।

ध्रुवः - द्वारपाल! त्वरयाहूयतां विवेकनिधिः।

द्वारपालः - यथाज्ञा देवस्य। (निष्क्रान्तः)

ध्रुवः - मातः पूर्णमिदानीं ध्रुवस्य जीवनप्रयोजनं तदयं परलोकप्रयाणप्रणामाञ्जलिर्मे। माता सुरुचिर्मे न यथा सत्पुत्रवियोगदुःखदीना कमपि दुःखमनुभवेत्तथा संभावनीया भगवता विवेकनिधिना च।

सुनीतिः - वत्स! अलमावेगेन। प्रवृत्तिस्तु पूर्णा श्रूयतामनन्तरं कर्तव्यविचारः कर्तव्यः।

ध्रुवः - युक्तमुक्तं मातृचरणैः (अम्बसूयां प्रति) अम्बसूये! माता ~~क्ष~~ श्रीसुरुचिरिदानीं क्वास्ति?

अम्बसूया - कुमार! खलु वायुवसन्त गतमुत्तमं च तपोवनमुपगतं निशम्य क्षिप्रं तपोवनं गत्वा योगीन्द्रं क्वास्ति कुमार इत्यपृच्छत्। योगीन्द्रेण च मत्र जठरानलाहुतिं गत इत्युक्ते तदनन्तरं सा स्वपुत्रमरणश्रवणखेदान्मूर्छामगच्छत्।

सुनीतिः - (सास्रम्) हा प्रियसखि सुरुचे! तवापीयं पारेकृतिः? (मूर्च्छया पतति)

ध्रुवः - मातर्मातर्वीर्यमेव कार्यम्। तादृश एव सत्पुत्रविरहः।

ततस्ततः?

अम्बसूया - ... योगीश्वरो यथा मूर्छितां तां रथे निक्षिप्य

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सारथिना स्वेन सहैवाकाशमार्गेणोत्तरां दिशं प्रयातः। अहं च
याममात्रं प्रयातत्रैव निश्चलैव स्थित्वेदानीं कथं कथमपि
त्वत्समीपमुपेतास्मि

ध्रुवः — हा! मातः श्रीसुरुचेरन्येण प्रवृत्तिः? धिङ् मां जन्मजीवितं
च मे, यस्य माता यक्षेण परामूयते।

पवनेन न शीतभानुना, न च चण्डांशुभिः कदापि भानुना।
अहह! जननी तु साऽद्य मे परिभूता गत यक्षापसदेन ॥४॥

हा धिक् किमिदानीं जीवितेन मे!

भ्रातर्भ्रातर्निरुपमतमप्रेमपीयूषसिन्धो
जातोऽयं मत्प्रतिनिधितया वत्स यक्षान्मृतिस्ते।
तन्निर्यक्षं निखिलभुवनेमण्डलं संविधाय
प्राणान् त्यक्त्वा सुरपुरगतं त्वामुपैष्यामि तूर्णम् ॥5॥
(मुर्छिता पतति)

सुनीतिः — वत्स! वत्स! किमेवं कातरतरतामुरीकुरुषे?
धैर्यमेव धार्यमीदृश्यां वेलायां भवादृशैर्महापुरुषैः।
(इति वीजयति)

ध्रुवः — (संज्ञामुपलभ्य) हा वत्स! विद्याविनयनयदयौदार्यशौर्यधैर्य-
विवेकनिधे! क्वासि? एहि, देहि मे प्रतिवचनम्।

विवेकनिधिः — (प्रविश्य) कुमार, कुमार! किमेतत्?

ध्रुवः — (नेत्रे समुन्मील्य) किं विवेकनिधिः समागतः?

विवेक० — अथ किम्! आस्ते कुमारस्याज्ञा?

ध्रुवः — विवेकनिधे! मन्दभाग्यस्य मे हृदयसर्वस्वं स्नेहसर्वस्वं
जीवितसर्वस्वं च वत्स उत्तमः केनापि यक्षेण मारितः।

विवेकनिधिः — हा! दैवकरे ~~[illegible]~~ कृतमेतद् दुष्टेन यक्षेण।
अस्तमितमिदानीं सौहृदरससर्वस्वम्। ततस्ततः?

ध्रुवः — मातापि मे तीर्थकथा सुरुचिरपहृता दुष्टेन यक्षेणेति
निवदत्याबाभ्यासुपा।

~~विव~~ विवेक० — कुमार! सोऽलं श्रोते भ्रातः। ततस्ततः?

ध्रुवः — तात इदानीं किं राज्येन किं धनेन किं जीवितेन
वा प्रयोजनम्? ध्रुवस्यास्तमितमिदानीं जीवनप्रयोज-
-नम्। तदिदं राज्यमिदं माता सुनीतिरियं च वंश-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

परमारपरिपालिता प्रजा भवत्प्रतिनिधित्वेनापि नैव संभावनीया
न्यस्त एष खड्गः । (खड्गं मुञ्चति)
प्रज्वलज्ज्वलनज्वालामालिरूपं सत्तरम् ।
वृत्समुत्तममेवाहमनुयातुं समुत्सहे ॥ 6 ॥
विवेकानिधिः — (सास्रम्) कुमारः प्रवामभूमेतद्दस्यत्वकृत्यं न कुमारस्य । न शोभते मनुवंशमहामते मे वादृशस्येदृशी कातरता ।
सुनीतिः — वत्स ! यदेतद्दारकृत्यं वत्सेन तदशकातरनरकृत्यं न पुनर्धीरवीरगम्भीरतरनरकृत्यम् । धीरवीरगम्भीरतरनरकृत्यं तु किमप्यन्यदेव भवति । वत्स उत्तमः कान्ये न प्रियः । वयमपि विना वत्सेनोत्तमेन किं जीवितुमुत्सहे मन्यते मानसं ते ? परं एवं प्राणपरित्यागेन किं फलं ? किं सुरुचेर्हितं , किमुत्तमस्य हितं, किं स्वधर्माचरणं , किं स्वकुलानुरूपं वा ? न किमपि फलमिति मन्येऽहम् । यदि च वत्सस्य स्वान्ते प्राणत्यागेनानृण्य भातुस्ते सुरुचेर्वत्सस्योत्तमस्य मन्यते चेन्नाहमिमां कातरतरनरशरणीयां सरणीमनुसरेयम् । मया खलु मनुवंशप्रवामपराभवकारिणं यक्षाणामुन्मूलनाय बद्धोऽयं दृढः परिकरः ।
(इति वदन्ती नितरां ध्रुवमसिं गृहीत्वा) कः कोऽत्र भोः, प्रवानीयतां सज्जो रथो मे । (परिक्रामति)
ध्रुवः — (स्वगतम्) अहो मातुः सन्नोत्साहशक्तिः ।
(प्रकाशम्) मातः ! तर्हि श्रीमत्याः कीदृशी वाञ्छा तदाज्ञापय ।
सुनीतिः — यद्येवं तर्हि श्रूयताम् ।

मृत्युञ्जयस्य कृपया धनदः स्वयं तं
संजीवयत्वनुजमाशु च भ्रातरं ते
चोद्यक्षमाखिलं भुवनं विधाय
त्वं चाशुतोषमयि तोषय तं तपोभिः ॥ 7 ॥

मृत्युञ्जयः प्रणतपालकृपालुचित्तः
संजीवयिष्यति हि तौ तव भ्रातरौ द्वौ ।

CC-0. Prof Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

एतद्ध्रुवं हि तव कृत्यमहं तु मन्ये
मा पामराश्रितपथातिरतिं तामुपेहि ॥ ४॥

विवेकनिधिः - कुमार! पुत्रमुक्तमेतन्मात्रा। महामप्येतदेव कर्तुं रोचते। आज्ञापयतु कुमारो मामेवैतत्कर्तुम्।

ध्रुवः - आर्य! तत्खलु मातुराज्ञापालनमेव कृत्यं नार्यस्य मातुराशिषा च मात्राज्ञानुसारेण सर्वं कर्तुं सोत्साहमेव मानसं मे।

विवेकनिधिः - कुमार! कुमारचरणरजः परमातुरिव कुमारमनुयास्यामि महत्या सेनया सहैव।

ध्रुवः - श्रीमच्छावकोः प्रसादाद्धनुर्द्वितीयेनाप्येतत्कर्तुं शक्यं मया। श्रीमतार्येण यावन्मदागमनं तावत्प्रजानुपालनलालनपोषणानि मनोवाक्कायकर्मभिर्विधेयानीति प्रार्थना मे। आदेश्यतां मे रथानयनाय कश्चित्।

विवेकनिधिः - यथाज्ञा कुमारस्य। द्वारपाल!

द्वारपालः - (प्रविश्य) एषोऽस्मि आज्ञापयतु।

विवेक० - सायुधं कुमारस्य रथं शीघ्रमानय।

द्वारपालः - यथाज्ञामात्यवर्यस्य। (निष्क्रान्तः)

ध्रुवः - पश्यामयाशये मातः! श्रीरमारमणचरणतरुणारुणाम्बुजयुगलसेवाप्रभावेणाशिषा चात्रभवत्या भवत्याः सद्य एव सिद्धसर्वार्थो युष्मच्चरणकमलयुगलसेवामनुभविष्यामि। न मद्विषयिणी कापि चिन्ता विधेया।

सुनीतिः - (सास्रम्) वत्स! श्रीरमारमणस्यैवास्ति ते चिन्ता।

ध्रुवः - आर्य विवेकनिधे! इयं मे पितृपितामहपरिपालिता प्रजा न यथा मद्वियोगात्कथमपि दुःखमनुभवेत्तथा विधेयमार्येण।

विवेकनिधिः - कुमार! प्रताप एव भवदीयो जागर्ति तस्याः सर्वाणि दुःखानि दूरीकर्तुम्। निमित्तमात्रमयं जनः।

द्वारपालः - (प्रविश्य) महाराज! सायुधं सज्जं रथमादाय द्वारि तिष्ठति सारथिः। ततः परं देवः प्रमाणम्।

ध्रुवः - (पुनर्नत्वा) मातर्मातर्मङ्गलकामदुघा ह्याशिषस्ते मङ्गलकर्यो मे। भगवत्याः करकमलाग्रस्पर्शादपि विजयासिद्धिर्भवे

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मार्वव्याति खड्गः, तदेनं महामर्षयितुमर्हसि ।
(सुनीतिः करालकरालं करवालं गृहीत्वा प्रणमति)

सुनीतिः – हरिहरविरञ्चयस्त्वां, परितो रक्षन्तु यक्षदौग्र्यः ।
रक्षामणय स्वामी त्वया हृदि स्थापिता नित्यम् ॥९॥
मनुवंशकीर्तिमतुलां, दिगन्तविख्यातिधारिणीं कृत्वा ।
भ्रात्रानुजेन सहितो, नयनानन्दाय मे भूयाः ॥ १०॥

ध्रुवः – मातरिमानि शुभाशीर्वचांस्येव मे महाहवे महा~~~~
सहायकराणीति मन्येहम् ।

विवेकनिधिः – कुशलं कुरुतादहर्निशम् कमला हृत्कमलालयो हरिः ।
अयि वत्स, समस्तदिक्षु ते प्रथतां कीर्तिहरो हरोपि सः ॥ ११॥

ध्रुवः – अयि मातः सुनीते ! आर्य विवेकनिधे ! इव प्रयाणप्रणामः ।
(निष्क्रान्तः)

विवेकनिधिः – मातः सुनीते ! प्रस्थितः कुमारो यक्षकुलविनाशाय
अहमपीदानीं तदाज्ञानुरूपं स्वाधिकारमनुसर्तुं गच्छामि ।
(प्रणम्य निष्क्रान्तः)

सुनीतिः – हला सुशीले ! वत्सस्य ध्रुवस्य ~~~~ परमविजया-
भ्युदयासिद्धये परमेश्वरमेव शरणं कर्तुमिच्छामि । तत्
परमेश्वरमन्दिरमार्गं दर्शय ।

सुशीला – इत इतो देवी । (निष्क्रान्ते)

॥ इति श्रीमत्सद्गुरुकेशवकृपावल्लरीपल्लवायमाने श्रीध्रुवाभ्यु-
दयनाम्नि नाटके षष्ठोऽङ्कः ॥

यस्य प्रेमकुमारिका सुजननी श्रीमोपिकान्याभिधा
श्रीमहेश्वरभट्ट इत्यमहामाहेश्वरो ग्रामः पिता
श्रीमत्केशवशास्त्रिणश्च गुरवो मित्रं जटाशङ्कर-
स्तस्यापि कृतिरेषा तुष्यतु तया श्रीमान्सदा शङ्करः ॥१॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha